# नीतिशास्त्रम्

कक्षा ९



नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# नीतिशास्त्रम्

कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८२

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य नीतिशास्त्रविषयकपाठ्यक्रमस्याधारेण नवम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं उपप्रा. रोहिणीराजः तिमिल्सिना, उपप्रा. मनोजः घिमिरे, पर्वतराजः घिमिरे, केशवः भट्टराई, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, टुकराजः अधिकारी, राजुः श्रेष्ठ-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं कुलदीपजङ्गबहादुर गुरुङ- इत्याख्येन महानुभावेन रूपसज्जा च भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, पाठ्यक्रम लक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।


नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | क्षमया किं न सिद्ध्यति ? | १ |
| द्वितीयः | दुर्बुद्धिः सर्वथा त्याज्या | १० |
| तृतीयः | जगज्जननी जानकी | १७ |
| चतुर्थः | सहकार्यम् | २५ |
| पञ्चमः | दानं हि सर्वव्यसनानि हन्ति | ३३ |
| षष्ठः | अङ्गुलीमालः | ४१ |
| सप्तमः | वृद्धसेवा गरीयसी | ५० |
| अष्टमः | शान्तिस्तु सुखकारिका | ५८ |
| नवमः | कर्तव्यपरायणः पुत्रो गरुडः | ६६ |
| दशमः | भगिन्या अन्नप्राशनम् | ७३ |
| एकादशः | समाजसेवी तुलसीमेहरः | ८१ |
| द्वादशः | मन्त्रिणः कार्यकौशलम् | ८९ |
| त्रयोदशः | महतामेकरूपता | ९६ |
| चतुर्दशः | ऐतिह्यगर्भं रहस्यम् | १०५ |
| पञ्चदशः | प्रकृतिपूजनपराऽस्मत्परम्परा | ११० |
| षोडशः | मुद्गलस्य त्यागः | ११८ |
| सप्तदशः | वाचं वदत भद्रया | १२६ |
| अष्टादशः | हर्षपुरम् | १३५ |

प्रथमः पाठः

# क्षमया किं न सिद्ध्यति ?



क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमावशीकृते लोके क्षमया किं न सिद्ध्यति ॥१॥

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणास्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥२॥

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥३॥

दुर्वृत्तैर्बन्धुभिर्नित्यं छलिभिश्चाप्यनादृतः ।
धर्मराजो महान् जातः क्षमी सत्यधनो हि सः ॥४॥

सागराणां च शैलानां प्राणिनां नीचकर्मणाम् ।
सम्पूज्या सहते भारं क्षमाशीला वसुन्धरा ॥५॥

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥६॥

**१**
**पदच्छेदः**

क्षमा, बलम्, अशक्तानाम्, शक्तानाम्, भूषणम्, क्षमा, क्षमावशीकृते, लोके, क्षमया, किम्, न, सिद्ध्यति ।

**अन्वयः**

क्षमा अशक्तानां बलम् (अस्ति), क्षमा शक्तानां भूषणम् (अस्ति), क्षमावशीकृते लोके क्षमया किं न सिद्ध्यति ?

**अर्थः**

क्षमा दुर्बलानां कृते बलमस्ति । क्षमा शक्तिमतां भूषणं वर्तते । क्षमा समग्रमपि जगद् वशीकर्तुं समर्थास्ति । यतो हि क्षमा दुःसाध्यमपि कार्यं सारल्येन सम्पादयति ।

**२**
**पदच्छेदः**

नरस्य, आभरणम्, रूपम्, रूपस्य, आभरणम्, गुणः, गुणस्य, आभरणम्, ज्ञानम्, ज्ञानस्य, आभरणम्, क्षमा ।

**अन्वयः**

नरस्य आभरणं रूपम् (अस्ति) । रूपस्य आभरणं गुणः (अस्ति) । गुणस्य आभरणं ज्ञानम् (अस्ति) । ज्ञानस्य आभरणं क्षमा (अस्ति) ।

**अर्थः**

मनुष्याः सुन्दरं रूपं वाञ्छन्ति । अतो रूपं मनुष्याणां विभूषणं वर्तते । सद्गुणाः रूपमपि विभूषयन्ति । गुणानां विभूषणं तु ज्ञानमस्ति । ज्ञानस्य आभरणं क्षमा वर्तते । अतो गुणेन ज्ञानेन क्षमया च सम्पन्नस्य एव मनुष्यस्य बाह्यं सौन्दर्यं सार्थकं भवति ।



**३**
**पदच्छेदः**

एकः, क्षमावताम्, दोषः, द्वितीयः, न, उपपद्यते, यद्, एनम्, क्षमया, युक्तम् अशक्तम्, मन्यते, जनः ।

**अन्वयः**

क्षमावताम् एकः (एव) दोषः (अस्ति); द्वितीयः न उपपद्यते । यत्, जनः क्षमया युक्तम् एनम् अशक्तं मन्यते ।

**अर्थः**

क्षमाशीलस्य जनस्य एक एव दोषः अस्ति, तद्भिन्नः द्वितीयः दोषो नास्ति । सामाजिका जना क्षमाशीलं जनम् अशक्तं मन्यन्ते । ते विचारयन्ति- 'एषः अशक्तोऽस्ति; प्रतिकारं कर्तुं न शक्नोति, अतः क्षमते' इति । परन्तु क्षमाशीलः जनः अशक्तः न भवति ।

**४**
**पदच्छेदः**

दुर्वृत्तैः, बन्धुभिः, नित्यम्, छलिभिः, अपि, अनादृतः, धर्मराजः, महान्, जातः, क्षमी, सत्यधनः, हि, सः ।

**अन्वयः**

दुर्वृत्तैः बन्धुभिः छलिभिश्च नित्यम् अनादृतः अपि धर्मराजः महान् जातः । हि स क्षमी सत्यधनः च आसीत् ।

**अर्थः**

महाराजो युधिष्ठिरो दुर्योधनादिभिर्दुराचारिभिः बान्धवैः शकुन्यादिभिः छलकर्मिभिः सर्वदा अपमानितः सन्नपि सत्यनिष्ठां स्वीकृत्य दुराचारिणस्तान् अक्षमत । यतो हि स क्षमाशीलः सत्यव्रतश्च आसीत् ।

**५**
**पदच्छेदः**

सागराणाम्, च, शैलानाम्, प्राणिनाम्, नीचकर्मणाम्, सम्पूज्या, सहते, भारम्, क्षमाशीला, वसुन्धरा ।

**अन्वयः**

वसुन्धरा सागराणाम्, शैलानाम्, प्राणिनाम्, नीचकर्मणां च भारं सहते । (अतः) क्षमाशीला (सा) सम्पूज्या (वर्तते) ।

### अर्थः

पृथिवी क्षमाशीला वर्तते । सा सर्वेषां समुद्राणां, सर्वेषां पर्वतानां, सर्वेषां च प्राणिनां भारं सहते । इत्येव न सा दुष्कर्मिणां दुष्कर्मणां भारमपि सहते । पृथिवी न कदाचित् कस्यापि प्रतिकारं करोति । अतः सा क्षमायाः प्रतिमूर्तिर्वर्तते । क्षमायाः कारणेनैव पृथिवी सर्वपूज्या मन्यते ।

## ६
## पदच्छेदः

एकः, धर्मः, परम्, श्रेयः, क्षमा, एका, शान्तिः, उत्तमा, विद्या, एका, परमा, तृप्तिः, अहिंसा, एका, सुखावहा ।

### अन्वयः

एकः धर्मः परं श्रेयः (वर्तते) । एका क्षमा उत्तमा शान्तिः (वर्तते) । एका विद्या परमा तृप्तिः (वर्तते) । एका अहिंसा सुखावहा (वर्तते) ।

### अर्थः

परमकल्याणस्य एकमेव साधनं धर्मो वर्तते । क्षमा एव सर्वेभ्य उत्तमां शान्तिं प्रददाति । विद्या एव परमतृप्तिप्रदायिनी वर्तते चेद् अहिंसा एव जनेभ्य उत्तमं सुखं प्रयच्छति ।

### शिक्षणालोकः

अस्य पाठस्य शिक्षणद्वारा विद्यार्थिनः क्षमाया महत्त्वविषये प्रशिक्षणीयाः । तेषां क्षमाशीलतायै शिक्षकेण यतनीयम् । क्षमाया महत्त्वसूचकाः प्रेरकप्रसङ्गाः, कथाः, अन्यानि समुचितानि पद्यानि च अन्विष्य छात्राः श्रावणीयाः । विशेषतोऽस्य पाठस्य शिक्षणकाले शिक्षकेण तादृशोऽवसरः स्रष्टव्यः, येन छात्राणां क्षमाशीलता परीक्षिता भवेत् ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

दुर्वृत्तैर्बन्धुभिर्नित्यं छलिभिश्चाप्यनादृतः ।

धर्मराजो महान् जातः क्षमी सत्यधनो हि सः ॥

२. **शुद्धं लिखत**

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।

यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥

३. **शिक्षकसाहाय्येन नेपालीभाषायामर्थं लिखत**

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।

चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

४. **अतिसङ्क्षेपेण उत्तरयत**

(क) क्षमा केषां बलम् ?

(ख) क्षमा किं सम्पादयति ?

(ग) गुणः कस्याभरणं वर्तते ?

(घ) मनुष्याः कीदृशा भवितुमिच्छन्ति ?

(ङ) क्षमावतां कति दोषाः सन्ति ?

(च) जनः क्षमावन्तं कीदृशं मनुते ?

(छ) का सर्वेषां भारं सहते ?

(ज) क उत्तमं सुखं प्रददाति ?

५. **'क्षमाशीला वसुन्धरा' इत्यस्य तात्पर्यं प्रकाश्य एकमनुच्छेदं रचयत ।**

## ६. परस्परं मेलयत

| खण्डः 'क' | खण्डः 'ख' |
|---|---|
| ज्ञानस्याभरणम् | ज्ञानम् |
| रुपस्याभरणम् | रूपम् |
| गुणास्याभरणम् | क्षमा |
| नरस्याभरणम् | गुणः |

## ७. रिक्तस्थानं पूरयत

(क) शक्तानां भूषणं ............ अस्ति । (बलम्, ज्ञानम्, क्षमा)

(ख) धर्मराजः ............ जातः । (सर्वेश्वरः, महान्, विद्वान्)

(ग) पृथिवी सागराणां भारं ............ । (सहते, त्यजति, विश्रमते)

(घ) विद्या परमां तृप्तिं ............ । (नाशयति, दूषयति, ददाति)

## ८. सत्यासत्यं विवेचयत

(क) क्षमया सर्वं सिद्धयति ।

(ख) गुणस्याभरणं रूपमस्ति ।

(ग) जनाः क्षमावन्तमशक्तं मन्वते ।

(घ) वसुन्धरा सर्वं भारं न सहते ।

(ङ) क्षमा परमा तृप्तिः कथिता ।

## ९. प्रदत्तानां पदानां प्रयोगेण नीतिमूलानि वाक्यानि रचयत

भूषणम्, मन्यते, रूपम्, दोषः, श्रेयः, लोके ।

## १०. अर्थं लिखत

तृप्तिः, शैलानाम्, वसुन्धरा, अनादृतः, सत्यधनः, क्षमी ।

## ११. अधस्तनं पद्यं पठित्वा समयस्य महत्त्वं प्रकाश्यानुच्छेदमेकं रचयत

न हि कश्चिद् विजानाति कस्य किं श्वो भविष्यति ।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ॥

## १२. प्रदत्तमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

जीवानां पीडनं हिंसा कथ्यते । हिंसा वाचा कर्मणा मनसा च सम्भवति । हिंसाया वैपरीत्येन प्रवर्तनमहिंसा उच्यते । सर्वेषु प्राणिषु करुणामयो व्यवहार एव अहिंसास्ति । यत्र हिंसा भवति तत्र भयम्, वैरता, घृणा, अशान्तिश्चेत्यादयो दुर्गुणाः दृश्यन्ते, यतो हि अहिंसया स्नेहमयी एकतामयी सद्भावपूर्णा आत्मीया चावस्था सृज्यते । अतः सर्वे जना अहिंसां कामयन्ते । अहिंसा महान् धर्मो वर्तते । सामाजिकसद्भावस्य विकासाय मानसिकशान्तेः प्राप्तये चाहिंसा साधनं मन्यते । हिंसां दूरीकृत्य प्रवर्तमानो जनः शान्तिं सन्तोषं च प्राप्नोति । हिंसां परित्यज्यैव सुखं प्राप्तुं शक्यते । अतो महामानवो गौतमबुद्धोऽहिंसाया उपदेशं जगति प्रसारितवान् । अस्माभिरपि नितरामहिंसायाः पालनं कर्तव्यम् ।

(क) का हिंसा ? का चाहिंसा ?

(ख) कीदृशो व्यवहारोऽहिंसा कथ्यते ?

(ग) अहिंसया किं सृज्यते ?

(घ) कोऽहिंसाया उपदेशं जगति प्रसारितवान् ?

(ङ) हिंसा केन केन सम्भवति ?

(च) यत्र हिंसा भवति तत्र कीदृशाः दुर्गुणाः दृश्यन्ते ?

(छ अहिंसा कयोः साधनं मन्यते ?

(ज) अस्माभिः किं कर्तव्यम् ?

## १३. 'क्षमा' इति विषये पाठमाधृत्यानुच्छेदमेकं रचयत ।

## १४. सर्वे जनाः क्षमाशीला भवन्ति चेत् किं विश्वशान्तिः सम्भवति ? कक्षायां परामृशत ।

## १५. जनः किमर्थं क्षमावन्तमशक्तं मनुते ? तर्कयत ।

## १६. समुचितमुत्तरं (✓) चिह्नेन दर्शयत

**(क) अशक्तानां बलं किम् ?**

(अ) सत्यम् (आ) क्षमा

(इ) दया (ई) ज्ञानम्

**(ख) ज्ञानं कस्याभरणं वर्तते ?**

(अ) गुणस्य (आ) रूपस्य

(इ) क्षमायाः (ई) नरस्य

**(ग) धर्मराजो युधिष्ठिरः कैरनादृतो नासीत् ?**

(अ) छलिभिः (आ) दुर्वृत्तैः

(इ) साधुभिः (ई) बन्धुभिः

**(घ) अहिंसा कीदृशी वर्तते ?**

(अ) दुःखावहा (आ) सुखावहा

(इ) भयावहा (ई) स्नेहावहा

## व्यवहारानुशीलनम्

**१. कश्चन तव सखाऽन्येषां रूप्यकाणि चोरयन् त्वया दृष्टः। तदानीं क्षमां याचमानं सखायं प्रति तव व्यवहारः कीदृशो भवति ? तर्कयत।**

**२. दुष्टानां दुष्टतां निवारयितुं क्षमैवोत्तमं साधनं मन्यते। तव विचारे क्षमा दुष्टतां निवारयति उत वर्धयति ? उदाहरणमुखेन स्वाशयं प्रकटयत।**

**३. त्वं क्षमावन्तं जनं महान्तं मनुषे उताशक्तम् ? सकारणं स्पष्टय।**

**४. समुचिते विकल्पे चिह्नं दत्त**

**(क) भ्राता सख्युर्लेखनीमत्रोटयत्, त्वं किं करोषि ?**

(अ) मातरमुक्त्वा भ्रातरमपशब्दं गालीं दापयामि।

(आ) स्वयमेव भ्रातरं प्रति अपशब्दवृष्टिं करोमि।

(इ) लेखन्या महत्त्वं ज्ञापयित्वा तथा न कर्तुं बोधयामि।

(ई) 'सम्यक् कृतं त्वया' इत्युक्त्वा तस्योत्साहं वर्धयामि।

**(ख) मार्गे चलता त्वया परस्परं मुष्टामुष्टी कुर्वन्तौ सखायौ दृष्टौ, तत्र तव कर्तव्यं किं भवति ?**

(अ) एकस्य सख्युः पक्षं गृहीत्वाऽपरस्य ताडनम्,

(आ) 'ताडय, ताडय, इतोऽप्यधिकं ताडय' इत्युक्त्वा कस्यचिदेकस्योत्साहवर्धनम्

(इ) उभयोः कलहे विजेतृनिर्णायकत्ववहनम्

(ई) विवादस्य संवादेन समाधानायोत्प्रेरणम्

**(ग) नियमितरूपेण गृहकार्यं कुर्वाणस्तव कश्चन सखा कदाचिद् गृहकार्यं विस्मृतवान् । तव विचारे तत्र गुरुणा किं कर्तव्यम् ? स्वविचारं प्रकटयत ।**

(अ) 'अस्तु, पुनरेवं न करोतु' इत्युक्त्वा स क्षन्तव्यः ।

(आ) 'त्वमपि गृहकार्यमकुर्वाणानां पङ्क्तौ प्राप्तः ।' इत्यादिभिर्वचोभिस्तस्य भर्त्सनं कर्तव्यम् ।

(इ) तस्य कपोलयोः चपेटैस्ताडयितव्यम् ।

(ई) स कक्षाया बहिर्निष्कासयितव्यः ।

**(घ) आत्मनोऽवरान् विद्यालयस्यानुजान् प्रति तव व्यवहारः कीदृशो भवति ?**

(अ) तर्जनशीलः

(आ) औदासीन्यपूर्णः

(इ) स्नेहपूर्णः

(ई) पीडनशीलः

द्वितीयः पाठः

# दुर्बुद्धिः सर्वथा त्याज्या

कस्मिँश्चिद् ग्रामे धर्मबुद्धिनामा एको जन आसीत्। पापबुद्धिनामा तस्य कश्चन सखाऽऽसीत्। धर्मबुद्धिर्विदेशं गत्वा सुकृतैर्धनमर्जयति स्म। पापबुद्धिस्तु अकर्मण्यः सन् ग्रामे एव निवसति स्म। जनानां वञ्चनं तस्य कार्यमासीत्। कदाचित् पापबुद्धिना चिन्तितम्- 'अहं मूर्खो दरिद्रश्च। धर्मबुद्धिना सह विदेशं गत्वा तस्यैवाश्रयेण अर्थोपार्जनं विधाय एनमपि वञ्चयित्वा सुखी भविष्यामि' इति विचार्य धर्मबुद्धेः पार्श्वे गत्वा स स्वस्य विदेशगमनेच्छामकथयत्। वित्तोपार्जनस्य कञ्चनोपायं च स धर्मबुद्धिमश्रावयत्।

वित्तोपार्जनस्योपायं श्रुत्वा धर्मबुद्धिरपि तेन सह विदेशगमने समुद्यतोऽभवत्। कदाचित् शुभेऽहनि पापबुद्धिना सह स देशान्तरं प्रस्थितवान्। तत्र धर्मबुद्धेः प्रभावेण पापबुद्धिनाऽपि प्रभूततरं वित्तमुपार्जितम्। अर्थोपार्जनेन प्रसन्नचेतस्कौ तौ कदाचित् स्वदेशं प्रतिजग्मतुः। प्रत्यावर्तने तौ मार्गस्यातिदीर्घतामनुभूतवन्तौ। उच्यते च-

**प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनाम्।**

**क्रोशमात्रोऽपि भूभागः शतयोजनवद् भवेत्॥**

स्वग्रामं प्रति गच्छन्तौ तौ मार्गे विविधा योजनाः संरचितवन्तौ। पापबुद्धिर्धर्मबुद्धिं प्रति उक्तवान् - 'सखे! सर्वमेतद्धनं गृहं नेतुं नोचितं मन्ये। यतः कुटुम्बिनो बान्धवाश्च धनं याचिष्यन्ते। अतो वनमध्येऽत्रैव क्वापि भूमौ बहु धनं निक्षिप्य किञ्चिन्मात्रमादाय गृहगमनं समुचितं भवति। आवश्यकत्वे भूयोऽपि तन्मात्रं धनं समेत्य इतो नेष्यावः' इति। एतच्छ्रुत्वा धर्मबुद्धिर्निःसन्देहं तत्परामर्शं स्वीकृतवान्।



किञ्चित्कालानन्तरमेकस्मिन् दिने पापबुद्धिर्निशीथे वनं गत्वा तत्र निक्षिप्तं सर्वमपि धनं समादाय स्वभवनं जगाम । अन्येद्युः स धर्मबुद्धिं समभ्येत्य प्रोवाच- 'मित्र ! वने स्थापितं धनं निश्चेतुमावाभ्यां तत्र गन्तव्यम् । सोऽब्रवीत् - 'अस्तु, तदेव विधीयताम् ।' द्वावेव वनं गत्वा तत्स्थानमखनताम्, तौ तत्र रिक्तं भाण्डं दृष्टवन्तौ । पापबुद्धिः स्वशिरस्ताडयन् प्रोवाच - 'भो धर्मबुद्धे ! त्वया हृतमेतद् धनम्, नान्येन । प्रयच्छ मे तस्यार्धं धनम् । नो चेदहं राजप्रासादे निवेदयिष्यामि' । स आह - 'भो दुरात्मन् ! मैवं वद । धर्मबुद्धिरहं खलु । नैतच्चौरकार्यं करोमि । श्रुतं त्वया ? उक्तं वर्तते-

**मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।**

**आत्मवत् सर्वभूतेषु वीक्षन्ते धर्मबुद्धयः ॥**

विवदमानौ तौ धर्माधिकारिणं प्रति गतौ, मिथो दूषयन्तौ च यथातथं प्रोचतुः । तत्र धर्माधिकारी पप्रच्छ- 'युवयोः पार्श्वे किमपि साक्षिभूतं प्रमाणमस्ति ?' पापबुद्धिः प्राह- 'अयं नाममात्रेण धर्मबुद्धिः, व्यवहारेण तु दुष्टमतिरस्ति । एतेनैव चोरितं तद् धनम् । सत्यमेवैतद् ।' धर्मबुद्धिः न्यवेदयत् - 'महात्मन् ! असत्यमिदं वचः । एतादृशं दुष्कर्म कर्तुमहं नैव शक्नोमि । मिथ्या प्रमाणैरनेकैर्वयमसत्यमपि सत्यं कर्तुं यतामहे परन्तु सर्वव्यापिनमीश्वरं वञ्चयितुं नैव समर्था भवामः । पुरो दृश्यमाना प्रकृतिरेव अस्माभिर्विहितानां कर्मणां साक्षिणी भवति । उक्तं च -

**आदित्यचन्द्रावनिलोऽनलश्च,**

**द्यौर्भूमिरापो हृदयं यमश्च ।**

**अहश्च रात्रिश्च उभे च सन्ध्ये,**

**धर्मो हि जानाति नरस्य वृत्तम् ॥**

तदनन्तरं धर्माधिकारी प्रत्यपृच्छत् - कथं परीक्ष्येत ? सपद्येव पापबुद्धिराह- 'तत्र एको महान् शमीवृक्षोऽस्ति । तत्र वनदेवताया निवासोऽस्तीति ग्रामवासिनो विश्वसन्ति । अस्मिन् विषये स एव प्रष्टुं शक्यते । धर्माधिकारी च प्राह- 'अस्मिन् विषये धर्माधर्मविवेकिनामस्माकमपि महत् कौतूहलं वर्तते । अस्माभिः सह प्रत्यूषकाले युवाभ्यामपि तत्र गन्तव्यम्' इति ।

अनन्तरं पापबुद्धिर्गृहं गत्वा स्वपितरं सर्वं वृत्तान्तमश्रावयत् । पिता प्राह - 'वत्स ! द्रुतं तदुपायं कल्पय, येन तद्द्रव्यं स्थिरतामाप्नुयात् ।' स आह- 'तात ! तस्मिन् प्रदेशे एको विशालः शमीपादपो विद्यते । तस्मिन् वृक्षे महत् कोटरमस्ति । तत्र भवान् साम्प्रतमेव प्रविशतु । श्वः प्रभाते यदा 'कश्चौरः ?' इति पृच्छ्यते, तदा त्वया वाच्यम्- 'धर्मबुद्धिश्चौरः' इति ।

तथानुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिर्धर्मबुद्धिपुरःसरो धर्माधिकारिभिः सह वनं प्राप । तं शमीवृक्षमभ्येत्य तारस्वरेण स प्रोवाच- 'भो वनदेव ! आवयोर्मध्ये कश्चौरः ? निरुच्यताम्' इति । शमीकोटरस्थः पापबुद्धेः पिता प्रोवाच - 'भो ! शृणुत । धर्मबुद्धिना हृतम् तद् धनम् ।' तदाकर्ण्य विस्मिताः प्रोत्फुल्ललोचनाश्च ते

धर्माधिकारिणो यावद् धर्मबुद्धये वित्तहरणोचितं दण्डं प्रदातुं शास्त्रमवलोकयन्त आसन्, तावद् धर्मबुद्धिना तृणादिभिर्वह्निभोज्यद्रव्यैः तच्छमीकोटरं परिवेष्ट्य वह्निना सन्दीपितम्। सन्दीतात् तस्माच्छमीकोटराद् अर्धदग्धशरीरः स्फुटितेक्षणश्च पापबुद्धिपिता विलपन् निश्चक्राम। ते सर्वे सविस्मयमूचुः - 'अहो ! किमिदम् ?' स पापबुद्धिविचेष्टितं सर्वमिदं निवेद्य मृत्युं प्राप्तवान्। धर्माधिकारिणो वचनाद् राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य धर्मबुद्धिं प्रशंसन्तः ग्रामं प्रतिजग्मुः।

**शिक्षणालोकः**

कदापि धूर्तव्यवहारो न कर्तव्य इति बोधयता परोपकारादिषु विषयेषु लिखितानां कथानां श्रावणेन विद्यार्थिनः सदाचरणाय प्रेरणीयाः । धूर्ततायाः दुष्परिणामबोधकाः प्रसङ्गा अस्य पाठस्य शिक्षणे शिक्षकेण प्रयोज्याः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठे प्रयुक्तानि पद्यानि सस्वरं श्रावयत ।**

२. **धर्मबुद्धेः पापबुद्धेर्धर्माधिकारिणश्च संवादं साभिनयं पठत ।**

३. **पाठस्यान्तिममनुच्छेदं पठित्वा तस्याशयं प्रकटयत ।**

४. **पाठस्य सारांशं कथयत ।**

५. **सङ्क्षेपेणोत्तरयत**

(क) धर्मबुद्धिः कस्य मित्रमासीत् ?

(ख) पापबुद्धिः कीदृशमुपायमचिन्तयत् ?

(ग) पापबुद्धिः किमर्थं सर्वमेव धनं गृहं नेतुं नैच्छत् ?

(घ) धर्मबुद्धयः परद्रव्याणि कथं वीक्षन्ते ?

(ङ) पापबुद्धेः कथने कश्चौरः ?

(च) अस्माभिर्विहितानां कर्मणां साक्षी कः ?

(छ) ग्रामवासिनां मते कुत्र वनदेवताया निवासोऽस्ति ?

(ज) कः शमीकोटरे वह्निना अयोजयत् ?

६. **अधः प्रदत्तानि पदानि प्रयुज्य नीतिमूलानि वाक्यानि रचयत**

वञ्चयित्वा, वित्तम्, भूयः, अन्येद्युः, निशीथे, मिथः, वचः, कोटरे, आप्नोति, वह्निना ।

७. **शिक्षकस्य साहाय्येन सान्वयमर्थं प्रकाशयत**

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु वीक्षन्ते धर्मबुद्धयः ॥

## ८. पाठाधारेण सत्यासत्यविवेकं विधत्त

(क) धर्मबुद्धिः स्वदेशे स्थित्वैव अर्थोपार्जनं कृतवान् ।

(ख) पापबुद्धिर्मित्रेण सह देशान्तरं गतवान् ।

(ग) धर्मबुद्धिः प्रभूतं धनमार्जयत् ।

(घ) पापबुद्धिर्वने गोपितं धनं हृतवान् ।

(ङ) पापबुद्धेः पिता पुत्रं न्यवारयत् ।

(च) धर्माधिकारिभिर्धर्मबुद्धेर्निन्दा विहिता ।

## ९. कथायां कस्य पात्रस्य भूमिका प्रशस्याऽस्ति ? किमर्थम् ? स्वाभिमतं प्रकटयत ।

## १०. पाठस्य कथायामधस्तनानि कथनानि केन कं प्रति केनोद्देश्येन च प्रयुक्तानि ? निर्दिश्यताम् ।

(क) किञ्चिद् वित्तमादाय गृहगमने समुचितम् ।

(ख) नैतच्चौरकार्यं करोमि ।

(ग) एतेनैव चोरितं तद् धनम् ।

(घ) प्रकृतिरेव अस्माभिर्विहितानां कर्मणां साक्षिणी ।

(ङ) अस्माकमपि महत् कौतूहलं वर्तते ।

(च) तस्मिन् वृक्षे महत् कोटरमस्ति ।

(छ) आवयोर्मध्ये कश्चौरः ?

(ज) धर्मबुद्धिना हृतम् तद् धनम् ।

## ११. अधो लिखितां लघुकथां पठित्वा प्रश्नान् उत्तरयत ।

### बलाद् बुद्धिर्गरीयसी

कस्मिँश्चित् स्थाने विशालो वटवृक्ष आसीत् । तत्र वायसदम्पती निवसतः स्म । वायस्याः प्रसवकाले वृक्षविवरान् निष्क्रम्य एकः कृष्णसर्पः सदैव तदपत्यानि भक्षयति स्म । अनेन दुःखितौ तौ प्रियसुहृदः शृगालस्य समीपे गत्वा दुःखस्य कारणं निवेद्य तन्निवारणोपायं पप्रच्छतुः ।

स आह- 'अस्मिन् विषये कश्चिद् विषादो नैव करणीयः । उपायमन्तरेण तस्य लुब्धस्य निवृत्तिर्नास्ति । उच्यते च -

**उपायेन जयो यादृग् रिपोस्तादृङ्न हेतिभिः ।**

**उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते ॥'**

वायस आह - 'भद्र ! स दुष्टसर्पः कथं वधमुपैष्यति ? तत् कथ्यताम् । शृगाल उवाच- भवान् राजाधिष्ठानं नगरमेकं गच्छतु । तत्र कस्यापि प्रमादिनो धनिनो बहुमूल्ययुतमाभूषणं गृहीत्वा तत्कोटरे प्रक्षिप, तेन सर्पो बध्यते ।'

तदाकर्ण्य तत्क्षणमेव वायसौ उत्पतितौ । तौ कमप्येकं सरः प्रापतुः । तत्र कश्चिद् राजा स्वकीयानि आभूषणानि तीरे संस्थाप्य जलक्रीडां कुर्वन्नासीत् । वायसी कनकहारमेकमादाय स्वनिवासाभिमुखं प्रतस्थौ वायसोऽपि सहैव उड्डीयत । तां सहारामुड्डीयमानां वीक्ष्य राजभटा गृहीतलगुडाः सत्वरं तामन्वगच्छन् । वायसी च तं सुवर्णहारं सर्पकोटरे प्रक्षिप्य सुदूरमवस्थिता ।

राजसैनिकास्तं वृक्षमारुह्य तत्कोटरमवालोकयन् । तत्र कृष्णसर्पो दृष्टः । ते सैनिका लगुडप्रहारेण कृष्णसर्पं हत्वा कनकहारमादाय प्रत्यागच्छन् । तदनन्तरं तत्र वायसदम्पती ससुखं न्यवसताम् ।

(क) को वायसापत्यानि भक्षयति ?

(ख) कृष्णसर्पः कुत्र निवसति ?

(ग) वायसदम्पती दुःखनिवारणार्थं कुत्र गतवन्तौ ?

(घ) राजा कुत्र जलक्रीडां कुर्वन् आसीत् ?

(ङ) वायसी किं प्राप्तवती ?

(च) वायसी कनकहारं कुत्र निहितवती ?

(छ) सैनिकाः कथं कनकहारमलभन्त ?

(ज) अस्याः कथायाः सन्देशः कः ?

**१२. निर्दिष्टानां सूत्राणामाधारेण लघुकथामेकां विरचय्य तस्याः शीर्षकं निर्दिशत**

एकस्मिन् ग्रामे सज्जनः .........., चत्वारः पुत्राः .........., मिथो मनोमालिन्यम् .........., पितुर्वचसो लङ्घनम् .........., सज्जनस्य वृद्धत्वम् .........., उपायस्य प्राप्तिः .........., लघुयष्टिकानामानयनम् .........., सकृदेव तेषां त्रोटनाय प्रत्येकं निर्देशः .........., तदसम्भवः .........., यष्टिकामेकां गृहीत्वा छेत्तुं निर्देशः .........., सरलतया तस्याश्छेदः .........., सङ्घे शक्तिरिति सन्देशः ।

## व्यवहारानुशीलनम्

**१. पाठ्यकथायाः पापबुद्धेर्व्यवहारस्तुभ्यं किमर्थं नारोचत ? सतर्कं प्रस्तुत ।**

२. **स्वस्य स्वभावे के परिवर्तनीया विषयाः सन्ति ? आत्मसमीक्षा विधेया ।**

३. **समुचितमुत्तरं (✓) चिह्नेन अङ्कयत**

**(क) सखा सदैव विद्यालये स्वादिष्टं स्वल्पाहारमानयति चेत् त्वं किं विचारयसि ?**

(अ) चोरयित्वा खादामि ।

(आ) परस्परम् आदाय प्रदाय च खादामि ।

(इ) जीवनाय भोजनं गृह्यते, स्वस्यैव भुनज्मि ।

(ई) भोजनाय जीवनमस्ति, मिष्टमेव भुनज्मि ।

**(ख) कस्यचन मित्रस्य सारल्यमनुभूय किं करोषि ?**

(अ) प्रशंसामि । (आ) वञ्चयामि ।

(इ) मित्रवद् व्यवहरामि । (ई) निन्दामि ।

**(ग) किमपि प्रियं वस्तु स्वायत्तीकर्तुं किं करिष्यसि ?**

(अ) चोरयिष्यामि ।

(आ) याचिष्यामि ।

(इ) सपरिश्रममर्जयिष्यामि ।

(ई) एतन्मम भाग्ये नास्तीति विचार्य तिष्ठामि ।

**(घ) तवानुजोऽन्यस्य वस्तु गृहीत्वा गृहमागतश्चेत् त्वं किं करोषि ?**

(अ) 'धन्यस्त्वम्' इति वदामि ।

(आ) दण्डयामि ।

(इ) तस्य गुप्तये सहयोगं करोमि ।

(ई) प्रत्यावर्तयितुमादिशामि ।

तृतीयः पाठः

# जगज्जननी जानकी

जगज्जननी जानकी नेपालधरायाः सुपुत्री वर्तते। जनकपुरी एतस्या जनिभूः। आदर्शस्त्रिया जानक्या आविर्भावस्य तिरोभावस्य च द्वावपि प्रसङ्गौ रहस्यपूर्णौ स्तः। वस्तुतो जानक्याः पितरौ अज्ञातौ स्तः तथापि जानकीति नाम्ना तस्याः पिता जनकः इति ज्ञायते। जानक्याः जन्मविषये एका कथा प्रसिद्धाऽस्ति। यदा राजर्षिर्जनको यज्ञभूमिं सज्जीकर्तुं भूमिकर्षणं कुर्वन्नासीत्, तदा भूमित एव जानकी प्रादुर्भूता। तदानीं जनकस्तां पोषितपुत्रीरूपेण स्वीकृतवान्। जनको मिथिलाराज्यस्य शासक आसीत्। जानकी जनकस्य ज्येष्ठा पुत्री अभवत्।



राज्ञो जनकस्य प्रासादे पूजाकक्षे शिवधनुरासीत्। अत्यन्तं बलवान् वीरोऽपि तद् धनुरुत्थापयितुं न शक्नोति स्म। एकदा जानकी पूजाकक्षस्य मार्जनाय प्रवृत्ताऽऽसीत्। तदा साऽनायासेन धनुरुत्थाप्य धनुषोऽधो मार्जितवती। प्रासादस्य परिचरास्तज्ज्ञात्वा महदाश्चर्यं गताः। राजा जनकश्च तदजानात्। स्वतनयायामेतादृशी शक्तिरस्तीति विज्ञाय राजा विस्मितः, चिन्तितश्चाभवत्। तादृश्या शक्त्या सम्पन्नायाः

स्वतनयायाः कृते तत्समः सामर्थ्यवान् वरो मिलति न वेति राज्ञश्चिन्ताविषय आसीत् । अत एव स शिवधनुष उत्थापने सामर्थ्यवता राजकुमारेण सहैव जानक्या विवाहं कर्तुमैच्छत् ।

जानक्याः स्वयंवरार्थं राजधान्यां जनकपुर्यां प्रतियोगिता समायोजिता । बह्वः राजकुमारास्तत्र समागताः परन्तु न केऽपि धनुष उत्थापने सामर्थ्यमभजन्त । केवलमयोध्याया राजकुमारेण मर्यादापुरुषोत्तमेन श्रीरामेण शिवधनुरुत्थापितम् । धनुषि प्रत्यञ्चयोजनक्रमे धनुर्भग्नं जातम् । महता उत्सवेन श्रीराम-जानक्योर्विवाहः समजायत । विवाहो मार्गशीर्षस्य शुक्लपञ्चम्यां सम्पन्नः । अतोऽस्मिन् दिने नेपालभारतयोर्विवाहपञ्चमीपर्व भवति । जनकपुरे दिवसेऽस्मिन् विशेषोत्सवः भवति । जानक्या उर्मिला, माण्डवी, श्रुतकीर्तिश्चेति भगिन्य आसन् । तदानीं तासाञ्च विवाहः श्रीरामस्य भ्रातृभिर्लक्ष्मण-भरत-शत्रुघ्नैः सह सम्पन्नः ।

विवाहानन्तरं जानकी श्रीरामेण सह अयोध्यां गतवती । तत्रायोध्यायामपि सा स्वव्यवहारेण सर्वान् प्रसादयामास । राज्ञीं कैकयीं प्रति कृतायाः प्रतिज्ञायाः कारणेन श्रीरामो वनवासार्थं पित्रा आज्ञापितः । पितुः दशरथस्य आज्ञानुसारेण चतुर्दश वर्षाणि यावद् वनावासो रामस्य कृते निर्दिष्ट आसीत् । जानकी पतिव्रता आसीत् । अतः सलक्ष्मणा सा श्रीरामं समनुगतवती । श्रीरामजानक्योर्मिथः परा प्रीतिरासीत् । ऋषेरत्रेराश्रमे स्थितिकालेऽपि जानकी अत्रिपत्न्या अनसूयायाः सकाशात् पातिव्रत्यधर्मस्य शिक्षां गृहीतवती आसीत् ।

वनवासकाले रावणस्य भगिनी शूर्पणखा रामस्य पार्श्वे आगच्छत् । यूनोः श्रीरामलक्ष्मणयोः सौन्दर्येण मोहिता सा विवाहार्थं प्रस्तावं कृतवती परन्तु तयोर्मध्ये केनापि स प्रस्तावो न स्वीकृतः । अतः जानकीमाक्रमितुं प्रवृत्तायाः तस्या लक्ष्मणेन प्रतिकारः कृतः । लक्ष्मणस्य प्रहारेण आहता शूर्पणखा भ्रातरं रावणं सर्वं वृत्तान्तं न्यवेदयत् । स्वभगिन्याः प्रतिशोधं ग्रहीतुमेव रावणो योजनां कृत्वा जानकीमहरत् ।

लङ्कायामशोकवाटिकायां रावणेन स्थापिता जानकी केवलं श्रीरामं स्मारं स्मारं दिनानि यापयति स्म । 'मामन्विषन् श्रीराम एकदा अवश्यं समायास्यति' जानक्या मनसि दृढो विश्वास आसीत् । अन्वेषणाय हनुमतस्तत्र गमनानन्तरन्तु सा ततोऽपि भृशमाश्वस्ता जाता । समुद्रे सेतुबन्धं कृत्वा लङ्कां प्राप्तेन रामसैन्येन सह रावणादीनां तुमुलं युद्धमभवत् । मेघनादः, कुम्भकर्णः, रावणः इत्यादयः सर्वे दुष्टाः युद्धे निहताः । श्रीरामेण सह जानक्याः पुनर्मेलः सञ्जातः । सा भर्त्रा श्रीरामेण सह पुष्पकविमानेनायोध्यां प्राप्नोत् ।

लोकापवादहेतुना रामेण परित्यक्ता जानकी पुनर्वनमगच्छत् । गर्भवती जानकी महर्षेर्वाल्मीकेराश्रमं सम्प्राप्य तदाश्रये एव न्यवसत् । तत्र सा लवं कुशञ्चाजनयत् । अश्वमेधयज्ञार्थं श्रीरामेण मुक्तमश्वं गृहीतवन्तौ तौ जानक्या आदेशेनैव तं त्यक्तवन्तौ । पश्चात् श्रीरामः राजप्रासादे लवकुशाभ्यां वाल्मीकिलिखितां रामायणकथां श्रुत्वा भावविह्वलः सन् जानकीमन्वेष्टुमधावत् । वाल्मीकेराश्रमं प्राप्य जानकीमयोध्यां प्रत्यागन्तुं रामोऽकथयत् परन्तु तत्र सा पृथिवीमातुः आश्रये विलीनाऽभवत् । एवं पृथिवीत एव समुद्भूतायाः जानक्याः जीवनकथा पृथिव्यामेव समाहिता अभवत् ।



जानकी धैर्यस्य, संयमस्य, सहनशीलतायाश्च प्रतिमूर्तिरासीत् । असौ त्यागस्य, सद्भावस्य, निष्कपटतायाश्च उत्कृष्टमुदाहरणं वर्तते । जानकी आदर्शपत्नी, आदर्शमाता, आदर्शभगिनी, आदर्शपुत्री, आदर्शराज्ञी, आदर्शस्त्री चास्ति । स्वस्या आदर्शचरित्रेण सा सर्वासां स्त्रीणां प्रेरणास्रोतस्त्वं भजते । एतादृशी सद्गुणसम्पन्ना जानकी जगज्जननीरूपेणास्तिकैर्जनैः सङ्कीर्त्यते, पूज्यते च ।

## शिक्षणालोकः

अस्य पाठस्याध्यापनेन छात्रा जानक्या आदर्शमयस्य जीवनस्य विषये ज्ञापनीयाः । स्वदेशस्यान्यदेशानाञ्च आदर्शचरित्राणां विषयेऽध्ययनेन तेषामनुकरणीयानां गुणानां स्वव्यवहारे परिपालनाय च ते समुत्प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **सङ्क्षेपेणोत्तरयत**

(क) कौ प्रसङ्गौ रहस्यपूर्णौ स्तः ?

(ख) जानकीति नाम्ना किं ज्ञायते ?

(ग) जनकः कुत्रत्यः शासक आसीत् ?

(घ) कदा भूमितो जानकी प्रादुर्भूता ?

(ङ) जगज्जननी जानकी कस्याः सुपुत्री ?

(च) श्रीरामेण घोटकः किमर्थं मुक्त आसीत् ?

(छ) जानकी जनकस्य कतमा पुत्री अभवत् ?

(ज) लवकुशौ कस्याः आदेशेन घोटकमत्यजताम् ?

(झ) जानकी आश्रमं प्राप्य कस्याश्रये न्यवसत् ?

२. **अधः प्रदत्तानि कथनानि पाठाधारेण संशोध्य लिखत**

(क) श्रीरामो गुप्तवासार्थं पित्राऽऽज्ञापितः ।

(ख) राजा विस्मितः, निश्चिन्तश्चाभवत् ।

(ग) स्वयंवरार्थं बहवः राजानस्तत्र समागताः ।

(घ) विवाहो मार्गशीर्षस्य शुक्लनवम्यां सम्पन्नः ।

(ङ) विलम्बेन श्रीराम-जानक्योर्विवाहः सम्पन्नः ।

(च) एकदा जानकी पाकशालाया मार्जनाय प्रवृत्ता ।

(छ) माण्डव्याः स्वयंवरार्थं प्रतियोगिता समायोजिता ।

(ज) अतीव बलवान् वीरस्तु तद् धनुरुत्थापयति स्म ।

(झ) राज्ञो जनकस्य प्रासादे शयनकक्षे शिवधनुरासीत् ।

(ञ) जानक्या भगिन्यः रसिला, माण्डवी, श्रुतकीर्तिश्चासन् ।

३. **पाठस्यान्तिममनुच्छेदं पठित्वा जानक्या गुणान् निर्दिशत ।**

## ४. पाठाधारेण रिक्तस्थानं पूरयत

(क) ............ पतिव्रता आसीत् ।

(ख) ............ मिथः परा प्रीतिरासीत् ।

(ग) ............ जानकी श्रीरामं समनुगता ।

(घ) शूर्पणखा विवाहार्थं ............ कृतवती ।

(ङ) शूर्पणखा लक्ष्मणस्य ............ आहता ।

(च) रावणो योजनां कृत्वा ............ अहरत् ।

(छ) शूर्पणखा भ्रातरं ............ सर्वं वृत्तान्तं न्यवेदयत् ।

(ज) जानकी अनुसूयायाः सकाशात् ............ शिक्षां गृहीतवती ।

## ६. पाठस्य तृतीयस्यानुच्छेदस्य शुद्धवाचनं कृत्वा तद्वर्णितविषयान् सूत्रीकुरुत ।

## ७. पदानि प्रयुज्य नैतिकवाक्यानि रचयत

धैर्यस्य, त्यागस्य, आदर्शमाता, प्रेरणा, सद्गुणाः, आस्तिकाः, प्रतिमूर्तिः, पूजाकक्षे, एकदा, उदाहरणम्, जगज्जननी, तदा, आदर्शभगिनी, परिचराः, आदर्शपुत्री, तनया, अतीव ।

## ८. विलोमपदानि परस्परं मेलयत

| 'अ' समूहः | 'आ' समूहः |
|---|---|
| प्रसन्ना | गृहे |
| प्रेम | स्वीकारः |
| पतिव्रता | सज्जनाः |
| वने | घृणा |
| प्रतिकारः | व्यभिचारिणी |
| दुष्टाः | खिन्ना |

## ९. प्रदत्तं पाठं पठित्वा प्रश्नानुत्तरयत

पुरा क्वचिद् ग्रामे सुरेशनामा मनुष्यो वसति स्म । दिनेशस्तस्य मित्रमासीत् । सुरेशो दरिद्र आसीत्, दिनेशस्तु धनिकः । विदेशाद् वस्तूनि आनीय विक्रयणं दिनेशस्य व्यवसाय आसीत् । एकदा सुरेशोऽपि

व्यापारस्य विचारमकरोत् । स सहैव व्यापारं कर्तुं दिनेशं प्रति प्रस्तावमकरोत् । तत्प्रस्तावं दिनेशः स्वीकृतवान् । तौ व्यापारार्थं वस्तूनि क्रेतुं विदेशं प्रति गच्छन्तौ आस्ताम् । मार्गे दिनेशस्य पार्श्वेऽधिकं धनं दृष्ट्वा सुरेशस्य मनसि अपराधभावना समुत्पन्ना । स दिनेशमपृच्छत्– 'मित्र ! धर्मः महान्, पापं वा महत् ?' धार्मिको दिनेशोऽवदत्– 'निश्चयेन धर्म एव महान् ।'

सुरेशस्तं प्रति उवाच– 'त्वं भ्रान्तो वर्तसे । दुःखं विना धर्मः किमपि न ददाति, परन्तु पापं सर्वत्र फलति । तस्मिन् विषये तयोर्मध्ये विवादो वर्धितः । अन्ते ते तस्मिन् विषये समयं स्थापितवन्तः- 'यः जयति, पराजितस्य धनं तस्यैव भविष्यति ।'

तदानीमेव मार्गे कश्चन जनो मिलति । स पापस्य पक्षपाती आसीत् । प्रश्नं श्रुत्वा स प्रत्युवाच- मम मते तु पापमेव महदस्ति । यतो हि पापं सुकरम्, शीघ्रं धनसम्पादकञ्च भवति ।

दिनेशः पराजितोऽभवत् । यद्यपि सुरेशस्तस्य सर्वं धनं गृहीतवान् तथापि दिनेशो धर्मस्य पक्षं न त्यक्तवान् । धनस्य प्राप्त्या सुरेशस्ततोऽपि धनलुब्धो जातः । धनलोभेन स चौर्यकार्ये प्रवृत्तोऽभवत् । धनस्य कृते तेन कदाचिद् रात्रौ कश्चन धनिको व्यापादितः । तदानीं स राजपुरुषैर्गृहीतः । दण्डरूपेण तस्य आजीवनं कारागारवासोऽभवत् । अपरत्र दिनेशस्तु पुनः परिश्रमेण व्यापारं कृत्वा धनिकोऽभवत् । इदं सत्यमेवोक्तं वर्तते मनीषिभिः-

**सुखमास्वाद्यते धर्मादधर्मात्तद्विपर्ययम् ।**

**एतज्ज्ञात्वा च बुद्ध्वा च धर्मं चरति सज्जनः ॥**

**(अ) एकपदेन प्रश्नानुत्तरयत**

(क) कः पराजितोऽभवत् ?

(ख) सुरेशस्य मित्रस्य नाम किम् ?

(ग) दिनेशः कस्य पक्षं न त्यक्तवान् ?

(घ) दिनेशस्य पार्श्वे कियद् धनमासीत् ?

(ङ) केन सुरेशः चौर्यकार्ये प्रवृत्तः अभवत् ?

(च) कस्य आजीवनं कारागारवासः अभवत् ?

(छ) कस्य मनसि अपराधभावना समुत्पन्ना ?

**(आ) पूर्णवाक्येनोत्तरयत**

(क) समयं किम् ?

(ख) दिनेशस्य को व्यवसाय आसीत् ?

(ग) दिनेशः पुनः कथं धनिकोऽभवत् ?

(घ) सुरेशो दिनेशं प्रति किमर्थं प्रस्तावमकरोत् ?

(ङ) अनुच्छेदान्तर्गतस्य पद्यस्य भावं प्रकाशयत ।

१०. जानकी आदर्शनारी अस्तीति विषये तर्कान् प्रस्तुत ।

११. जानक्या गुणानां लेखनेन तालिकां निर्माय भित्तौ संश्लेषयत ।

१२. जनकपुर्या जानकीमन्दिरस्य विषये अन्विष्यानुच्छेदमेकं लिखत ।

१३. जानक्या जीवने आपतितानां समस्यानां विषये कक्षायां विमृशत ।

१४. स्वसमाजस्य काञ्चन नारीमाधृत्य आदर्शनार्याः शोभनानां गुणानां सूचीं निर्मात ।

## व्यवहारानुशीलनम्

१. 'स्वस्मिन् मानवता वर्तते' इति त्वं कथं प्रमाणयसि ? काञ्चन घटनामाधृत्य प्रमाणयत ।

२. रामायणस्य पात्रेषु कस्तुभ्यमत्यन्तं रोचते ? किं त्वयि तद्गुणाः सन्ति ? सन्ति चेत् स्वव्यवहारेण तद्गुणानां सामञ्जस्यं विधत्त ।

३. त्वं पितृशोकेन शोचता सख्या सह मेलनाय गतोऽसि ? तत्र त्वं सखायं किं कथयसि ? येन सखा धैर्यं धारयितुं समर्थो भवेत् ।

४. समुचितमुत्तरं (✓) चिह्नेन दर्शयत

**(क) गृहे कश्चन भिक्षुरागच्छति चेत् किं कुरुषे ?**

(अ) सप्रणामं भिक्षां ददामि ।

(आ) तेन सह विवादं करोमि ।

(इ) किमर्थं समागत इति सरोषं पृच्छामि ।

(ई) इतः शीघ्रं गमनाय कथयामि ।

**(ख) पाठं पठित्वा जानक्या विषये किं ज्ञानं भवति ?**

(अ) तस्या विषये अन्यान् बोधयामि ।

(आ) स्वस्मिन् सद्गुणानाधातुं प्रयते ।

(इ) जानक्याः सद्गुणानां प्रशंसां करोमि ।

(ई) तद्विषये ज्ञात्वा प्रसीदामि ।

**(ग) कतमं बलं समुत्कृष्टं मनुष्ये ?**

(अ) धनबलम् ।

(आ) बुद्धिबलम् ।

(इ) मनोबलम् ।

(ई) चरित्रबलम् ।

**(घ) यात्रायां मार्गे सहसा धनपोटलिका मिलति चेत् किं करोषि ?**

(अ) अविगणय्य अग्रे गच्छामि ।

(आ) गुप्तरीत्या स्यूते स्थापयामि ।

(इ) नीत्वा अवकरभाण्डे क्षिपामि ।

(ई) कस्यास्तीति अन्विष्य दातुं प्रयते ।

## परियोजना

१. स्वस्य बान्धवानाञ्च परिवारेभ्यः पञ्च महिलाः चित्वा आदर्शनारीविषये तासां विचारान् सङ्कलयत ।

२. नैकभाषासु विद्यमानानां रामायणग्रन्थानां विषयेऽन्विष्य तेषां रचयितृसंहितां सूचीं निर्माय एकैकं वैशिष्ट्यञ्च लिखत ।

चतुर्थः पाठः

# सहकार्यम्

वयं सामाजिकाः प्राणिनः स्मः । अस्माकं जनिः समाजेऽभूत् । अन्येषां मनुष्याणां सङ्गे तत्रैव वयं जीवन्तः स्मः । अस्मन्मृत्युकालेऽपि समाजस्यैवावश्यकता आपतति । समाजं विहाय एकाकिनं मानवजीवनं सुकरं नैव जायते । अस्माकं शरीरे हस्तपादादीनि विविधान्यङ्गानि सन्ति । वयं नेत्राभ्यां पश्यामः, कर्णाभ्यां शृणुमः, पादाभ्यां चलामः, हस्ताभ्यां कार्यं कुर्मः, नासिकया जिघ्रामः, जिह्वया स्वादं स्वीकुर्मः, दन्तैश्चर्वणं कुर्मः, मुखेन खादामः, पिबामः, वदामश्च । एतेषामेवाङ्गानां मेलनेन शरीरस्य निर्माणं भवति । यथाऽङ्गानां सहकार्येणैव शरीरं सर्वाणि कार्याणि सम्पादयितुं समर्थं भवति, तथैव समाजस्य सुव्यवस्थायै तत्रस्थानां मनुष्याणां सहकार्यं नितरामपेक्षितं भवति ।

जगतोऽस्य सञ्चालनाय ब्रह्माण्डदीपको दिनकरः प्रतिदिनमुदेति, अस्तञ्च गच्छति, लतावृक्षादयो वनस्पतयः प्राणवायुं सञ्चारयन्ति, नदीतडागादीनि जलस्रोतांसि पयोरूपममृतं प्रददति, शस्यशालिनी धरित्री अस्मान् धारयति, अन्नं चोत्पादयति, अन्नोत्पादनाय जलधरो मेघो वर्षति । एवमेव समेषां पक्षाणां सहकार्येण भुवनमिदं व्यवस्थितं वर्तते ।



यत् कार्यं सहैव क्रियते तत् सहकार्यम्। अनया परिभाषयाऽवबुध्यते- 'अनेकेषां मेलनेन कार्यकरणे सहकार्यं जायते।' सहकार्यार्थं समानोद्देश्यकाङ्क्षिणामनेकेषां पक्षाणामावश्यकता भवति। अतः समानप्रकृतिकानामेकलक्ष्ययुतानां सहकार्यं सम्भवति। पिपीलिकाः प्रकृत्या लघुदेहवत्यो भवन्ति। पांसुसञ्चयेन ते मृत्तिकास्तूपस्य निर्माणं कुर्वन्ति। सहकार्यमेवास्ति तत्र कारणम्, न बलसामर्थ्यम्। सहकार्येण कार्यं सम्पाद्यते चेत् साफल्यमधिगम्यते। तस्य कृते परस्परं मिलित्वा समानोद्देश्येन कर्मणि तथा प्रवर्तितव्यम्, यथा सफलता प्राप्येत। सहकार्यार्थं मिथो विमर्शनपूर्वकं कार्यं करणीयम्, अन्येषामस्तित्वं स्वीकर्तव्यम्, सर्वेषु प्राणिषु प्रेम्णा व्यवहारः कर्तव्यः, परेषां योगदानस्य विचारस्य चावमानं नैव विधेयम्। स्वार्थं विहाय सर्वहितं च चिन्तनीयम्।

मानवजीवनं परस्परं सहकार्ये एवाऽऽश्रितं भवति। पतिपत्न्योः सहकार्येण गृहं सुगृहं जायते। समुदायस्थानां सर्वेषां जनानां सहकार्येण सुसमाजः सिद्ध्यति। राज्ञः प्रजानाञ्च सहकार्येण राष्ट्रं सुराष्ट्रं भवति। विश्वेषां राष्ट्राणां सहकार्येण विश्वबन्धुत्वं जायते, विश्वशान्तिश्च प्रसरति। अस्मत्पूर्वजा महर्षयः सर्वदैव शान्तिं सहकार्यं भ्रातृत्वञ्च कामयन्ते स्म। 'अयं मम, स परः' इत्येवं भावं परित्यज्य निखिलैव वसुधा बन्धुत्वेन स्वीकरणीयेति तेषां सन्देशो विद्यते।

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

उपनिषदादिषु सहकार्यस्य वन्दना विहिताऽस्ति - 'ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै, तेजस्विनावधीतमस्तु मा विद्विषावहै।', 'ॐ सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्' इत्यादयः।

सहकार्यस्य कृते विश्वबन्धुत्वमावश्यकं भवति। पुरो दृश्यमानस्य विश्वस्य स्रष्टा ईश्वर एक एव। सर्वे प्राणिनस्तस्य सन्ततयः। संसारस्य यत्र कुत्रापि स्थिताः सर्वे जना विविधान् वर्ण-रूप-भाषा-संस्कृतिभेदान् धारयन्तोऽपि अभिन्ना एव विद्यन्ते, यतो हि तेषां समेषां मूलप्रवृत्तयः समानाः सन्ति। यथा कोऽपि जनः सम्माने सुखमनुभवति चेदपमाने दुःखम्, तथैवान्योऽपि। विश्वबन्धुत्वभावयुतो जनः सर्वान् स्निह्यति, कमपि न पीडयति, सर्वेषु प्राणिषु समानं व्यवहरति। यतो हि समव्यवहारेणैव सहकार्यं सम्भवति।

जनाः सत्ययुगे मन्त्रान् प्रयुज्य शक्तिमर्जयन्ति स्म। तथैव त्रेतायां तन्त्रसाधने, द्वापरे च व्यूहरचनायां शक्तिरासीत्। परन्तु साम्प्रतं कलौ युगे शक्तिः सङ्घाश्रिता विद्यत इत्युक्तमस्ति - सङ्घे शक्तिः कलौ युगे' इति। सङ्घार्थं सहकार्यस्यावश्यकता भवति। बहवो जनाः सङ्घटिता भवन्ति चेत् महान्त्यपि कार्याणि साधयितुमर्हन्ति। कष्टसाध्यानि कार्याणि बहुभिर्जनैरेव पूर्णानि भवन्ति, न तु जनेनैकेन। वयमेकीभूय सामूहिकरूपेण कार्याणि कुर्मश्चेत् तानि कठिनान्यपि कर्माणि सम्पादयितुं समर्था भवामः। तृणानि शक्तिरहितानि सन्ति। तैस्तृणैः निर्मितया रज्ज्वा बलशालिनो मतङ्गजा अपि बध्यन्ते। अल्पानामपि वस्तूनां संहत्या महत्कार्यं सम्भवति। विविधैः मुद्रितपत्रैः बृहदाकारं पुस्तकं निर्मीयते। अनेकानां पुष्पाणां गुम्फनेन मनोहारिणी माला सम्पद्यते। पर्णैः, पुष्पैः, फलैः, शाखाभिश्च वृक्षः शोभते। तन्तुभिर्वस्त्रनिर्माणं भवति। पञ्चभिरङ्गुलीभिः मुष्टिर्जायते। बहूनामराणां संयोगेन चक्रं निर्मीयते। अनेकाभिरिष्टकाभिर्गृहनिर्माणं

भवति । अनेकैर्जलबिन्दुभिः क्रमेण घटः पूर्यते । अतः सहकार्यार्थं सम्बद्धपक्षाणां कायेन वाचा मनसा चैकताऽपरिहार्या भवति ।

सहकार्येण समस्यायाः समाधानाय सामर्थ्यं जायते, आवश्यकतायाः परिपूरणं च भवति । सहकार्येण पारस्परिकं महत्त्वमवबुध्यते । अन्येषां योगदानस्य सम्मानं विधीयते । परेषामस्तित्वस्य बोधश्च भवति । स्नेहभावेन सहकार्ये सञ्जाते सर्वेषु सकारात्मको भावो जागर्ति । परहितस्य चिन्तनं मनसि जायते । विश्वबन्धुत्वं च जगति प्रसरति । तेन विश्वस्मिन् संसारे शान्तिर्भवति । यदि वयं सर्वे स्वार्थं विहाय सर्वजनहिताय कृतसङ्कल्पा भवेम, तर्हि सहकार्यं सम्भवति । संसारेऽसम्भवं न किमप्युपपद्यते । उक्तं च- 'शक्तिधीः सहकारिणी' इति ।

## शिक्षणालोकः

अस्य पाठस्य शिक्षणक्रमे सहकार्येण सफलतामधिगतवतामनेकेषां जनानामनेकेषां प्राणिनां चोदाहरणानि प्रस्तूय विद्यार्थिनः सहकार्यार्थं प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. पाठस्थानानुच्छेदान् सार्थबोधं क्रमेण वाचयत ।

२. पाठस्य प्रथममनुच्छेदं पठित्वा तस्याशयं प्रकटयत ।

३. पाठस्य सारांशं कथयत ।

४. परस्परं विशेष्य-विशेषणयोर्मेलनं विधाय विशेषणां नैतिकमाशयं प्रस्तुत

| | |
|---|---|
| प्राणिनः | शक्तिहीनानि |
| सूर्यः | सकारात्मकः |
| पृथिवी | मनोहारिणी |
| मेघः | बलशालिनः |
| भावः | देहदाहकः |
| एकता | जलधरः |
| माला | शस्यशालिनी |
| हस्तिनः | अपरिहार्या |
| तृणानि | ब्रह्माण्डदीपकः |
| | सामाजिकाः |

५. शिक्षकस्य साहाय्येन सान्वयमर्थं विमृशत

(क) अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

(ख) कृते मन्त्रप्रयोगे वा त्रेतायां तन्त्रसाधने ।
द्वापरे व्यूहरचने सङ्घे शक्तिः कलौ युगे ॥

## ६. पाठाधारेण समुत्तरयत

(क) शरीरं सर्वाणि कार्याणि सम्पादयितुं कथं समर्थं जायते ?

(ख) पृथिवी किं करोति ?

(ग) पिपीलिकाभिर्मृत्तिकास्तूपनिर्माणस्य कारणं किम् ?

(घ) सहकार्यार्थं किमवमन्तव्यम् ?

(ङ) विश्वशान्तिः कथं प्रसरति ?

(च) अस्मत्पूर्वजाः किं कामयन्ते स्म ?

(छ) केषां मूलप्रवृत्तयः समानाः सन्ति ?

(ज) सम्प्रति शक्तिः कुत्र विद्यते ?

## ७. अधः प्रदत्तानि पदानि प्रयुज्य प्रतिपदं नीतिवाक्यमेकं रचयत

सह, मिथः, प्रेम्णा, विधीयते, कर्तव्यम्, सहयोगेन, सम्भवति, विहाय, लक्ष्यम् ।

## ८. पाठमाधृत्य सत्यासत्यविवेको विधेयः

(क) अस्माकं कृते समाजो नावश्यकः ।

(ख) एकाकिनं मानवजीवनं नैव सुकरम् ।

(ग) नदी वर्षति ।

(घ) सहकार्येण परस्परं वैमनस्यं जायते ।

(ङ) परहितस्य चिन्तनं विधेयम् ।

(च) सहकार्यार्थं समव्यवहारो नैव करणीयः ।

(छ) सहकार्येण दुर्भाव उत्पद्यते ।

## ९. सहकार्यमावश्यकं न वेति विषये कक्षायां विमर्शो विधीयताम् ।

## १०. सहकार्येण को लाभः ? पाठमाधृत्य लिखत ।

## ११. अनेकतायामैक्यम् : अस्माकं राष्ट्रगौरवम् इत्यस्मिन् स्वतर्कान् प्रस्तूयानुच्छेदमेकं रचयत ।

## १२. प्रदत्तकथांशस्य सन्देशं प्रस्तूय शीर्षकचयनं विधत्त ।

कश्चनान्धो युवकस्तीर्थाटनं कर्तुमिच्छति स्म । विषयेऽस्मिन् तस्य परिवारस्य अनुमतिर्नासीत् । एकत्र कष्टसाध्यः प्रवासः, अपरत्र च स दृष्टिहीनः । तथापि स दृढं निश्चित्य निर्गतवान् । नगराद् बहिरागतः स परितो जनानां ध्वनिं श्रुत्वा उच्चैः पृष्टवान्- 'भवत्सु कोऽपि कृपया तीर्थमार्गं दर्शयितुं शक्नोति ?' वृक्षस्याध उपविष्टः कश्चिदवदत् - 'अहं जानामि तीर्थमार्गम्, मयाऽपि तीर्थयात्रा करणीयाऽस्ति, परमहं तु खञ्जः ।' दृष्टिहीनोऽवदत्- 'आगच्छतु, परस्परं साहाय्येन आवां तीर्थयात्रां करवाव, भवान् मम नेत्रे भवतु, अहं भवतः पादौ भवामि । उपविशतु मम पृष्ठे' इति । मिथः साहाय्येन तीर्थयात्रायां प्रवृत्तौ तौ लक्ष्यं सम्पूर्य तीर्थभ्रमणं कृत्वा प्रत्यागतवन्तौ ।

## १३. अधस्तनमनुच्छेदं पठित्वा सङ्क्षेपेण प्रश्नानुत्तरयत ।

परेषामुपकारः परोपकारः । समाजे मानवो मनसा वाचा कर्मणा वा परार्थं यत् किञ्चित् सम्पादयति । परेषां हितमनुतिष्ठति । तत् सर्वं परोपकारोऽभिधीयते । अस्माभिः प्रकृतिर्विलोक्यते चेत् सर्वत्र सततं परोपकार एवानुभूयते । भानुर्जगदिदं द्योतयति, विधुर्भुवनमिदमाह्लादयति, वायुः प्राणान् सञ्चारयति । अनलः शैत्यादिकं वारयति । वनस्पतयश्च स्वार्थं विहाय परार्थे प्रवर्तन्ते । शास्त्रेषु परोपकारः सर्वथा प्रशस्यो लभ्यते । 'परोपकारः पुण्याय पापाय परपीडनम्' इत्युदीरयन् परोपकारः पुण्यसाधनत्वेन समादृतोऽस्ति । परोपकारस्य भावनयैव महर्षिर्दधीचिर्देवतानां हिताय स्वीयमस्थिजातं प्रादात् । महाराजः शिविः कपोतरक्षणाय स्वमांसं श्येनाय प्रायच्छत् । परोपकारेणैव विश्वबन्धुता समाजसेवित्वं च सिद्ध्यति ।

(क) परोपकारः कः ?

(ख) भानुः कथमुपकरोति ?

(ग) परोपकारः कस्य साधनम् ?

(घ) दधीचिः किमर्थं किमदात् ?

(ङ) विश्वबन्धुत्वं केन सिद्ध्यति ?

(च) प्रकृतिप्रत्ययौ विभजत - प्रशस्यः ।

(छ) सन्धिविच्छेदं कुरुत - परोपकारः, भावनयैव ।

(ज) 'विहाय' इति पदं प्रयुज्य वाक्यमेकं रचयत ।

## १४. अधोनिर्दिष्टां लघुकथां पठित्वा प्रश्नानामुत्तराणि देयानि ।

# संहतिः कार्यसाधिका

कश्मिँश्चित् स्थाने एको विशालः शाल्मलितरुरासीत् । नानादेशेभ्य आगत्य पक्षिणो रात्रौ तत्र निवसन्ति स्म । एकदा प्रातः कश्चिद् व्याधो जालमादाय विहगानन्वेष्टुमितस्ततः परिभ्रमन् तत्राऽऽगच्छत् । ततः स तण्डुलकणान् विकीर्य जालञ्च प्रसार्य स्वयं वृक्षस्य पृष्ठभागे प्रच्छन्नो भूत्वाऽतिष्ठत् । एतस्मिन्नन्तराले कश्चित् कपोतराजश्च सपरिवारस्तत्राऽऽगच्छत् । विकीर्णान् तण्डुलकणान् दृष्ट्वा लुब्धाननुयायिनः कपोतान् प्रति सम्बोध्य कपोतराजोऽवदत् - 'कुतोऽस्मिन् निर्जने वने तण्डुलानां सम्भवः ? इदं कल्याणकारकं न, अनेन तण्डुलकणलोभेनास्माकं महदनिष्टमपि भवितुं शक्नोति ।'

एतच्छ्रुत्वा कपोतेषु कश्चित् पण्डितम्मन्यः दुर्बुद्धिः सदर्पमवदत्- 'अहो ! भूतलेऽस्मिन् सर्वमन्नपानादिकं शङ्काभिराक्रान्तमेवास्ति । संशयात्मा विनश्यति, अति सर्वत्र वर्जयेत् इति विचार्य अस्माभिरत्र शङ्का न कर्तव्या ।' लुब्धास्ते कपोतास्तण्डुलेषु अपतन्, जालबद्धाश्चाभवन् । ततः सर्वे कपोताः पण्डितम्मन्यं तं भृशमाक्रोशन्- 'भो दुर्मते ! त्वयैव वयमस्मिन् जाले पातिताः । तदनन्तरं कपोतराजस्तानकथयत्- 'भो नायमस्य दोषः, विपत्काले धैर्यत्यागः कापुरुषस्य लक्षणमस्ति, इदानीं वयं संहत्य धैर्येण चिन्तयाम, संहत्यै च मतैक्यमावश्यकं भवति, संहताः सर्वे जालमादायैव मूषकराजस्य पार्श्वे गच्छाम, स मम सुहृदेतान् पाशान् छेत्स्यति । तदैव तस्य वचनानि श्रुत्वा सर्वे कपोताः संहताः सन्तो जालं गृहीत्वा उदपतन् । स व्याधस्तान् जालापहारकान् कपोतान् दृष्ट्वा पश्चाद् धावन् अचिन्तयत्- 'यदा एते विवदिष्यन्ति, तदा मम वशमेष्यन्ति । परं कपोतेषु दूरमतिक्रान्तेषु सत्सु व्याधो न्यवर्तत । मूषकेण छिन्नपाशाः कपोताः कृतज्ञतया तं प्रशंसन् स्वस्थानमगच्छन् । उक्तं चास्ति-

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥**

(क) पक्षिणो रात्रौ कुत्र निवसन्ति स्म ?

(ख) प्रातःकाले को जालमादाय आगच्छत् ?

(ग) कस्तण्डुलकणान् विकीर्णवान् ?

(घ) तण्डुलकणानवलोक्य कपोताः कीदृशा अभवन् ?

(ङ) भूतले शङ्काभिः किमाक्रान्तमस्ति ?

(च) विपत्तिकाले किं करणीयम् ?

(छ) कपोताः किमर्थं मूषकराजस्य पार्श्वे गतवन्तः ?

(ज) जालापहारकान् कपोतान् प्रति व्याधः किमचिन्तयत् ?

(झ) केषां संहतिः कार्यसाधिका ?

(ञ) गुणत्वमापन्नैस्तृणैः के बध्यन्ते ?

१५. स्वस्य समाजे सहकार्येण विहितं किमपि कार्यं कक्षायां श्रावयत ।

१६. सामूहिकरूपेण विहितं कार्यं कथं सरलं जायते ? स्वानुभवं प्रकटयत ।

## व्यवहारानुशीलनम्

१. सखिभिः सह मिलित्वा त्वया कानि कार्याणि विधातुं शक्यन्ते ? सूचीनिर्माणं कुरुत ।

२. तव समाजे सहकार्येण किमपि विकासकार्यं जायमानं वर्तते चेत् तत्र तव कर्तव्यं किं भवेत् ?

३. दुःखे सहकार्यं सुखे च स्वार्थं वाञ्छन्तं स्वजनं प्रति त्वं किं कथयसि ?

४. समुचितमुत्तरं (✓) चिह्नेन दर्शयत

| कार्यम् | एकाकी करोमि । | सखिभिः सह करोमि । |
|---|---|---|
| (क) गृहाद् विद्यालयगमनम् । | | |
| (ख) विद्यालये स्वल्पाहारग्रहणम् । | | |
| (ग) कक्षायामुपवेशनम् । | | |
| (घ) विद्यालये खेलनम् । | | |
| (ङ) आपणगमनम् । | | |
| (च) भ्रमणम् । | | |
| (छ) ग्रामे क्रीडनम् । | | |

पञ्चमः पाठः

# दानं हि सर्वव्यसनानि हन्ति



दानेन भूतानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति ॥१॥

देयं भो ह्यधने धनं सुकृतिभिर्नो सञ्चितं सर्वदा
श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता ।
आश्चर्यं मधु दानभोगरहितं नष्टं चिरात्सञ्चितं
निर्वेदादिति पाणिपादयुगलं घर्षन्त्यहो मक्षिकाः ॥२॥

दानेन श्लाघ्यतां यान्ति पशुपाषाणपादपाः ।
दानमेव गुणः श्लाघ्यः किमन्यैर्गुणकोटिभिः ॥३॥

ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न यच्छसि ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ? ॥४॥

मीयतां कथमभीप्सितमेषां दीयतां द्रुतमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः ॥५॥

**१**
**पदच्छेदः**

दानेन, भूतानि, वशीभवन्ति, दानेन, वैराणि, अपि, यान्ति, नाशम्, परः, अपि, बन्धुत्वम्, उपैति, दानैः, दानम्, हि, सर्वव्यसनानि, हन्ति ।

**अन्वयः**

दानेन भूतानि वशीभवन्ति, दानेन वैराणि अपि नाशं यान्ति । परः अपि दानैः बन्धुत्वम् एति । दानं हि सर्वव्यवसनानि हन्ति ।

**सरलार्थः**

दानं प्रशंनीयो गुणो वर्तते । यो दानं कुरुते, सर्वे प्राणिनस्तस्य वशवर्तिनो भवन्ति । दानशीलस्य जनस्य वैरिणोऽपि न भवन्ति । दानात् परोऽपि जनो बन्धुरिव हितकरो भवति । दानस्य कारणेन सर्वाण्यपि दुःखानि नश्यन्ति ।



**२**
**पदच्छेदः**

देयम्, भो, हि, अधने, धनम्, सुकृतिभिः, नो सञ्चितम्, सर्वदा, श्रीकर्णस्य, बलेः, च, विक्रमपतेः, अद्य, अपि, कीर्तिः, स्थिता, आश्चर्यम्, मधु, दानभोगरहितम्, नष्टम्, चिरात्, सञ्चितम्, निर्वेदाद्, इति, पाणिपादयुगलम्, घर्षन्ति, अहो, मक्षिकाः ।

**अन्वयः**

भो ! सुकृतिभिः अधने धनं देयम्, सर्वदा सञ्चितं नो (कार्यम्) । (दानस्य कारणेन) श्रीकर्णस्य, बलेः, विक्रमपतेः च कीर्तिः अद्यापि स्थिता । अहो आश्चर्यम् ! दानभोगरहितं चिरात् सञ्चितं मधु नष्टम् इति निर्वेदाद् मक्षिकाः पाणिपादयुगलं घर्षन्ति ।

**सरलार्थः**

बुद्धिमान् जनो धनं निर्धनेभ्यो दद्यात्, धनस्य सञ्चयं न विदध्यात् । ये दानशीलाः सन्ति ते एव संसारे

कीर्तिमन्तो भवन्ति । कर्णः, बलिः, विक्रमश्चेत्यादयो जना दानस्यैव कारणेनाद्यापि कीर्तिमन्तो वर्तन्ते । मक्षिका मधुनः सञ्चयं कुर्वन्ति, तस्य उपभोगं दानं वा न कुर्वन्ति । किन्तु चिरात् सञ्चितं तेषां मधु अन्यैरपह्रियते, अतस्तन्नष्टं भवति । चिरात् सञ्चितं मधु विनष्टं दृष्ट्वा तेषां मनसि विषाद उत्पद्यते । विषादस्यैव कारणेन मक्षिकाः प्रतिक्षणं स्वस्य पाणिपादयुगलं घर्षन्ति ।

**३**
**पदच्छेदः**

दानेन, श्लाघ्यताम्, यान्ति, पशुपाषाणपादपाः, दानम्, एव, गुणः, श्लाघ्यः, किम्, अन्यैः, गुणकोटिभिः ।

**अन्वयः**

पशुपाषाणपादपाः दानेन श्लाघ्यतां यान्ति । दानम् एव श्लाघ्यो गुणः (अस्ति), अन्यैः गुणकोटिभिः किम् ?

**सरलार्थः**

पशवो मनुष्याणां कृते उपयोगीनि दुग्धादीनि ददति । तथैव पाषाणानि च मनुष्याणां गृहादिनिर्माणे उपयोगीनि सन्ति । वृक्षाश्च फलपुष्पादिभिर्जनानामुपकारं कुर्वन्ति । तेन कारणेन ते प्रशंसार्हाः सन्ति । अत एव संसारे दानं श्लाघ्यो गुणो वर्तते । अन्यैर्गुणकोटिभिः किमपि न भवति, दानमेव सर्वेषु गुणेषु श्रेष्ठो गुणो वर्तते ।

**४**
**पदच्छेदः**

ग्रासाद्, अर्धम्, अपि, ग्रासम्, अर्थिभ्यः, किम्, न, यच्छसि, इच्छानुरूपः, विभवः, कदा, कस्य, भविष्यति ?

**अन्वयः**

ग्रासाद् अर्धमपि ग्रासम् अर्थिभ्यः किं न यच्छसि ? कदा कस्य इच्छानुरूपो विभवः भविष्यति ?

**सरलार्थः**

स्वल्पस्यापि दानस्य सामर्थ्यं यद्यस्माकं पार्श्वेऽस्ति, तथाप्यस्माभिर्दानं कर्तव्यम् । कश्चन याचको यदि स्वस्य पार्श्वे आगच्छति, तर्हि ग्रासादर्धोऽपि ग्रासस्तस्मै देयः । मम पार्श्वे प्रभूतं वित्तं भविष्यति, तदाऽहं दीनेभ्यो दास्यामि इति धिया दानेन विना न स्थेयम् । यतो हि जनो यावद् विभवं वाञ्छति, तावान् विभवः कदापि तस्य पार्श्वे कदापि न भवति । अतः स्वस्य वित्तेन यावत् सम्भवति, तावद् देयम् ।

**५**
**पदच्छेदः**

मीयताम्, कथम्, अभीप्सितम्, एषाम्, दीयताम्, द्रुतम्, अयाचितम्, एव, तम्, धिग्, अस्तु, कलयन्, अपि, वाञ्छाम्, अर्थिवाग्, अवसरम्, सहते, यः ।

**अन्वयः**

एषाम् कथम् अभीप्सितम् (इति) मीयताम्, अयाचितम् एव द्रुतं दीयताम् । यः वाञ्छां कलयन्नपि अर्थिवागवसरं सहते, तं धिग् अस्तु ।

**सरलार्थः**

जनानामभीप्सितं किमस्तीति अस्माभिः प्रथममेवानुमानं विधेयम्, तेषां याच्ञायाः पूर्वमेव अस्माभिस्तेषामभीप्सितस्य दानं विधेयम् । यो जनो याचकानामभीप्सितं जानाति, किन्तु यावन्न याचते तावन्न ददाति, तस्य वाचं च प्रतीक्षते, तं धिगस्तु । (बुद्धिमन्तो जना याचकानां वाचं नैव प्रतीक्षन्ते, द्रुतमेव तस्याभीप्सितं बुद्ध्वा दानं कुर्वन्तीति भावः ।)

**शिक्षणालोकः**

उल्लिखितानि पद्यानि विविधेभ्यो ग्रन्थेभ्य उद्धृतानि सन्ति । एतानि पद्यानि दानस्य महत्त्वं वर्णयन्ति, दानार्थं प्रेरयन्ति, अपरेषां सहाय्यार्थं च जनानुत्प्रेरयन्ति । एतेषां पद्यानां सम्यग्व्याख्यानं विधाय छात्रा आवश्यकस्थानेष्वन्येषां सहयोगार्थमुत्प्रेरणीयाः । साहाय्यस्य स्वरूपाणि, उदाहरणानि, सम्भावितकार्याणि च प्रदर्श्य तेषामभ्यासं कृत्वा निरीक्षणञ्च विधेयम् ।

## अभ्यासः

१. **पाठस्थश्लोकान् पठित्वा तेषामाधारेण दानस्य महिमानं वर्णयत ।**

२. **पाठस्य पञ्चमं श्लोकं पठित्वा तस्याशयं सरलगिरा कक्षायां श्रावयत ।**

३. **एकपदेनोत्तरयत**

(क) भूतानां वशीकरणं केन उपायेन सम्भवति ?

(ख) दानैः को बन्धुत्वमेति ?

(ग) मक्षिकाः किं घर्षन्ति ?

(घ) केभ्यो ग्रासस्य दानं विधेयम् ?

(ङ) अस्माभिर्याचकानां किमनुमातव्यम् ?

४. **एकवाक्येनोत्तरयत**

(क) कीदृशस्य जनस्य वैरिणो न भवन्ति ?

(ख) दानस्य कारणेन के कीर्तिमन्तो वर्तन्ते ?

(ग) पादपाः कथं प्राणिनामुपकारं कुर्वन्ति ?

(घ) किं जनानां पार्श्वे इच्छानुरूपो विभवः कदाचन सम्भवति ?

(ङ) के जना याचकानां वाचं न प्रतीक्षन्ते ?

५. **परस्परं मेलयित्वा निर्मितानां वाक्यानां नीतिमूलमाशयं प्रकटयत**

| समूहः क | समूहः ख |
|---|---|
| पशुपाषाणपादपाः | अर्थिवागवसरं न प्रतीक्षन्ते । |
| मधुमक्षिकाः | दानैर्बन्धुत्वं यान्ति । |
| बुद्धिमन्तः | दानपरा भवन्ति । |
| पराः | सञ्चयशीला भवन्ति । |

## ६. प्रदत्तस्य श्लोकस्य तात्पर्यं सरलभाषया प्रकाशयत

मीयतां कथमभीप्सितमेषां
दीयतां द्रुतमयाचितमेव ।
तं धिगस्तु कलयन्नपि वाञ्छा-
मर्थिवागवसरं सहते यः ॥

## ७. समुचितविकल्पं विचित्य लिखत

(क) दानेन किं नाशं याति ?

(अ) धनम्  (आ) ज्ञानम्  (इ) वैरम्

(ख) दानशीला जनाः कीदृशा भवन्ति ?

(अ) धनवन्तः  (आ) कीर्तिमन्तः  (इ) बलवन्तः

(ग) पाषाणानि कथं मानवानामुपयोगीनि भवन्ति ?

(अ) गृहादिनिर्माणेन  (आ) मार्गमवरुध्य  (इ) ताडनेन

(घ) इच्छानुरूपं किं न भवति ?

(अ) विभवः  (आ) दुःखम्  (इ) ज्ञानम्

(ङ) कीदृशो जनो धिक्कारयोग्यो भवति ?

(अ) योऽर्थिवागवसरं प्रतीक्षते ।  (आ) यो याच्ञां न प्रतीक्षते ।

(इ) यो याचकस्याभीष्टं जानाति ।

## ८. वाक्यानि संशोध्य लिखत

(क) दानं जनानां व्यसनं वर्धयति ।

(ख) अस्माभिः सर्वदा धनसञ्चयो विधेयः ।

(ग) श्रीकर्णस्य, बलेश्च अद्यापि निन्दा भवति ।

(घ) जनानां इच्छानुरूपो विभवः सर्वदा भवति ।

(ङ) अस्माभिर्याचकस्य वाक्यं श्रुत्वैव दानं विधेयम् ।

## ९. शिक्षकस्य साहाय्येन कर्णस्य बलेश्च दानस्य प्रसङ्गं श्रुत्वा सारं विमृशत ।

## १०. पद्यं पठित्वा उत्तराणि लिखत

दाता न दापयति दापयिता न दत्ते
यो दानदापनपरो मधुरं न वक्ति ।
दानं च दापनमथो मधुरा च वाणी
त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति ॥

(क) दाता किं न करोति ?

(ख) को न दत्ते ?

(ग) मधुरं को न वक्ति ?

(घ) सत्पुरुषे के गुणाः भवन्ति ?

## ११. शिक्षकस्य साहाय्येन व्याख्यानं कुरुत

देशे काले उपायेन द्रव्यं श्रद्धासमन्वितम् ।

पात्रे प्रदीयते यत् तत् सकलं धर्मलक्षणम् ॥

## १२. अधस्तनानि पद्यानि तेषामर्थांश्च पठित्वा निर्दिष्टकार्याणि कुरुत

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तद्दानं तामसं स्मृतम् ॥

श्रीमद्भगवद्गीतायाः सप्तदशेऽध्याये दानस्य विषये निर्दिष्टं वर्तते । सात्त्विकं राजसं तामसं चेति दानं त्रिविधं भवति । 'मया देयम्' इति कर्तव्यबुद्ध्या समुचिते देशे, काले पात्रे च यद् दानं विधीयते । आदातुरुपकारस्यापेक्षा च नैव विधीयते तद् दानं सात्त्विकं दानं निगद्यते । प्रत्युपकारस्य, फलप्राप्तेर्वोद्देश्येन क्लेशपूर्वकं यद् दानं दीयते तद् दानं राजसं भवति । सत्कारेण विना, तिरस्कारपूर्वकं वा यद् दानमसमुचिते देशे, काले, पात्रे वा दीयते तद् दानं तामसमुच्यते ।

**(क) एकपदेनोत्तरयत**

(अ) प्रदत्तश्लोकाः कस्माद् ग्रन्थात् समुद्धृताः सन्ति ?

(आ) दानं कतिविधं भवति ?

(इ) कस्मिन् दाने आदातुरुपकारस्यापेक्षा न विधीयते ?

(ई) कतमं दानं फलप्राप्तये दीयते ?

(उ) असत्कृतं दानं कतमम् ?

**(ख) एकवाक्येनोत्तरयत**

(अ) सात्विकं दानं कीदृशं भवति ?

(आ) राजसस्य दानस्य उद्देश्यं किं भवति ?

(इ) कीदृशं दानं तामसं निगद्यते ?

## व्यवहारानुशीलनम्

**१. स्वस्य समाजे वर्तमानस्य कस्यापि दानपरायणस्य जनस्य चरित्रं कक्षां श्रावयित्वा तच्चरित्रादात्मना ग्राह्यपक्षान् सूचीबद्धान् कुरुत ।**

**२. किं त्वया कदाचिद् दानं विहितमस्ति ? यद्यस्ति चेत् तस्मिन् दिने त्वया कीदृश्यनुभूतिर्गृहीता ? यदि नास्ति चेत् किमर्थमद्यावधि दानं न विहितम् ? आत्मानुभूतिं प्रकटयत ।**

**३. समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

**(क) तव पार्श्वे वर्तमानानि अतिरिक्तवस्तूनि त्वं किं करोषि ?**

(अ) तेषां संरक्षणं करोमि ।

(आ) अवकरेषु निक्षिपामि ।

(इ) दीनेभ्यो ददामि ।

**(ख) गृहे आगतस्य बुभुक्षितं जनं प्रति किं करोषि ?**

(अ) तं तर्जयामि ।

(आ) तस्मै भक्ष्यं किञ्चन ददामि ।

(इ) गृहस्यान्तर्गत्वा निवसामि ।

**(ग) त्वं जन्मोत्सवस्यावसरे किं करोषि ?**

(अ) दीनेभ्योऽनाथेभ्यश्च भोजनं वितरामि ।

(आ) मिष्टान्नभोजनं करोमि ।

(इ) किमपि नैव करोमि ।

**(घ) यदि त्वं प्रभूतं धनमर्जयसि, तर्हि कथं तस्योपयोगं करोषि ?**

(अ) भोगानुपभुञ्जे ।

(आ) भोगानुपभुञ्जे, दीनेभ्यश्च ददामि ।

(इ) केवलं सञ्चित्य स्थापयामि ।

षष्ठः पाठः

# अङ्गुलीमालः



मगधदेशस्यैकस्मिन् ग्रामे ग्रामीणाः सदा भयभीता दृश्यन्ते स्म । तत्र कस्यचन लुण्ठकस्य महद् भयमासीत् । स ग्रामनिकटस्थेऽरण्ये निवसति स्म । अरण्यमार्गाद् गमनागमनं कुर्वन्तं पथिकं लुण्ठयित्वा मारयति स्म । ततो मृतस्य पथिकस्य कराङ्गुलीश्छित्वा कण्ठे मालारूपेण धारयति स्म । अतो जनास्तम् 'अङ्गुलीमालः' इति नाम्ना जानन्ति स्म ।

एकदा तस्मिन् ग्रामे शिष्यैः सह महात्मा बुद्धः समागच्छत् । सतां सङ्गो दुःखस्यौषधं मन्यते । अतो ग्रामीणा महात्मनो बुद्धस्य हार्दिकं स्वागतमभिनन्दनं चाकुर्वन् । बुद्धः परित उपविष्टानां ग्रामीणानां पुरः ससाधुवादमहिंसा-दया-शान्ति-सत्यादिविषये श्रुतिमधुरं भावगम्भीरं च प्रवचनमकरोत् किन्तु स ग्रामीणानां मुखमण्डले प्रसन्नतां नैवानुभूतवान् । मनसि वर्तमानं किमपि भयं तेषां मुखाकृतौ प्रतिबिम्बितमासीत् । अतो महात्मा बुद्धोऽपृच्छत्, "जनाः सतां सङ्गेन सन्तुष्टा भवन्ति । भवन्तः केनचिद् भयेन भीता इव परिलक्षयामि । अत्र किं कारणम् ?"

महात्मनः सत्यमनुमानं श्रुत्वा ग्रामीणा विस्मिता अभवन्। तेष्वेक उत्थाय बद्धाञ्जलिर्भूत्वा प्रत्यवदत्, "महात्मन्! वयमङ्गुलीमालस्य भयेन सदा त्रस्ताः स्म। अरण्यमुपस्थाय स तत्र प्राप्तान् जनान् हत्वा हतस्य अङ्गुलीश्छित्वा मालां विधाय धारयति। हिंस्रकात् तल्लुण्ठकाद् वयमसुरक्षिताः स्म। यः प्रयोजनवशादरण्यं गच्छति अङ्गुलीमालस्तं मारयति। अतो वयमरण्यं गन्तुं नेच्छामः किन्तु अस्माभिररण्यं गमनीयमेव भवति। यदि न गम्यते चेद् घासदारुकादीनामभावेनास्माकं जीविकैव न चलति। अतो वयं सदा भयभीताः स्मः।"

ग्रामीणानां परिस्थितिं ज्ञात्वा महात्मा बुद्धो विचारमग्नोऽभवत्। सोऽङ्गुलीमालस्य प्रकोपाद् ग्रामं ग्रामवासिनं च संरक्षितुमैच्छत्। अतः सः 'अहं भवतां यथोचितसहायतां करिष्यामि' इति वदन्नरण्यं प्रति जिगमिषुरभवत्। ग्रामीणा अकथयन्, "महात्मन्! अरण्यं सुरक्षितं नास्ति। न गम्यताम् तत्र। हिंस्रकः स लुण्ठकः कमपि जीवितं न त्यजति। अत्रैवोपस्थाय उपायो विधीयताम्।" ग्रामीणानां सर्वं कथनं श्रुत्वापि निर्भयः सन् महात्मा बुद्धोऽरण्यं प्रति गतवान्।

अङ्गुलीमालोऽरण्ये पथिकं प्रतीक्षमाण आसीत्। स कञ्चन महात्मानं निर्भीकतया मध्येवनमेकाकिनमेवागच्छन्तं विलोक्य विस्मितोऽभवत्। स मनसि विचारितवान्, "अस्मिन् वने प्रायेण जना मद्भयेन नागच्छन्ति। एकाकी तु कोऽपि कथमपि नागच्छति। आकृत्या महात्माऽसौ निर्भय आगच्छन् वर्तते। आगच्छतु इममपि हत्वा एतस्याङ्गुलीश्च मालायां गुम्फामि। ततः 'शतं जनान् हनिष्यामि' इति मम प्रतिज्ञा च पूर्णतां गच्छति।" स किञ्चिदग्रे गत्वा उच्चैरकथयत्, "भो साधो! कुत्र गच्छन्नसि। तत्रैव तिष्ठ।" तस्य वचनं श्रुत्वाऽपि बुद्धोऽग्रेऽगच्छत्। तत्कृतेनावमानेनाङ्गुलीमालः क्रुद्धो जातः। सोऽकथयत्, "मयोक्तं न शृणोषि? वधिरोऽसि किम्? तत्रैव तिष्ठ।" महात्मा बुद्धोऽवरुद्धो भूत्वा पृष्ठं पश्यति। तत्र महानेत्रो धृताङ्गुलीमालः खड्गोद्यतकरो गृहीतराक्षसावतारः करालरूपोऽङ्गुलीमालोऽन्वागच्छन्नासीत्। आकृत्या स क्रुद्धः प्रतिभाति स्म।

परावर्त्य तं दृष्ट्वा बुद्धः पुनरग्रे गतवान्। स्वाज्ञां तिरस्कृत्याग्रे गतवन्तं बुद्धं प्रति क्रुद्धोऽङ्गुलीमालः खड्गमाकाशाभिमुखं कुर्वन् वेगेन बुद्धम् अन्वगच्छत् किन्तु तं ग्रहीतुं नाशक्नोत्। धावं धावं स श्रान्तो जातः किन्तु बुद्धो तद्धस्तङ्गतो नाभवत्। अतः स उच्चैः पुनरकथयत्, "तिष्ठ नोचेन्मरिष्यसि। तव अङ्गुलीश्छित्वा जनशतकस्य वधरूपं शपथं मे पूरयिष्यामि।" हिंसाप्रियस्य तस्य तद्वचनं श्रुत्वा अवरुद्धचरणो महात्मा बुद्धोऽवदत्, "त्वमात्मानं सर्वसमर्थं शक्तिमन्तं मनुषे? यदि त्वं सर्वसमर्थो वर्तसे चेद् गच्छ तव निकटे वर्तमानस्य वृक्षस्य पत्राण्यवचित्य अत्रागच्छ। अहमितः न कुत्रापि पलाये, अत्रैव भवामि।" अङ्गुलीमालेन कस्यापि वचनस्य परिपालनं कृतं नासीत् किन्तु महात्मनो वचसा प्रभावेन वृक्षस्य पत्रच्छेदनाय गतवान्। छेदितानि पत्राणि आनीय एनं मारयिष्यामि इति विचार्य स झटिति पत्राणि सञ्छिद्य बुद्धं निकषा चागत्याकथयत्, "पश्य मया वृक्षपत्राणि छित्त्वा आनीतानि।" बुद्धस्तं पुनरादिशत्, "गच्छ पुनरिमानि पत्राणि वृक्षशाखायां नियोजस्व।" बुद्धस्य वचनं श्रुत्वा विस्मितोऽङ्गुलीमालोऽवदत्, "त्वं कीदृशो महात्मा वर्तसे? छिन्नं पत्रं पुनः शाखायां नियोजयितुं न शक्यते इति न जानासि?" बुद्धो स्मितवदनेनावदत्, "अहं तदेव त्वां बोधयितुमिच्छामि। त्वं छित्त्वा पुनर्योजयितुं न शक्नोषि चेद् वस्तुनश्छेदनेऽपि तवाधिकारो नास्ति। त्वं कस्मैचन जीवनं दातुं न शक्नोषि चेज्जीवनहरणेऽपि तवाधिकारो नास्ति।"

महात्मनो बुद्धस्य वचनं श्रुत्वाऽङ्गुलीमालस्य हस्तात् खड्गो भूमौ अपतत् । स्वकृताद् हिंसाकर्मणो भृशं ग्लानिमनुभवन्नङ्गुलीमालो भूमौ जानुनी पातयित्वा नमस्कारमुद्रयाऽवस्थितोऽभवत् । खिन्नमानसं तं दृष्ट्वा महात्माऽवदत्, "त्वं मां 'तिष्ठ तिष्ठ' इति कथयन्नासीः । अहं तु सदा स्थिर एवास्मि किन्तु त्वं स्थिरो न वर्तसे ।" अङ्गुलीमालो बुद्धस्य मुखं विलोक्याकथयत्, "अहं तु अस्मिन्नेव वने स्थितोऽस्मि । अस्थिरस्तु भवान् वर्तते यतो हि भवानेकत्र न तिष्ठति । सर्वदा इतस्ततः परिभ्रमति ।" अङ्गुलीमालस्य वचनं श्रुत्वा दीर्घं निःश्वस्य बुद्धोऽवदत्, "अहं जनेभ्यः क्षमां प्रदाय स्थिरतया वर्ते किन्तु त्वं हिंसार्थं जनाननुधावसि । अतस्त्वमस्थिरोऽसि ।" महात्मनो बुद्धस्य वचनं श्रुत्वा हिंस्रकस्याङ्गुलीमालस्य अविवेकान्धीभूतं प्रज्ञाचक्षुरुद्घाटितमभवत् । ततः स बुद्धस्य पादयोः प्रणिपत्य साश्रुवाहमवदत्, "प्रभो ! मां शरणे गृह्यताम् । इतः परमहं हिंसाया मार्गे कदापि न गच्छामि । अद्यत एवाहं लुण्ठनं न करोमि । अधर्मो मत्तः कदापि न भवति । न हि हिंसया काचन उपलब्धिः प्राप्यते इत्यहं भवतो वचसा ज्ञानवानस्मि ।" इति ।

तस्मादेव दिनादङ्गुलीमालो हिंसाया मार्गं परित्यज्य संन्यासं गृहीत्वा भगवद्भक्तौ तल्लीनोऽभवत् । निर्भया ग्रामीणा ज्ञातवन्तो यत् समुचितं मार्गदर्शनं प्राप्यते चेद् हिंस्रको मनुष्योऽपि सन्मार्गमवलम्बते ।

## शिक्षणालोकः

अस्याः कथायाः शिक्षणक्रमे विद्यार्थिनोऽहिंसाया महत्त्वस्य परिपालनस्य च विषये प्रशिक्षणीयाः । अहिंसा मानवानां कृते जीवनोपयोगी गुणोऽस्ति, अतोऽहिंसा सर्वैरवलम्बनीया इति बोधयित्वा विद्यार्थिष्वहिंसाया भावना प्रवर्धयितव्याः । एवञ्चाहिंसासम्बद्धा अन्याः कथास्तद्विषयीणि पद्यानि च शिक्षणीयानि । अहिंसाप्रियाणां मानवानां कथाप्रसङ्गादींश्च श्रावयित्वा स्वस्मिन् अहिंसाभावनाप्रवर्धनाय विद्यार्थिन उत्प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

### १. गतियतिवाक्यचिह्नानि विचार्य सार्थबोधं शुद्धमुच्चारयत

खिन्नमानसं तं दृष्ट्वा महात्माऽवदत्, "त्वं मां 'तिष्ठ तिष्ठ' इति कथयन्नासीः। अहं तु सदा स्थिर एवास्मि किन्तु त्वं स्थिरो न वर्तसे।" अङ्गुलीमालो बुद्धस्य मुखं विलोक्याकथयत्, "अहं तु अस्मिन्नेव वने स्थितोऽस्मि। अस्थिरस्तु भवान् वर्तते यतो हि भवानेकत्र न तिष्ठति। सर्वदा इतस्ततः परिभ्रमति।" अङ्गुलीमालस्य वचनं श्रुत्वा दीर्घं निःश्वस्य बुद्धोऽवदत्, "अहं जनेभ्यः क्षमां प्रदाय स्थिरतया वर्ते किन्तु त्वं हिंसार्थं जनाननुधावसि। अतस्त्वमस्थिरोऽसि।"

### २. वाक्यगतमर्थं व्याख्यात

नहि हिंसया काचन उपलब्धिः प्राप्यते।

### ३. सङ्क्षेपेणोत्तरयत

(क) ग्रामे कस्य भयमासीत्?

(ख) लुण्ठकः कण्ठे किं धारयति स्म?

(ग) लुण्ठकस्य नाम 'अङ्गुलीमालः' इति कथं जातम्?

(घ) महात्मा कस्मिन् विषये प्रवचनमकरोत्?

(ङ) महात्मा ग्रामीणानां वचनं श्रुत्वा किं कर्तुमैच्छत्?

(च) अङ्गुलीमालस्य शपथं किमासीत्?

(छ) बुद्धः कुत्र किं योजयितुमङ्गुलीमालमादिशत्?

(ज) अङ्गुलीमालः कं मारयति स्म?

(झ) ग्लानिमनुभवन्नङ्गुलीमालो भूमौ कथमवसत्?

(ञ) ग्रामीणाः किं ज्ञातवन्तः?

### ४. बुद्धस्य वचनं श्रुत्वाऽङ्गुलीमालो झटिति स्वकृतं कर्म अपराधरूपेण ज्ञात्वा आत्मानं सन्मार्गे नयति। किं वैचारिकं परिवर्तनं एवंविधिना शीघ्रतरं सम्भवति? सखिभिः सह विमृशत।

### ५. अङ्गुलीमालस्य चरित्रचित्रणं विधीयताम्।

## ६. कथायाः सन्देशं विलिख्य कक्षायां श्रावयत ।

## ७. शिक्षकस्य साहाय्येन निम्नलिखितस्य श्लोकस्य सरलार्थं लिखत

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥

## ८. तात्पर्यं प्रकाशयत

सतां सङ्गो दुःखस्यौषधं मन्यते ।

## ९. सुयोग्यो योजको मूर्खानपि सन्मार्गे आनेतुं समर्थो भवतीति कथनं बुद्धाङ्गुलीमालयोरुदाहरणेन स्पष्टीकुरुत ।

## १०. परस्परं मेलयत

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| महात्मा | लुण्ठकः |
| भयभीताः | प्रवचनम् |
| हिंसाप्रियः | बुद्धः |
| भावगम्भीरम् | ग्रामीणाः |

## ११. पाठाधारेण रिक्तस्थानं पूरयत

(क) अङ्गुलीमालो ग्रामनिकटस्य ............ निवसति स्म । (गृहे, भवने, अरण्ये)

(ख) बुद्धो ग्रामीणानां मुखमण्डले ............ नैवानुभूतवान् । (प्रसन्नताम्, खेदम्, दुःखम्)

(ग) तिष्ठ नोचेत् ............ । (गमिष्यसि, मरिष्यसि, पतिष्यसि)

(घ) ............ मत्तः कदापि न भवति । (अधर्मः, चौर्यम्, लुण्ठनम्)

## १२. पाठ्यकथामाश्रित्य सत्यासत्यं विवेचयत

(क) जनाः सतां सङ्गेन सन्तुष्टा भवन्ति ।

(ख) ग्रामीणानां परिस्थितिं ज्ञात्वा महात्मा बुद्धो विचारशून्योऽभवत् ।

(ग) अरण्येऽङ्गुलीमालस्यावाहनं श्रुत्वा बुद्धः स्वगतिमवरुद्धवान् ।

(घ) अङ्गुलीमालो बुद्धस्य शिष्यत्वं स्वीकृत्य गृहं गतवान् ।

## १३. प्रदत्तपदैर्नीतिशिक्षाप्रदायकानां वाक्यानां रचनां कुरुत

प्रणिपत्य, भयभीताः, श्रान्तः, भृशम्, महात्मा, निर्भयम्

## १४. अर्थं लिखत

छित्त्वा, परिलक्षयामि, प्रतीक्षमाणः, ऐच्छत्, प्रतिबिम्बितम्, कराङ्गुलीः ।

## १५. अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानामुत्तराणि दत्त

सत्यानुसारिणी लक्ष्मीः कीर्तिस्त्यागानुसारिणी ।

अभ्याससारिणी विद्या बुद्धिः कर्मानुसारिणी ॥

(क) बुद्धिः कीदृशी भवति ?

(ख) लक्ष्मीकीर्त्योर्मध्ये को भेदः ?

(ग) 'विद्या' इत्यस्य पर्यायशब्दं लिखत ।

(घ) 'बुद्धिः' इत्यस्य प्रकृतिप्रत्ययविभागं कुरुत ।

## १६. बोधकथां पठित्वा प्रश्नान् उत्तरयत

एकस्मिन् ग्रामेऽग्निदाहोऽभवत् । किंकर्तव्यविमूढा जना अग्निभयेन स्वप्राणरक्षार्थमितस्ततो धावन्त आसन् । जनान् निष्क्रियान् विलोक्य एकः कपोतश्चिन्तितो जातः । अग्निः शान्तो न क्रियते चेन्महती क्षतिर्भविष्यति । अतोऽग्निशमनोपायः कर्तव्य इति विचार्य स स्वचञ्च्वां कुल्यायाः जलानि आदाय ज्वलितेऽग्नावक्षिपत् । स पुनः पुनः स्वचञ्च्वां जलानि गृहीत्वा अग्नौ क्षिप्तवान् । कपोतस्येमां क्रियां विलोक्य ग्रामीणा अपि उत्साहिनोऽभवन् । अग्निं शमयितुमेकः पक्षी प्रयासरतोऽस्ति चेत् वयमपि प्रयतमाना भवेम इति विचार्य ग्रामीणा ऐक्यभावनया जलोपशान्तये कार्याण्यकुर्वन् । क्षणानन्तरमेव अग्निः शान्तो जातः । इमां परिघटनां कश्चन काकोऽवलोकयन्नासीत् । स कपोतस्य समीपमागत्यावदत्, "कपोत ! तव प्रयासेन अग्निर्न शाम्यति इति त्वमपि जानासि, किन्तु त्वमेकाकी अग्निशान्तये संलग्न आसीः । किमर्थम् ?" कपोतः उक्तवान्, "मम कर्मणा अग्निर्न शाम्यति किन्तु अहमात्मानं धन्यं मन्ये, यतो हि यदा अग्निशमनस्य वार्ता भवति, तदा मम नाम प्राथम्येन आयाति त्वत्सदृशस्य दर्शकस्य न ।" कपोतस्य वचनं श्रुत्वा काक निरुत्तरोऽभवत् ।

**(अ) एकपदेनोत्तरयत**

(क) अग्निदाहः कुत्राभवत् ?

(ख) कपोतो जलानि कुत्र क्षिप्तवान् ?

(ग) कः परिघटनां पश्यन्नासीत् ?

(घ) कदाऽग्निः शान्तो जातः ?

**(आ) एकवाक्येनोत्तरयत**

(क) अग्निभयेन जनाः किं कुर्वन्त आसन् ?

(ख) कपोतः किं चिन्तितवान् ?

(ग) जनाः कथमुत्साहिनोऽभवन् ?

(घ) कपोतस्य वचनं श्रुत्वा काकः कीदृशोऽभवत् ?

**१७. बुद्धोपदेशानन्तरमङ्गुलीमालस्य जीवनं कीदृशमभवत् ? परिकल्प्य एकमनुच्छेदं लिखत ।**

**१८. 'महात्मानः परदुःखं न सहन्ते' इति विषये काचन लघुकथा विलिख्यताम् ।**

**१९. समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

**(क) महात्मा बुद्धः कैः सह ग्रामं समागच्छत् ?**

(अ) मित्रैः सह (आ) शिष्यैः सह

(इ) ग्रामीणैः सह (ई) स्वजनैः सह

**(ख) बुद्धस्य कीदृशमनुमानं श्रुत्वा ग्रामीणा विस्मिता अभवन् ?**

(अ) कल्पनाश्रितम्

(आ) योजनाबद्धम्

(इ) सत्यम्

(ई) वस्तुनिष्ठम्

**(ग) अङ्गुलीमालोऽरण्ये कं प्रतीक्षमाण आसीत् ?**

(अ) पथिकम्

(आ) पशुगणम्

(इ) महात्मानम्

(ई) गोपालम्

(घ) **अङ्गुलीमालः कतिजनानां वधस्य प्रतिज्ञां कृतवानासीत् ?**

(अ) विंशतिजनानाम्

(आ) पञ्चाशज्जनानाम्

(इ) नवतिजनानाम्

(ई) शतजनानाम्

(ङ) **अङ्गुलीमालस्य हस्तात् किमपतत् ?**

(अ) छुरिका

(आ) दण्डः

(इ) धनुः

(ई) खड्गः

## व्यवहारानुशीलनम्

१. **सखीन् प्रति दुर्व्यवहारं कुर्वाणस्तव सखा त्वया कथं ततो निवर्त्यते ? एकमनुच्छेदं लिख ।**

२. **त्वयि सर्वेऽपि सद्गुणाः सन्ति परं त्वमलसो वर्तसे । तेन सद्गुणानां सत्त्वेऽपि त्वं वारं वारं निन्दितो भवसि । एवं चेदालस्यं निवारयितुं त्वं किं करोषि ? स्वविचारं प्रस्तुहि ।**

३. **अधः प्रदत्तेषु कान् विषयाँस्त्वं पालयसि काँश्च न ? सारिण्यां प्रदर्शय**

| विषयाः | पालयामि | न पालयामि |
|---|---|---|
| ब्रह्ममुहूर्ते जागरणम् | | |
| भोजनकाले एव शयनादुत्थानम् | | |
| प्रतिदिनं प्रातः स्नानम् | | |
| प्रतिसप्ताहमेकवारं स्नानम् | | |
| भोजनात् पूर्वमन्नप्रार्थना | | |
| भोजनप्राप्त्यनन्तरं सद्यो मुखे प्रक्षेपः | | |
| भोजनस्यास्वादुत्वेऽप्यनिन्दया ग्रहणम् | | |

| विषयाः | पालयामि | न पालयामि |
|---|---|---|
| भोजनस्यास्वादुत्वेऽन्नस्य पाचकस्य च निन्दनम् | | |
| सावधानतया स्वकर्मणां सम्पादनम् | | |
| केवलं कार्यान्निवृत्तये यथातथं कार्यकरणम् | | |
| दिवा शयनम् | | |
| रात्रावेव शयनम् | | |
| आपणिकवस्तूनां भोजनम् | | |
| गृहनिर्मितस्वास्थ्यकरभोजनग्रहणम् | | |
| गृहकृत्येषु मातापित्रोः सहयोगः | | |
| गृहकृत्येभ्यो दूरे स्थानम् | | |
| मान्यानां समादरः | | |
| मान्यानामनादरः | | |
| अवरजेषु स्नेहः | | |
| अवरजानां तर्जनम् | | |

सप्तमः पाठः

# वृद्धसेवा गरीयसी



जगति विद्यमानेषु नैकविधेषु प्राणिषु मानवो विवेकशीलो मन्यते । आदिकालादेव मानवः समाजे निवसति । समाजे निवसतां मानवानां च परस्परं वैविध्यं द्रष्टुं शक्यते । समाजे वृद्धाः प्रौढा युवानो बालाश्च निवसन्ति । विद्वांसो जिज्ञासवश्च निवसन्ति । बलिनो दुर्बलाश्च निवसन्ति । धनिनो निर्धनाश्च निवसन्ति । सत्यपि वैविध्ये मानवसमाजः स्वविवेकेन समाजस्य व्यवस्थायै निरन्तरं यतमानो दृश्यते । सामाजिकव्यवस्थाया अनेकानि स्वरूपाणि सन्ति । परस्परं सहयोगः, दीनसेवा, ज्येष्ठजनानां समादरश्चेत्यादीनि सामाजिकव्यवस्थायाः स्वरूपस्योदाहरणानि सन्ति । तेषु ज्येष्ठजनानां समादरोऽपि अपरिहार्यो वर्तते ।

बाल्यम्, यौवनम्, प्रौढता, वार्धक्यञ्चेत्यवस्थाचतुष्टयं सर्वेषां मानवानामपरिहार्यं सत्यं वर्तते । प्रत्येकं मानवा बाल्यात् क्रमेण स्थाविरं प्राप्नुवन्ति । एतस्मिन्नेव क्रमे मानवा ज्ञानिनोऽनुभविनो निपुणाश्च भवन्ति । क्रमशः प्रौढताङ्गतो मानवः कथं बुद्धिमत्तरो जायमानो विद्यते इति साधारणतया नानुभवति । प्रत्येकं मानवैर्लब्धं बुद्धिमत्त्वं ज्यायसामुपहारो वर्तते । केचनाभिमानिनो मन्वते यद्, मानवः स्वीयेन तपसा

बलेन वा समर्थो भवति, न कस्याप्यपरस्योपकारेण इति। किन्तु सम्यग् विचारिते सति मानवः स्वीयेन बलेन न किमपि कर्तुं समर्थो भवति। मातुर्दुग्धमपीत्वैव, पितुरङ्गुलीमगृहीत्वैव वा कोऽपि मानवः स्वत एव बलवान् भवति किमु ? अहं स्वयमेव पुस्तकं पठित्वा ज्ञानवान् जात इति कस्यचन मतं भवितुं शक्नोति, किन्तु पुस्तकनिहितं सर्वमपि ज्ञानं केषाञ्चन प्रौढानामनुभवस्य साररूपं भवतीति तेनापि स्मर्तव्यम्। अत एवास्माभिः ज्यायसां मान्यानां वा जनानां समादरः करणीयः।

वयं सर्वेऽपि बाल्ये पितामह्याः पितामहस्य वाऽङ्के उपविशामः। तेषामङ्के वोपविश्य रामायणस्य, महाभारतस्य, कृष्णचरितस्य वा कथां शृणुमः। तासामेव कथानां प्रभावतोऽस्माकं हृदि साधुत्वस्य, परोपकारस्य वा भावना विकसिता भवति। अत एवास्माकं सर्वेषां पितामही मातामही वा गुरुरूपा वर्तते। तथैवास्माकं भ्रातरो भगिन्यश्चास्मभ्यं कर्तव्यमकर्तव्यं वेति सर्वं शिक्षयन्ति। विद्यालयं गत्वा वयं गुरुभ्योऽनेकाः शिक्षा गृह्णीमः। न केवलं गुरुभ्योऽपि त्वग्रजेभ्यश्च बहून् विषयान् जानीमः। मानवसमुदाये ज्यायांस एव कनीयसां मार्गदर्शकाः सन्ति। अत एवास्माकं सर्वेऽपि ज्यायांसो वृद्धाः, प्रौढाश्चास्माकं पूजनीया वन्दनीयाश्च भवन्ति। श्रीमद्भगवद्गीतायामुक्तं च वर्तते-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ इति।**

ज्येष्ठानामाचारः समाजे यादृशो दृश्यते, तादृश एव सर्वैरनुक्रियते। अस्माकं व्यवहारेऽपि ज्यायसां व्यवहारः संस्काररूपेण निविशति, परिस्थितिं विचार्य वयमपि तेषां व्यवहाराननुकुर्मः। शिष्टानामाचारा अस्माकं शिक्षायै एव भवन्ति। अस्माकपि व्यवहाराः कनीयसां मार्गं निर्धारयन्ति। तेऽप्यस्माननुकुर्वन्ति।

यथा युवानो बलेन कार्याणि सम्पादयितुं शक्नुवन्ति, तथा वृद्धा न शक्नुवन्ति। तथापि तेषां समक्षे विवेको भवति, येन ते दुःसाध्यान्यपि कार्याणि सम्पादयितुमुपायान् उपदेष्टुं शक्नुवन्ति। अत एव समाजे वृद्धानां स्थानं सर्वेभ्य उपरि भवति। प्रौढा वृद्धेभ्यः, युवानः प्रौढेभ्यो वृद्धेभ्यश्च, बालाश्च युवभ्यः प्रौढेभ्यो वृद्धेभ्यश्चोपायानादाय जीवने सफला भवन्ति। अस्माकं सर्वेषामपि जीवनस्य निर्माणाय, समाजस्य राष्ट्रस्य च विकासाय ज्यायसां यादृशी भूमिका वर्तते सा सर्वदा समादरणीया भवति। अत एव सभासु वृद्धानामावश्यकतां विचार्य महाभारते उक्तं वर्तते, "न सा सभा यत्र न सन्ति वृद्धाः" इति।

अस्माकं शास्त्रेषु ज्येष्ठानां समादरस्य महत्त्वं वर्णितं विद्यते। श्रवणकुमारः स्वस्य दृष्टिविहीनयोर्मातापित्रोः साहाय्यार्थं जीवनं समर्पितवान्। लक्ष्मणः स्वभ्रातुः सेवायै राज्यलक्ष्मीं तत्याज। रामश्च स्वयं पितुर्वचनमनुपालयन् राज्यश्रियं परित्यज्य वनवासार्थं प्रस्थितवान्। औद्दालक आरुणिः स्वगुरोः सेवायै पानीयस्य कुल्यायां रात्रिपर्यन्तमवस्थितवान्। मान्यजनानां समादरस्यैतादृशानि शतश उदाहरणानि पुराणेष्वितिहासेषु च लभ्यन्ते। तेषामध्ययनेनास्माभिरपि ज्येष्ठैः सह तादृश एव व्यवहारः करणीयः।

यद्यपि ज्येष्ठाः सर्वदा हितोपदेशं करोमीति धिया किमपि न कथयन्ति, तथापि तेषां कथनमेवास्माकं ज्ञानस्य स्रोतो भवति। अनेकेषां देशानां पर्यटनेन, बहुविधानां मानवानां सङ्गत्या, बहुविधानां जटिलानां परिस्थितीनामनुभवेन, स्वीयसाधनया, सङ्घर्षेण च वयोवृद्धा जना पवित्रा भवन्ति। यथा शाणेषु लब्धोत्कषणा

मणयश्चमत्कृता भवन्ति, अग्निषु दग्धः सन् सुवर्णश्चमत्कृतो भवति तथैव जीवनस्यानेकविधानां दुःखानां शमनेन वृद्धा अपि पवित्राश्चमत्कृताश्च भवन्ति । एतदेव रहस्यं विज्ञायास्माकं नीतिशास्त्रमेवमुपदिशति-

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते ह्यायुर्विद्या यशो बलम् ॥** इति ।

पौरस्त्यपरम्परायां मातापित्रोर्गुरूणां च विशिष्टं स्थानं भवति । तथैव पूर्वजान् संस्मृत्य श्राद्धादिषु तर्पणं दीयते । विविधेषु स्थानेष्वस्माकं मार्गदर्शकानां प्रतिमाः स्थाप्यन्ते । विजयादशम्यां ज्यायसां हस्तेभ्योऽक्षतादिकं सन्धार्य आशीर्वादा गृह्यन्ते । मातुः पितुश्च सम्मानाय तिथय एव निश्चिताः सन्ति । एतादृश्यस्मदीया संस्कृतिर्मान्यानां समादरस्य महतीं परम्परां द्योतयति ।

कदाचिन्मान्यजनानां तिरस्कारस्य समाचारा अपि सञ्चारमाध्यमेषु दृश्यन्ते श्रूयन्ते च । पित्रोः सेवायै असमर्था जना वृद्धाश्रमेषु मातापितरौ न्यस्य दूरतः पलायन्ते । धनलोभेन मातरं, पितरं, भ्रातरं, भगिनीं च तिरस्कुर्वन्ति । यस्या गर्भेऽस्माकं जीवनस्याङ्कुरणमभूत्, यस्या अङ्के निविश्यास्माकं जीवनयात्रा प्रारब्धाऽभवत्, सैव वार्धक्ये साहाय्यं वाञ्छति चेत् तस्याः सेवायाः का हानिः ? यस्यङ्गुलीं गृहीत्वा वयं चलितुं समर्था अभूम, यस्य स्कन्धेषु स्थित्वा जगतो विचरणं कर्तुं प्रभवेम स एव पिता वार्धक्येऽस्माकं मधुरं वचनं वाञ्छति चेन्मधुरभाषणे को दोषः ? येऽग्रजा आजीवनमस्माकं मार्गदर्शनं विहितवन्तस्तेषां सम्माने का क्षतिः ? मान्यानां ये तिरस्कारं कुर्वन्ति तेषां जीवने सौविध्ये सत्यपि आध्यात्मिकी शान्तिः समुन्नतिश्च कदापि न सम्भवति ।

मान्यजनान् प्रति सर्वदाऽहोभावेन अस्माभिस्तेषां सेवायै समुद्यतैर्भाव्यम् । चिकित्सालयेषु, आपणेषु, यानेषु, कार्यालयेषु वा तेषां सौविध्याय सर्वैः प्रयतनीयम् । विकसितेषु देशेष्विव तेषामुपचाराय सौविध्याय च सर्वकारस्यायासेनैव व्यवस्था कर्तव्या । सर्वकारद्वारा ज्येष्ठनागरिकानां कृते निर्मितानां नीतीनां कार्यान्वयनं विधातव्यम् । वयोवृद्धाः प्रौढाश्च जना अस्माकं समाजस्य मार्गदर्शकाः सन्तीति तेषु निहितानां ज्ञानानां हस्तान्तरणायानेके कार्यक्रमाः सञ्चालनीयाः । वयोवृद्धेभ्योऽनेकाः कथाः श्रोतव्याः याभिर्वयं सत्कार्येषु प्रेरिता भवेम, तैः सह वार्तालापः करणीयः येन ते सर्वदा हृष्टा भवेयुः, अनेकेषु कार्येषु तेषां सहायैर्भाव्यम्, येन तेषां जीवनं सरलं भवेत्, मधुरवचोभिश्च ते सम्बोधनीयाः, येन ते सन्तुष्टा भवेयुः । यत्र ज्येष्ठाः समादृता भवन्ति, स एव समाजो विकसितः सभ्यश्च भवति । ज्ञानवृद्धानां वयोवृद्धानां च जनानां सम्मानेन सेवया चास्माकं जीवनं धन्यं भवति । तेषामेवाशीर्वचोभिरस्माकं कार्याणि सफलानि भवन्ति ।

## शिक्षणालोकः

प्रबन्धेऽस्मिन् ज्येष्ठानां वृद्धानां च सम्मानस्य महत्त्वं वर्णितं विद्यते । अस्माकं परिवारे, समाजे च ज्येष्ठाः कनिष्ठाश्च निवसन्ति । ज्येष्ठानां सम्मानस्य परम्परां बोधयित्वा तेषां सम्मानार्थं पाठस्यैतस्य शिक्षणे छात्राः प्रेरणीयाः । विद्यालये छात्रा मान्यानां सम्मानं कुर्वन्ति न वेति सम्यङ्निरीक्ष्य तेषां मूल्याङ्कनं च विधेयम् ।

## अभ्यासः

१. **पाठस्यानुच्छेदानेकैकशः पठत । एकस्मिन्ननुच्छेदे पठिते सति तस्य सारं च परस्परं विमृशत ।**

२. **सम्पूर्णं प्रबन्धं पठित्वा तस्य निष्कर्षं कक्षायां श्रावयत ।**

३. **अस्माभिर्मान्यानां समादरः किमर्थं करणीयः ? पाठस्याधारेण सूत्रीकृत्य लिखत ।**

४. **समुचितविकल्पं चिह्नेन योजयत**

(क) 'न सा सभा यत्र न सन्ति वृद्धाः' इति सूक्तिः कुत उद्धृता ?

(अ) रामायणात् (आ) महाभारतात् (इ) श्रीमद्भगवद्गीतायाः

(ख) 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति कुत्र निर्दिष्टम् ?

(अ) श्रीमद्भगवद्गीतायाम् (आ) रघुवंशे (इ) वाल्मीकिरामायणे

(ग) 'मानवः स्वीयेन तपसा एव समर्थो भवति' इति को विचारयति ?

(अ) ज्ञानी (आ) बालकः (इ) अभिमानी

(घ) समाजे ज्यायांसः कीदृशा भवन्ति ?

(अ) मार्गदर्शकाः (आ) अज्ञानिनः (इ) पथभ्रष्टाः

५. **अधस्तनश्लोकस्य भावार्थं सरलया भाषया लिखत**

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥

६. **परस्परं योजयत**

| | |
|---|---|
| श्रीरामः | गुरुसेवायै कुल्यायां स्थितवान् । |
| श्रवणकुमारः | भ्रातृसेवायै राज्यलक्ष्मीं तत्याज । |
| आरुणिः | राज्यश्रियं परित्यज्य वनवासार्थं जगाम । |
| लक्ष्मणः | वृद्धयोः मातापित्रोः सेवायै आजीवनं समर्पितः । |

## ७. वृद्धसेवाया विषये श्रुतपूर्वां काञ्चन कथां कक्षायां श्रावयत ।

## ८. सङ्क्षेपेणोत्तरयत

(क) अस्माकं समाजः कीदृशो वर्तते ?

(ख) अस्मासु साधुत्वस्य विकासः कथं भवतीति वर्णयत ।

(ग) श्रीमद्भगवद्गीताया उपदेशं सरलभाषया व्याख्यात ।

(घ) 'न सा सभा यत्र न सन्ति वृद्धाः' इत्यस्याः सूक्तेस्तात्पर्यं प्रकाशयत ।

(ङ) शास्त्रेषु वर्णितानि मान्यानां समादरस्योदाहरणानि कानि ? लिखत ।

(च) वयोवृद्धा जनाः कथं पवित्रा भवन्ति ?

(छ) 'अस्माकं संस्कृतौ मान्यानां समादरस्य महती परम्परा वर्तते' इत्यस्य पुष्टिं कुरुत ।

(ज) केषामाध्यात्मिकी समुन्नतिर्न सम्भवति ?

(झ) वृद्धजनानां सेवायै अस्माभिः किं कर्तव्यम् ?

(ञ) अस्माकं जीवनं कथं धन्यं सफलं च भवति ?

## ९. 'अस्माभिर्लब्धं सर्वमपि ज्ञानं वृद्धानामुपहारस्वरूपं भवति' एतस्य कथनस्य व्याख्यानं कुरुत ।

## १०. शिक्षकस्य साहाय्येन श्रवणकुमारस्य कथां श्रुत्वा तत्सारं कक्षायां विमृशत ।

## ११. अधस्तनस्य श्लोकस्य भावार्थं प्रकाशयत

यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः ।
न च विद्यागमोऽप्यस्ति वासस्तत्र न कारयेत् ॥

## १२. अधस्तनानि पद्यानि पठित्वा प्रश्नोत्तराणि लिखत

मातापित्रोर्गुरुणाञ्च पूजा बहुमता मम ।
इह युक्तो नरो लोकान् यशश्च महदश्नुते ॥
न च तैरभ्यनुज्ञातो धर्ममन्यं समाचरेत् ।
यं च तेऽभ्यनुजानीयुः स धर्म इति निश्चयः ॥
पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः ।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥

(क) केषां पूजा बहुमता ?

(ख) को यशो महदश्नुते ?

(ग) मनुजः किं नाचरेत् ?

(घ) को धर्म इति निश्चयः ?

(ङ) को गार्हपत्योऽग्निः ?

(च) को दक्षिणाग्निः ?

(छ) आहवनीयोऽग्निः कः ?

## १३. अधस्तनसूत्राणामाधारेणानुच्छेदमेकं लिखत

वृद्धावस्थायां जनो जीर्णो भवति ।

सरलतया कार्याणि सम्पादयितुं न शक्नोति ।

जीवने काठिन्यं भवति ।

अन्येषां सहायताऽपेक्षते ।

पुत्रपौत्रादीनां सहयोगेनैव जीवनं सरलं भवति ।

सर्वे जना वृद्धा अवश्यमेव भविष्यन्ति ।

वृद्धसेवा विधातव्या ।

## १४. अधस्तनं प्रसङ्गं पठित्वा निर्दिष्टकार्याणि कुरुत

चाणक्यो बाल्यादेव जिज्ञासुर्विनयी चासीत् । स मातृभक्तश्चासीत् । कदाचिद् रुदतीं मातरं दृष्ट्वा सोऽतीव दुःखितः सञ्जातः । मातुः समक्षे गत्वा सोऽवदत्, “मातः ! किमर्थं रोदिषि ? का ते वेदना ?” माताऽवदत्, “पुत्र ! तव मुखे द्वौ सुन्दरौ दन्तौ स्तः, एतस्याधारेण त्वमवश्यमेव राजा भविष्यसि । यदि च त्वं राजा भविष्यसि, तर्हि मां विस्मरिष्यसि । त्वमेव मम सहायः । अहमेकाकिनी कथं जीवेयम् इति पीडा मामहरहर्बाधते ।”

मातुर्वचनं श्रुत्वा चाणक्यो हसन् गृहाद् बहिरगच्छत् । क्षणानन्तरं स्वस्य दन्तद्वयं हस्ते आदाय मातरं न्यवेदयत्, “मातः ! पश्य, मम तौ दन्तौ भग्नौ, यौ मां राजानं कारयिष्यतः, इतोऽहं सर्वदा तवैव समीपे निवसामि, त्वां परित्यज्य न कुत्रचिद् गमिष्यामि । सत्यावश्यके राष्ट्रसेवामवश्यमेव करिष्यामि, किन्तु सर्वदा तव सेवां करिष्यामि” इति ।

कालक्रमेण चाणक्यस्तक्षशिलायामधीत्य सुप्रसिद्धो विद्वान् बभूव । गुरवस्तस्मिन्नतीव स्नेहं कुर्वन्ति स्म । पश्चात् स स्वस्य देशे विशालां पाठशालां सञ्चालयामास । चाणक्योऽतीव सफलोऽभूत्, किन्तु मातृराजीवनं सेवां चकार ।

**(क) एकपदेनोत्तरयत**

(अ) को जिज्ञासुरासीत् ?

(आ) किमादाय चाणक्यो मातुः समक्षमगमत् ?

(इ) चाणक्यः कुत्राधीतवान् ?

(ई) कुत्र चाणक्यः पाठशालां सञ्चालयामास ?

**(ख) पूर्णवाक्येनोत्तरयत**

(अ) चाणक्यः कीदृश आसीत् ?

(आ) कदा चाणक्यो मातरं विस्मरिष्यतीति मातुश्चिन्ता वर्तते ?

(इ) मातुर्वचनं श्रुत्वा चाणक्यः किमकरोत् ?

(ई) गुरवः कीदृशं व्यवहारं कुर्वन्ति स्म ?

**(ग) प्रसङ्गाधारेण चाणक्यस्य वैशिष्ट्यं लिखत ।**

## व्यवहारानुशीलनम्

**१. स्वस्य गृहे वृद्धानां सम्मानस्य कीदृशी परम्परा वर्तते ? वृद्धजनैः सह कीदृशाश्च व्यवहारा विधीयन्ते ? तत्सर्वमभिनयमाध्यमेन कक्षायां दर्शयत ।**

**२. तव परिवार एकलपरिवारो वर्तते उत संयुक्तः ? तुभ्यं कीदृशः परिवारो रोचते ? किमर्थम् ? स्वाभिमतं प्रकटयत ।**

**३. समुचितविकल्पम् चिह्नेन योजयत**

**(क) मार्गे एकाकिनं वृद्धं दृष्ट्वा त्वं किं करोषि ?**

(अ) तं तिरस्करोमि ।

(आ) तमपश्यन्निवाग्रे गच्छामि ।

(इ) तस्य सहयोगं करोमि ।

(ई) तमुपहसामि ।

**(ख) तव गृहे पितामही वर्तते, तया सह त्वं किं कुरुषे ?**

(अ) तस्या मुखात् कथां शृणोमि ।

(आ) समये समये तस्याः सेवां करोमि ।

(इ) तस्यै आवश्यकानि वस्तूनि ददामि ।

(ई) उपर्युक्तं सर्वं करोमि ।

**(ग) तव गृहेऽतिथिं मान्यजनं वा समागतं दृष्ट्वा त्वं किं करोषि ?**

(अ) स्वस्य प्रकोष्ठे गत्वा तूष्णीं वसामि ।

(आ) स्वागतं करोमि, कुशलं च पृच्छामि ।

(इ) कठोरवचनं वदामि ।

(ई) तेन किमानीतमिति पृच्छामि ।

**(घ) विद्यालयेऽग्रजैः सह कीदृशं व्यवहारं करोषि ?**

(अ) कलहमुपहासं च करोमि ।

(आ) दुर्वचांसि प्रहरामि ।

(इ) तेषां सम्मानं सहयोगं च करोमि ।

(ई) तेषां सामग्रीरितस्ततः क्षिपामि ।

अष्टमः पाठः

# शान्तिस्तु सुखकारिका

यत्किञ्चिद् वस्तु सम्प्राप्य स्वल्पं वा यदि वा बहु ।
या तुष्टिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः ॥१॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥२॥
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥३॥
विहाय कामान् यः सर्वान् पुमाँश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥४॥
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥५॥
न शान्तिं लभते मूढो यतः शमितुमिच्छति ।
धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः ॥६॥

**१**
**पदच्छेदः**

यत्, किञ्चिद्, वस्तु, सम्प्राप्य, स्वल्पम्, वा, यदि, वा, बहु, या, तुष्टिः, जायते, चित्ते, सा, शान्तिः, कथ्यते, बुधैः ।

**अन्वयः**

स्वल्पं वा यदि वा बहु यत् किञ्चिद् वस्तु सम्प्राप्य चित्ते या तुष्टिः जायते बुधैः सा शान्तिः कथ्यते ।

**सरलार्थः**

ईप्सितस्य स्वल्पवस्तुनो महद्वस्तुनो वा प्राप्तौ हृदयस्य याऽनुभूतिर्भवति, तया चावस्थया मनागपि सन्तुष्टिर्जायते सा शान्तिरुच्यते ।

**२**
**पदच्छेदः**

न, अस्ति, बुद्धिः, अयुक्तस्य, न, च, अयुक्तस्य, भावना, न, च, अभावयतः, शान्तिः, अशान्तस्य, कुतः, सुखम् ।

**अन्वयः**

अयुक्तस्य बुद्धिः न अस्ति । अयुक्तस्य भावना च न अस्ति । अभावयतः शान्तिः च न अस्ति । कुतः अशान्तस्य सुखम् (भवति) ।

**सरलार्थः**

य इन्द्रियनिग्रहं कर्तुं न शक्नोति, यस्येन्द्रियाणि वशवर्तीनि नैव विद्यन्ते, तस्य पार्श्वे निश्चयात्मिका बुद्धिर्न भवति । तस्यान्तःकरणे सद्भावा अपि न जायन्ते । सद्भावनाहीनः शान्तिं नैव प्राप्नोति । अशान्तश्च सुखमाप्तुं नैव समर्थायते । अतः शान्तिः सुखकारिका भवति ।

**३**
**पदच्छेदः**

आपूर्यमाणम्, अचलप्रतिष्ठम्, समुद्रम्, आपः, प्रविशन्ति, यद्वत्, तद्वत्, कामाः, यम्, प्रविशन्ति, सर्वे, सः, शान्तिम्, आप्नोति, न, कामकामी ।

**अन्वयः**

यद्वद् आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं प्रविशन्ति तद्वत् सर्वे कामाः यं प्रविशन्ति, सः शान्तिम् आप्नोति । कामकामी न (आप्नोति) ।

**सरलार्थः**

अब्धिः सदैव जलपूर्णोऽविचलश्च भवति । यद्यपि तत्र समासां नदीनामापश्च सम्मिलन्ति, तथापि समुद्रः स्थिरस्तिष्ठति, विक्षिप्तो भूत्वा नैव सीमानमतिक्रामति । तथैव सर्वगुणसम्पन्नेऽपि ज्ञानिनि महापुरुषे विविधाः

कामनाः समाविशन्ति परं स ईषदपि विक्षिप्तो न भवति । अत एव स शान्तिमनुभवति । ये च सांसारिकेषु विषयेषु तृप्तिं नाधिगच्छन्ति, आधिक्येन सांसारिकविषयान् कामयन्ते, कामकामिनस्ते कदाचन शान्तिं नैव लभन्ते ।

**४**
**पदच्छेदः**

विहाय, कामान्, यः, सर्वान्, पुमान्, चरति, निःस्पृहः, निर्ममः, निरहङ्कारः, सः, शान्तिम्, अधिगच्छति ।

**अन्वयः**

यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारश्च चरति, सः शान्तिम् अधिगच्छति ।

**सरलार्थः**

यो मनुष्यः सांसारिकेषु विषयेषु मोहं त्यक्त्वा जीवति, कामनारहितो भूत्वा जीवनमात्रं चेष्टते, कस्मिन्नपि विषये 'इदं मम' इति भावं परित्यज्य 'परमात्मन इदम्' इत्याशयं सन्दधाति, 'अहमेव सर्वम्' इत्यभिमानञ्च परिहरति, स एव शान्तिमाप्नोति ।

**५**
**पदच्छेदः**

श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः, ज्ञानम्, लब्ध्वा, पराम्, शान्तिम्, अचिरेण, अधिगच्छति ।

**अन्वयः**

संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । ज्ञानं लब्ध्वा (सः) अचिरेण (एव) परां शान्तिम् अधिगच्छति ।

**सरलार्थः**

यस्य जनस्य श्रोत्रादीनि इन्द्रियाणि वशीकृतानि सन्ति, यः स्वकर्मसु परायणो विद्यते, यो ज्ञानप्राप्त्यै श्रद्धायुक्तश्चास्ति, सोऽवश्यमेव ज्ञानं प्राप्नोति । ज्ञानं प्राप्य स क्षिप्रमेव भगवत्प्राप्तिरूपां परां शान्तिञ्च लभते ।

**६**
**पदच्छेदः**

न, शान्तिम्, लभते, मूढः, यतः, शमितुम्, इच्छति, धीरः, तत्त्वम्, विनिश्चित्य, सर्वदा, शान्तमानसः ।

### अन्वयः

मूढः शान्तिं न लभते यतः शमितुम् इच्छति । धीरः तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः (भवति) ।

### सरलार्थः

मूर्खो जनः शान्तो भवितुं प्रकर्षेण वाञ्छति, अतः स शान्तिं न लभते । सुधीर्जनस्तु तत्त्वं वेत्ति अतः स एव शान्तिं लभते । तस्य मनः सर्वदैव शान्तं भवति ।

## शिक्षणालोकः

सुखानुभूत्यै शान्तेरावश्यकताविषये विद्यार्थिनो बोधनीयाः । सम्बद्धान्यन्यानि पद्यानि, सम्बद्धा विविधाः कथाश्चान्विष्य श्रावणाय ते समुत्प्रेरणीयाः । शान्तिप्राप्तये च सदा मनसो वशीकरणाय ते प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्थान् श्लोकान् सस्वरं वाचयत ।**

२. **पाठस्थानां पद्यानामनुलेखनं कुरुत ।**

३. **अधस्तनस्य श्लोकस्य पदच्छेदं कुरुत**

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥

४. **निर्दिष्टस्य पद्यस्यान्वयं विधत्त**

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

५. **अधोलिखितानि पदानि प्रयुज्य प्रतिपदं सन्देशप्रदं वाक्यमेकं रचयत**

चित्ते, कथ्यते, भावना, कुतः, विहाय, अधिगच्छति, लब्ध्वा, मूढः, शान्तिम्, सर्वदा ।

६. **प्रदत्तपद्यस्यार्थं नेपालीभाषायां लिखत**

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

७. **मिथः पद्यांशानां मेलनं विधत्त**

| | |
|---|---|
| (क) यत्किञ्चिद् वस्तु सम्प्राप्य | स शान्तिमधिगच्छति । |
| (ख) नास्ति बुद्धिरयुक्तस्य | अचिरेणाधिगच्छति । |
| (ग) आपूर्यमाणमचलप्रतिष्ठम् | सा शान्तिः कथ्यते बुधैः । |
| (घ) श्रद्धावाँल्लभते ज्ञानम् | अशान्तस्य कुतः सुखम् । |
| (ङ) विहाय कामान् यः सर्वान् | सर्वदा शान्तमानसः । |
| | स शान्तिमाप्नोति न कामकामी । |

## ८. सत्यासत्यविवेकं विधत्त

(क) चित्ते सञ्जाता तुष्टिरेव शान्तिरुच्यते ।

(ख) अशान्तो जनः शान्तिं लभते ।

(ग) शान्तिः सुखकारिका न भवति ।

(घ) समुद्रो जलाधिक्येन सीमानमतिक्रामति ।

(ङ) सांसारिकेषु विषयेषु तृप्तो मनुष्यः शान्तिमाप्नोति ।

(च) मूढः शान्तिं प्राप्नोति ।

## ९. पाठाधारेण कोष्ठस्थं सर्वोपयुक्तमुत्तरमवचित्य वाक्यपूर्तिर्विधेया

(क) .......... नरः शान्तिं न लभते । (सुखी, ज्ञानी, विवेकी, अभिमानी)

(ख) सर्वकर्मसु परायणो नरः .......... प्राप्नोति । (ज्ञानम्, धनम्, दुःखम्, बलम्)

(ग) शान्तिकामः .......... इति भावं गृह्णाति । (अहं सर्वम्, सर्वं मम, इदं मम, इदं न मम)

(घ) धीरः .......... शान्तिं प्राप्नोति । (कदा, एकदा, सर्वदा, दुःखदा)

## १०. सङ्क्षेपेणोत्तरयत

(क) का शान्तिरुच्यते ?

(ख) सुखप्राप्तये कोऽसमर्थो भवति ?

(ग) कामकामी कीदृशो भवति ?

(घ) कः क्षिप्रमेव परां शान्तिं लभते ?

(ङ) मूढः किमिच्छति ?

## ११. श्लोकं पठित्वा स्वगिरा प्रदत्तप्रश्नानुत्तरयत

अन्तो नास्ति पिपासायाः सन्तोषः परमं सुखम् ।
तस्मात् सन्तोषमेवेह परं पश्यन्ति पण्डिताः ॥

(क) कस्या अन्तो न भवति ?

(ख) परमं सुखं किमस्ति ?

(ग) पण्डिताः किं परं पश्यन्ति ?

(घ) सन्तोषसुखस्य विषये वाक्यत्रयं लिखत ।

## १२. श्लोकं पठित्वा स्वगिरा सरलार्थं लिखत

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते,
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालम्,
सन्तोष एव पुरुषस्य परं निधानम् ॥

## १३. अधोलिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

वर्तमाने संसारेऽशान्तिर्व्याप्ता दृश्यते । सा मानवताया विनाशस्य कारणमस्ति । इदानीं विध्वंसकानि विविधानि शस्त्रास्त्राण्याविष्कृतानि दृश्यन्ते । अनेकेषु देशेष्वान्तरिकीं समस्यामाश्रित्य कलहः प्रचलन्नस्ति, तेन शत्रुराष्ट्राणि मोदमानानि सम्भूय समस्यां वर्धयन्ति । एको देशोऽपरस्योन्नतिं दृष्ट्वा द्वेष्टि, तन्निवारणार्थं प्रयतते च । वस्तुतोऽशान्तेः कारणानि स्वार्थो द्वेषोऽसहिष्णुत्वञ्चेत्यादीनि दृश्यन्ते । द्वेष एवासहिष्णुत्वं जनयति । स्वार्थश्च वैरभावं प्रवर्धयति । स्वार्थयुक्तो जनोऽहम्भावेन परस्यास्तित्वम्, धर्मम्, जातिम्, भाषाम्, क्षेत्रं वा न सहते । स आत्मानमेव अहं सर्वम्, इदं मम इत्यादिकं मनुते । तन्नोपयुक्तम् । अतः संसारे सन्ति ये पदार्थास्ते सर्वे ईश्वरस्यैवांशभूता इति मन्यमाना वयं वसुधैव कुटुम्बकमिति भावयन्त उदारचरिता भवेम ।

**(अ) एकपदेनोत्तरयत**

(क) संसारे का व्याप्ता दृश्यते ?

(ख) देशेषु किमाश्रित्य कलहः प्रचलन्नस्ति ?

(ग) को वैरभावं वर्धयति ?

(घ) स्वार्थी केन परस्यास्तित्वं न सहते ?

(ङ) क आत्मानमेव सर्वं मनुते ?

(च) अनुच्छेदस्योपयुक्तं शीर्षकं किम् ?

**(आ) एकवाक्येनोत्तरयत**

(क) मानवताया विनाशस्य कारणं किमस्ति ?

(ख) शत्रुराष्ट्राणि केन समस्यां वर्धयन्ति ?

(ग) अशान्तेः कारणानि कानि ?

(घ) ईश्वरस्यांशभूताः के ?

(ङ) द्वेषशब्दस्य प्रयोगेण सन्देशमूलं वाक्यमेकं रचयत ।

## व्यवहारानुशीलनम्

१. त्वं कथं शान्तिमधिगन्तुं प्रयतसे ? एकं लघुनिबन्धं रचयत ।

२. आत्मना विहितैः कार्यैस्तव मनः पूर्णतोंऽशतो वा शान्तं भवति ? समीक्ष्यताम् ।

३. समुचितमुत्तरं (✓) चिह्नेनाङ्कयत

(क) **तवापेक्षया बान्धवोऽधिकमूल्याङ्किकतां घटिकां धारितवानस्ति चेत् त्वं किं विचारयसि ?**

(अ) सा घटिका कथं मदीया भवति ? (आ) तादृशीमेव घटिकां क्रेष्यामि ।

(इ) तदधिकमूल्यां घटिकां क्रेष्यामि । (ई) घटिकायाः प्रयोजनं तु समयज्ञानमेव ।

(ख) **अपरस्य वञ्चने त्वया किमनुभूयते ?**

(अ) सुखम् । (आ) दुःखम् ।

(इ) पश्चात्तापः । (ई) शान्तिः ।

(ग) **तव स्वर्णाङ्गुलीयकं कूपे निपतितम्, कृतेऽपि यत्ने नैव प्राप्तम्, तदा किं करोषि ?**

(अ) ईश्वरेण दत्तमासीत्, तेनैव विनष्टमिति चिन्तयामि ।

(आ) अहर्निशं रोदिमि ।

(इ) अद्यैवापरं क्रेतुं पितरमवसादयामि ।

(ई) कस्मैचन न निवेदयामि ।

(घ) **त्वया कठोरसाध्यं कर्म विहितम्, परिणामस्तु न्यूनो जातश्चेत् तव मनसि को विचारो जायते ?**

(अ) इतोऽनन्तरं कदापि कर्म न करिष्यामि ।

(आ) कर्मण्येव ममाधिकारोऽस्तीति विचारयामि ।

(इ) अपरं कर्म सोपायं सम्पादयिष्यामि ।

(ई) धिङ् माम्, धिङ् मामिति विचारयामि ।

नवमः पाठः

# कर्तव्यपरायणः पुत्रो गरुडः

प्राचीनकालस्य प्रसङ्गोऽस्ति। कद्रुर्विनता च ऋषेः कश्यपस्य द्वौ पत्न्यौ आस्ताम्। समुद्रमथनं द्रष्टुं ते समागते आस्ताम्। देवैर्दानवैश्चैकीभूय सुधाप्राप्त्यर्थं समुद्रमथनं विहितमासीत्। कद्रुः सर्वेषां नागानां माताऽऽसीत्। विनता तु गरुडारुणयोर्जननी। समुद्रस्य मथनकाले बहूनि वस्तूनि निर्गतानि। वस्तूनां निःसरणक्रमे उच्चैःश्रवोनामकः सुन्दरः श्वेतवर्णो घोटकश्च समुद्रान्निःसृतः।

तद् दृष्ट्वा विनता उक्तवती- 'अहो ! कीदृशो मनोहरः श्वेतवर्णो घोटकः ?' विनतायास्तद्वचनं श्रुत्वा दुष्टस्वभावा कद्रुर्मनसैव दुर्भावं धृत्वा कथितवती- 'घोटकस्य शरीरस्य वर्णोऽवश्यं श्वेतोऽस्ति परन्तु तस्य पुच्छस्य वर्णस्तु कृष्णो वर्तते।



घोटकपुच्छस्य वर्णस्य विषये द्वयोर्मध्ये विवादः सञ्जातः। विवादे सति उभयोर्मध्ये ग्लहो निर्धारितः। 'या पराजयं लभते, सा विजयिन्याः दासी भविष्यति' इति तयोर्विवादस्य ग्लह आसीत्। तद्विषये दूरतो दृष्ट्वा परीक्षा करिष्यते, परीक्षा श्वो भविष्यतीति च निश्चितम्। घोटकस्य पुच्छं कृष्णं कृत्वा स्वभगिनीं विनतां पराजित्य तां सदा दासीं सम्पादयितुं कद्रुर्योजनामकरोत्।

गृहं प्राप्य कद्रुः सर्वान् पुत्रानकथयत्- 'हे पुत्राः! येन केनापि प्रकारेण उच्चैःश्रवोघोटकस्य पुच्छं श्वः कृष्णीकुर्वन्तु। तेन विनताऽऽजीवनं मम दासी भविष्यति।' पुण्यशीलो ज्येष्ठः पुत्रः शेषनागः स्वमातुः कुटिलां नीतिं ज्ञात्वा तदाज्ञामविगणय्य तपस्तप्तुमगच्छत्। अन्ये तु मातुः कथनानुसारेण तस्याः कुटिलयोजनायां संलग्ना अभवन्। अपरस्मिन् दिने ते प्रातःकाले स्वकृष्णशरीरैर्घोटकपुच्छं वेष्टयित्वा स्थिताः।

पूर्वदिनस्य योजनानुसारेण कद्रुविनते च दूरादेव घोटकपुच्छं दृष्टवत्यौ। पुच्छन्तु कृष्णवर्णमासीत्। विनता कद्रुसहितानां नागानां कपटेन ग्लहे पराजिता भूत्वा भगिन्याः कद्रोः दास्यं स्वीकृतवती। तदनन्तरं विनता कष्टेन दासीजीवनं यापयति स्म। एकदा कद्रुर्दासीं विनतामादिष्टवती- 'आत्मानं स्वपुत्राँश्चोढ्वा समुद्रस्य अन्तःस्थं सुन्दरमुपवनं नय' इति। तान् सर्वानूढ्वा नेतुमसमर्था सती विनता तत्कार्यं सम्पादयितुं स्वपुत्रं गरुडमादिष्टवती। मात्राज्ञया गरुडस्तत्कार्यमकरोत्। ततः पुनरन्यं रमणीयं स्थानं प्रति नेतुं सर्पाः दासमिव गरुडमादिशन्।

तैः सहात्मीयसम्बन्धस्य सत्त्वेऽपि तेषां तथाविधेन दमनव्यवहारेण गरुडः सशङ्को जातः। शङ्कानिवारणाय तेषां सेवाकार्यस्य रहस्यविषये तेन माता विनता पृष्टा। माता कद्रुसहितानां सर्पाणां सर्वमपि षड्यन्त्रवृत्तान्तं कथितवती। गरुडः मातुर्दास्यमोचनोपायं कद्रुमपृच्छत्। कद्रुः कथितवती-'स्वर्गादमृतमानीय मत्पुत्रेभ्यो दीयते चेद् दास्याद् विनता मुक्ता भविष्यति' इति।

गरुडः सर्वसमर्थ आसीत् परन्तु अमृतस्य प्राप्तिस्तथा सहजा नासीत्। गरुडोऽमृतमानेतुं प्रस्थितः। मार्गे पित्रा कश्यपेन सह मेलनमभवत्। गरुडः स्वस्य तदानीन्तनस्य कर्तव्यकार्यस्य विषये सर्वं वृत्तान्तं पित्रे न्यवेदयत्। पिता कश्यपश्च कार्यसाफल्याय आशिषः प्रायच्छत्।

मार्गे भोजनं कृत्वा गरुडः पुनः स्वर्गं प्रति उड्डयनमकरोत्। अतिविशालः पक्षी गरुडो यदा स्वर्गस्य निकटे प्राप्नोत्, तदानीं तस्य उड्डयनवेगेन स्वर्गोऽकम्पत, अन्तरिक्षञ्च रजःपूरितमभवत्। तेन सर्वे स्वर्गस्था देवा विचलिता जाताः। गुरुर्बृहस्पतिर्गरुडस्यासीमं सामर्थ्यं सूचयित्वाऽमृतं प्राप्तुं स आगत इति देवानज्ञापयत्। अग्निः, वायुः, वरुणः, वसवः, गन्धर्वाश्च मिलित्वा गरुडं वारयितुं प्रवृत्ताः। गरुडेन सह तेषां तुमुलं युद्धमभवत्। इन्द्रस्य वज्रप्रहारश्च निष्फलताङ्गतः।

गरुडस्य चञ्चुना, नखैः, पक्षाभ्याम्, शरीरेण च सर्वे पीडिता अभवन्। अमृतस्य रक्षणार्थं विश्वकर्मा अमृतघटस्य निकटे सन्नद्ध आसीत्। गरुडेन सह युद्धे स च पराजयं लेभे। अमृतघटस्य निकटं प्राप्तः गरुडस्तद्घटं परितः प्रज्वलितमनलमपश्यत्। सद्यः समुद्रं प्राप्य गरुडः स्वचञ्चुना समुद्रजलमानीय अग्नौ पातयन् तत्र प्राविशत्।

अमृतघटस्य बाह्यभागे अयश्चक्रं भ्रमन् आसीत्। गरुडः सूक्ष्मेण स्वरूपेण भ्रमन् तदन्तः प्राविशत्। चक्रस्यान्तर्भागेऽतीव क्रुद्धा नेत्रविषाः सर्पा आसन्। गरुडस्तत्रत्यं स्थानं धूलिमयं कृत्वा सर्पौ मर्दयित्वा हतवान्। एवंरीत्या गरुडः स्वर्गादमृतघटं गृहीत्वा प्रत्यागतः।



प्रत्यागमनकाले मार्गे पुनरिन्द्रेण सह मेलनमभवत्। अमृतं प्रतिदातुमिन्द्रो निवेदितवान् परन्तु गरुडेन तन्न स्वीकृतम्। ततस्तयोर्मध्ये सन्धिरभवत्। सन्ध्यनुसारेण यदा गरुडोऽमृतघटं सर्पेभ्यो दत्त्वा मातरं विनतां दासतायाः विमोचयिष्यति, तत्समकालमेवेन्द्रोऽमृतघटं ग्रहीष्यति। तेन सन्धिना प्रसन्न इन्द्रो गरुडाय सर्पभोजनसामर्थ्यरूपं वरमयच्छत्। योजनानुसारेणैव कार्यं सम्पन्नम्।

गरुडः सर्पेभ्योऽमृतघटमदात्, स्नात्वा अमृतपानाय च तानन्वरुणत्। यदा सर्पाः स्नानार्थं गताः, तदानीमेव इन्द्रोऽमृतघटं गृहीत्वा ततो निर्गतवान्। अमृतन्तु नासीत् तथापि स्नानानन्तरं प्रत्यागताः सर्पाः अमृतघटाधारान् कुशानलिहन्। कुशैर्जिह्वायाश्छिन्नत्वात् ते द्विजिह्वा जाताः।

एवं गरुडो मातरं विनतां दास्यान्मोचितवान्। तदनन्तरं विनता महत् सुखं प्राप। सर्पैः स्वमात्रे दत्तं कष्टं स्मारं स्मारं गरुडोऽद्यापि सर्पान् भुङ्क्ते।

## शिक्षणालोकः

इयं नीतिप्रदा पौराणिकी कथा। अस्याः शिक्षणं तथा कार्यम्, येन छात्रा मातृसेवायै उद्यताः स्युः, जीवने आपतितानां समस्यानां समाधानाय च सदैव युक्त्या कार्यं कुर्युः। तदर्थं मातृमहिमबोधकानां पद्यानां तादृक्कथाप्रसङ्गानां चोपयोगः सान्वेषणं शिक्षकैः कार्यः।

## अभ्यासः

### पाठानुशीलनम्

#### १. सङ्क्षेपेण उत्तरयत

(क) कद्रुः केषां माताऽऽसीत् ?

(ख) कद्रुर्मनसा कीदृशं दुर्भावं धृतवती ?

(ग) गरुडारुणयोर्जननी काऽऽसीत् ?

(घ) ऋषेः कश्यपस्य पत्न्यौ के आस्ताम् ?

(ङ) कैः समुद्रमथनं प्रारब्धमासीत् ?

(च) कश्यपस्य पत्न्यौ किमर्थं तत्र समागतवत्यौ ?

(छ) उच्चैःश्रवोनामको घोटकः कीदृश आसीत् ?

(ज) समुद्रमथनकाले कियन्ति वस्तूनि निर्गतानि ?

#### २. पाठस्य नवमानुच्छेदस्य श्रुतिलेखनं कुरुत ।

#### ३. सत्यासत्यं विवेचयत

(क) सर्पाः सर्वसमर्था आसन् ।

(ख) गरुडोऽग्निमानेतुं प्रस्थितः ।

(ग) गरुडो लघुकायः पक्षी अस्ति ।

(घ) अमृतस्य प्राप्तिः सहजाऽऽसीत् ।

(ङ) गरुडः पर्वतं प्रति उड्डयनमकरोत् ।

(च) कश्यपो गरुडाय आशिषो नायच्छत् ।

(छ) गरुडस्य उड्डयनवेगेन समुद्रोऽकम्पत ।

(ज) गरुडस्योपरि इन्द्रस्य वज्रप्रहारः साफल्यङ्गतः ।

#### ४. अधोलिखितं श्लोकं पठित्वा प्रश्नानुत्तरयत

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

(क) उन्नतौ महात्मनां स्वभावः कः ?

(ख) सभायां महात्मानः किं प्रदर्शयन्ति ?

(ग) कुत्र महात्मानः पराक्रमिणो दृश्यन्ते ?

(घ) महात्मानो विपदि किं धारयन्ति ?

(ङ) कस्मिन् विषये तेषामभिरुचिर्भवति ?

## ५. अधोलिखितस्य कथनस्याशयं स्फुटीकुरुत

योजनानुसारेणैव कार्यं सम्पन्नम् ।

## ६. कथायाः सन्देशं विवृणुत ।

## ७. अनुच्छेदं पठित्वा तदाधृतान् प्रश्नानुत्तरयत

ये परप्राणान् हर्तुं ग्रहीतुं वा कदापि सङ्कोचं न कुर्वन्ति, तेऽसुराः सन्ति । असुरा विशेषतः सुराणां शत्रवो वर्तन्ते । ते सर्वदैव सुरान् पीडयितुमवसरं प्रतीक्षन्ते । ते तादृगवसरे स्वल्पे प्राप्तेऽपि सद्य उपद्रवं कुर्वन्ति । एकस्मिन् समयेऽसुराः स्वर्गमाक्रमितवन्तः । असुरैः सुराः पराजिताः । तत्र सुराणां पार्श्वे कोऽप्युपायो नावशिष्टः । स्वर्गं त्यक्त्वा ते पलायिताः ।

सुराः साहाय्यं याचितुं खट्वाङ्गस्य पार्श्वे गताः । सोऽपि स्वभावानुसारेण सद्यः स्वर्गं गत्वाऽसुरैः सह युद्धं चकार । कतिपयदिनानि युद्धं कृत्वा तेषामुपरि विजयं प्राप्य स प्रत्यागन्तुं प्रवृत्तः । देवास्तत्कृतेन साहाय्येन कृतार्थाः सन्तो विनयेनावदन्- "महात्मन् ! धन्यवादः । भवदुपकारोऽमूल्यः । तन्मूल्यं प्रदातुं वयं समर्था न स्मः तथापि भवान् किमपि अपेक्षते चेद् वक्तुं शक्नोति ।"

देवानामाग्रहं श्रुत्वा खट्वाङ्गः किमपि चिन्तयित्वा अवदत्– "किं वदानि ! ईश्वरस्य प्रसादेन सर्वं परिपूर्णमस्ति । मुख्यन्तु मनो वर्तते । असन्तुष्टे मनसि किमपि पर्याप्तं नानुभूयते । आयुरस्ति चेद् वैभवं सार्थकं भवति । नोचेत्तु वैभवमपि व्यर्थम् । यदि भवन्तः सन्तुष्टाः सन्ति, तर्हि वदन्तु ममायुः कियदवशिष्टं वर्तते ?" तस्य वचनं श्रुत्वा देवा विस्मयङ्गताः ।

अथ देवास्तस्य दैवं पश्यन्तोऽवदन्- "जीवनाय भवत आयुः केवलं घटिकाद्वयमवशिष्टं वर्तते । अधुना भवते किमावश्यकम्, कथयतु ?" ततः स किमपि उत्तरं न दत्त्वा ईश्वरध्यानायोपविष्टवान् । अन्ते स तस्य घटिकाद्वयस्य सदुपयोगं कृत्वा मुक्तिं प्राप्तवान् ।

(क) किं मुख्यं वर्तते ?

(ख) के असुरा भवन्ति ?

(ग) असुरैः के पराजिताः ?

(घ) असुराः सद्यः किं कुर्वन्ति ?

(ङ) सुराः किं त्यक्त्वा पलायिताः ?

(च) सुराः साहाय्यं याचितुं कुत्र गताः ?

(छ) असुरा विशेषतः केषां शत्रवः भवन्ति ?

(ज) असुराः कान् पीडयितुमवसरं प्रतीक्षन्ते ?

(झ) खट्वाङ्गः स्वर्गं गत्वा कैः सह युद्धं चकार ?

(ञ) कस्मिन्नसन्तुष्टे किमपि पर्याप्तं नानुभूयते ?

**८. शिक्षकस्य साहाय्येन निम्नलिखितस्य श्लोकस्य भावार्थं लिखत**

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ॥

**९. गरुडस्य विषये ज्ञाततथ्यान्याधृत्यानुच्छेदमेकं विरच्य तन्नीतिसन्देशं च प्रस्तुत ।**

## व्यवहारानुशीलनम्

**१. कथायाः सन्देशं त्वया जीवने कथं प्रयुज्यते ? स्वाशयं लिखत ।**

**२. लक्ष्यप्राप्तये यूयं कथमुत्साहप्रयोगं कुरुथ ? कक्षायां विमृशत ।**

**३. कार्यसम्पादनाय धूर्ततायाः प्रयोगं त्वमुचितमनुचितं वा मनुषे ? स्वतर्कान् प्रस्तुत ।**

**४. समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

**(क) कश्चन तवावमानमकरोच्चेत् त्वं किं करोषि ?**

(अ) तस्माद् दूरं गच्छामि ।

(आ) तस्मै धन्यवादं यच्छामि ।

(इ) सद्यस्तेन सह मल्लयुद्धं करोमि ।

(ई) पुनस्तथा न भवेदित्यत्र भद्रमुपायं विचिन्त्य प्रयुनज्मि ।

**(ख) अस्माकं प्रथमा पाठशाला का ?**

(अ) समाजः ।

(आ) परिवारः ।

(इ) विद्यालयः ।

(ई) पुस्तकानि ।

**(ग) सदाचरणाय किमावश्यकम् ?**

(अ) अधिकानां ग्रन्थानां पठनम् ।

(आ) महद्भिः सह मेलनम् ।

(इ) सदैव सन्मार्गे प्रवर्तनम् ।

(ई) दुराचारस्य निन्दनम् ।

**(घ) व्यक्तित्वं कथमादर्शमयं भवति ?**

(अ) आदर्शचरित्रेण ।

(आ) शास्त्रस्य ज्ञानेन ।

(इ) परम्परायाः संरक्षणेन ।

(ई) बहुधनस्य सङ्ग्रहेण ।

## परियोजना

१. मातृसेवार्थं कृतानां दश कार्याणां विवरणं ससन्दर्भं लिखित्वा शिक्षकाय अर्पयत ।

२. प्रेरिकाः पञ्च पौराणिकीः कथा अन्विष्य ताः स्वभाषया लिखित्वा लघ्वीं कथासङ्ग्रहपुस्तिकां निर्मात ।

दशमः पाठः

# भगिन्या अन्नप्राशनम्

(आरोग्यः सुधांशुश्च सखायौ स्तः । तौ ग्रामस्य समीपस्थे विद्यालये नवमकक्षायां पठतः । चतुष्पथे मिलित्वा तौ प्रतिदिनं सहैव विद्यालयं गच्छतः । एकदा सुधांशुर्विलम्बेनागच्छत् । मार्गे सहैव गच्छतोस्तयोस्तस्य दिनस्य संवाद एवमस्ति ।)



आरोग्यः भो सुधांशो ! अद्य तु विलम्बो जातः ।

सुधांशुः क्षम्यतां सखे !

आरोग्यः किमर्थं विलम्बः कृतः ?

सुधांशुः अद्य मम गृहे भगिन्या अन्नप्राशन-संस्कारस्य आयोजना विहिताऽस्ति । अतो विलम्बो जातः ।

आरोग्यः किन्नाम अन्नप्राशनम् ?

सुधांशुः अन्नस्यौदनादेः प्राशनं भोजनमन्नप्राशनमुच्यते ।

आरोग्यः अन्नस्य भोजनं तु वयं सदैव कुर्मः । तदप्यन्नप्राशनमुच्यते किम् ?

सुधांशुः तदपि अन्नप्राशनं तु अस्ति, परं संस्काररूपेण जन्मतः प्रथमवारं यदन्नप्राशनं विधीयते, तदेव प्रसिद्धम् । मानवजीवने गर्भाधानादयः षोडश संस्काराः प्रसिद्धाः सन्ति । तेषु अन्नप्राशनाख्यः संस्कार एको वर्तते ।

आरोग्यः तेषां संस्काराणां काऽऽवश्यकता ?

सुधांशुः यथा घृतार्थं पयसस्तपनम्, दधिनिर्माणम्, दध्नो मथनमित्यादिरूपाणां संस्काराणामावश्यकता भवति तथैव जीवनस्य परिष्कारार्थं परिपूर्णतायै च तादृशाः संस्कारा अपरिहार्या मन्यन्ते । शास्त्रेषु संस्कारहीनानां निन्दा विहिताऽस्ति ।

आरोग्यः अयं संस्कारः कदा क्रियते ?

सुधांशुः अस्य संस्कारस्य नियतकालो जन्मतः षष्ठो मासोऽस्ति । अस्माकं परम्परायां पञ्चमे सप्तमे वा मासे पुत्र्याः, षष्ठेऽष्टमे वा मासे पुत्रस्यान्नप्राशनं विधीयते ।

आरोग्यः पञ्चमासपर्यन्तं तव भगिनी किमपि न खादितवती वा ? कथं जीवितवती सा ?

सुधांशुः तन्न । इयत्कालपर्यन्तं तस्या अन्नपाचनशक्तिर्निर्बला वर्तते । अतः सा मातुः स्तनपानमेव करोति ।

आरोग्यः अहो ! धन्या त्वदीया माता । धन्याऽमृतवाहिनी मातृशक्तिः । एकस्मिन् कार्यक्रमे मयापि श्रुतमासीत् - 'षण्मासं यावन्नवजातशिशोः स्तनपाने नैसर्गिक अधिकारो भवति, द्विवर्षपर्यन्तं नियमितरूपेण शिशोः स्तनपानविधानं मातुः कर्तव्यं भवति' इति ।

सुधांशुः सत्यमेतत् । तावत् कस्यापि शिशोः कृते मातुः स्तनपानमेव पर्याप्तं भवति, अन्येषामाहाराणामावश्यकता न भवति । मातुः स्तनपानेन शरीरस्य कृते सर्वाणि पौष्टिकानि तत्त्वानि प्राप्तुं शिशुः समर्थायते । रोगप्रतिरोधिका क्षमता च मातृस्तन्येनाभिवर्धते ।

आरोग्यः आधुनिकाः स्त्रियस्तु शारीरिकसौन्दर्यमभिलक्ष्य शिशुं स्तन्यं पाययितुं नेच्छन्तीति श्रूयते । अत्र किं तवाभिमतम् ?

सुधांशुः मित्र ! तथैव श्रुतं मयाऽपि । आत्मनः शारीरिकं सौन्दर्यं विनश्यतीति मत्वा ते स्तन्यं पाययितुं न कामयन्ते । परं तदुचितं नास्ति । स्तन्यप्रदानेन मातुरपि स्वास्थ्यं शोभनं जायते ।

आरोग्यः अस्माकं शरीरमन्नमयमस्तीति श्रुतमासीत् । एवं चेत् किमर्थं स्तन्यस्यावश्यकत्वम् ?

सुधांशुः आम् । अन्नमयस्यास्य शरीरस्य विकासाय खाद्यान्नस्यावश्यकता भवत्येव । परं जन्मसमकालमेवान्नपाचनसामर्थ्यं न भवति शिशौ । अतोऽस्माकं पूर्वजैर्महर्षिभिरन्नप्राशनसंस्कारस्य विशेषः कालो व्यवस्थापितः ।

आरोग्यः अहो ! अस्माकं संस्कृतिः कियद्वैज्ञानिकी अस्ति ? धन्या नः पूर्वजाः, मान्या धन्या च पौरस्त्यसंस्कृतिः ।

सुधांशुः शोभनम् । अस्यां पुण्यभूमौ जाता वयमपि धन्याः स्मः । जीवनस्यारोग्यतायै अस्मत्पूर्वजैर्जीवनशैली परिष्कृताऽस्ति । तस्या अनुसरणमस्माकं कर्तव्यं वर्तते ।

आरोग्यः तव कथनं मह्यमरोचत । अन्नप्राशने किं किं प्राश्यते ?

सुधांशुः तदा मधुरादीन् षड् रसानेकीकृत्य प्राशनीयमिति शास्त्रेषु निर्दिष्टमस्ति । परमस्माकं समुदाये मधुघृतादिमिश्रतं पायसं प्राश्यते ।

आरोग्यः अद्य तव गृहे कानि कार्याणि विहितानि ?

सुधांशुः अद्य मम गृहे अनेके बान्धवाः समागताः सन्ति । मम मातापित्रादयः शौचस्नानादिकं नित्यकर्म समाप्य प्रातःकालादेव स्वेषु स्वेषु कर्मसु संलग्ना आसन् । तत्र होमविधिना देवयज्ञं सम्पाद्य भगिन्या अन्नप्राशनं विहितम् । मान्यजनाश्च भगिन्यै आशिषं दत्तवन्तः । इदानीं पितरौ भगिनीमादाय देवदर्शनार्थं मन्दिरं गतवन्तौ स्तः ।

आरोग्यः शोभनम् । अहो ! घटिकायां दशवादनसमयो जातः ।

सुधांशुः अस्तु । अध्ययनं समाप्य पुनः संवदाव ।

(द्वावेव कक्षायां गतवन्तौ)

## शिक्षणालोकः

विद्यार्थिनः षोडशसंस्काराणां विषये सम्यङ्निर्देष्टव्याः । स्वसंस्कृतेरनुसरणं श्रेयस्करं भवतीति ते बोधनीयाः । सति सम्भवे समुदाये समायोजिताः संस्कारक्रियाश्च दर्शनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

**१. सस्वरं साभिनयं सार्थबोधं च पाठं श्रावयत ।**

**२. पाठस्य सारांशं कथयत ।**

**३. सङ्क्षेपेणोत्तरयत**

(क) आरोग्यः सुधांशुश्च कुत्र मिलित्वा कुत्र गच्छन्तौ स्तः ?

(ख) अन्नप्राशनं किम् ?

(ग) संस्काराणां काऽऽवश्यकता ?

(घ) अन्नप्राशनं कदा क्रियते ?

(ङ) शिशोर्नैसर्गिकोऽधिकारः कः ?

(च) मातुः कर्तव्यं किम् ?

(छ) स्तन्यपानेन को लाभो भवति ?

(ज) किमस्माकं कर्तव्यम् ?

**४. पाठाधारेण सत्यासत्यविवेको विधेयः**

(क) सुधांशुः सदैव विलम्बं करोति ।

(ख) षोडशसंस्काराः प्रसिद्धाः सन्ति ।

(ग) संस्कारा इच्छाधीना भवन्ति ।

(घ) अन्नपाचनशक्तिर्जन्मन एव सबला भवति ।

(ङ) नवजातशिशोः कृते स्तन्यपानमपर्याप्तं भवति ।

(च) सुधांशोर्गृहेऽन्नप्राशनस्यावसरे होमो विहितः ।

**५. अधस्तनकथनस्य कथयितारं निर्दिशत**

(क) अन्नस्य प्राशनमेवान्नप्राशनम् ।

(ख) संस्कारहीनानां निन्दा विहिताऽस्ति ।

(ग) अमृतवाहिनी मातृशक्तिर्धन्या ।

(घ) अस्माकं संस्कृतिर्वैज्ञानिकी वर्तते ।

(ङ) अस्माकं शरीरमन्नमयम् ।

## ६. अधः प्रदत्तानि पदानि प्रयुज्य नीतिवाक्यानि रचयत

विलम्बेन, परम्परायाम्, सपदि, संस्काराणाम्, अनुसरणम्, निन्दा, शीघ्रम् ।

## ७. परस्परं विशेष्यविशेषणयोर्मेलनं कुरुत

| | |
|---|---|
| संस्काराः | आधुनिकाः |
| माता | अमृतवाहिनी |
| अधिकारः | वैज्ञानिकी |
| तत्त्वानि | प्रसिद्धाः |
| स्त्रियः | पुरातनी |
| मातृशक्तिः | धन्या |
| संस्कृतिः | पौष्टिकानि |
| | नैसर्गिकः |

## ८. प्रदत्तस्य श्लोकस्य सरलार्थं पठित्वा सखिभिः सह विमृशत

न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।

**सरलार्थः**

इह संसारे यान्यखिलानि धनानि सन्ति, तेषु सर्वोत्कृष्टं धनं विद्याधनं वर्तते । धनमिदं हर्तुं चौरो न समर्थयते । राजाऽपीदं धनं हर्तुं नैव शक्नोति । इदं धनं भ्रातृषु नैव विभज्यते । धनमिदं भारयुक्तञ्च न भवति । अन्यानि धनानि व्ययीकृते ह्रासं प्राप्नुवन्ति, परमिदं धनं तु व्ययीकरणेनापि वर्धते । अतो विद्याधनं सर्वधनेषु प्रधानमस्ति ।

## ९. मञ्जूषायाः शब्दैः संवादं पूरयत

| |
|---|
| आगच्छन्, गन्तुम्, अवश्यमेव, कः, विद्वान्, परोपकारविषये, गच्छन्ती, शिखे, प्रवक्ता |

छाया - भो ................ ! कुत्र गच्छन्ती असि साम्प्रतम् ?

शिखा - वाचनालयं .............. अस्मि ।

छाया - तत्र ........ विशेषः ?

शिखा - अद्य ................ प्रवचनस्य कार्यक्रमोऽस्ति ।

छाया - कस्तत्र .............. ?

शिखा - काष्ठमण्डपतो लब्धप्रतिष्ठो ............ प्रवक्तुम् ............ अस्ति ।

छाया - अहमपि ........... शक्नोमि ?

शिखा - ................... ।

छाया - अस्तु, गच्छाव ।

## १०. श्लोकं पठित्वा परोपकारविषये स्वमतमुपस्थापयत

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, परोपकारार्थमिदं शरीरम् ॥

## ११. अद्य तव विद्यालयस्य वार्षिकोत्सवो वर्तते । तत्र त्वया मित्रैः सह कश्चित् संवादो विहितः, तस्य स्वरूपं प्रदर्शयत ।

## १२. निर्दिष्टमनुच्छेदं पठित्वा उपयुक्तं शीर्षकं दीयताम्

समुपसर्गपूर्वकात् कृ-धातो घञ्प्रत्ययेन संस्कारशब्दस्य निष्पत्तिर्भवति । संस्करणम्, परिष्करणम्, विमलीकरणम्, विशुद्धीकरणम् इत्यादयः संस्कारशब्दस्य समानार्थकाः शब्दा विद्यन्ते । यथा मलिनं वस्तु प्रक्षाल्य शुद्धं पवित्रं च विधीयते, यथा चाग्नौ तापयित्वा सुवर्णः शुद्धः क्रियते, तथैव मनुष्यश्च संस्कारैः पूर्णतामाप्नोति । मनुष्याणां कृते गर्भाधानादारभ्य अन्त्येष्टिं यावत् षोडशसंस्काराः प्रसिद्धाः सन्ति । ते यथा - गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्,

अन्नप्राशनम्, कर्णवेधनम्, चूडाकरणम्, उपनयनम्, वेदारम्भः, केशान्तः, समावर्तनम्, विवाहः, अग्निपरिग्रहः, अन्त्येष्टिश्चेति ।

## व्यवहारानुशीलनम्

१. **तवानुजस्यान्नप्राशनकार्यक्रम आयोक्ष्यमाणो वर्तते । तस्मिन् कार्यक्रमे किं किं विधातुं त्वं पितृभ्यां परामर्शं प्रयच्छसि ?**

२. **जन्मोत्सवावसरे त्वं किं किं कर्तुं वाञ्छसि ? सूचीं निर्माय कक्षायां श्रावयत ।**

३. **समुचितमुत्तरं ✓ चिह्नेनाङ्कयत**

**(क) गृहे समायोजितेषु धार्मिकानुष्ठानेषु किं करोषि ?**

(अ) कन्दुकक्रीडनाय गच्छामि ।

(आ) सखिभिः सह वार्तालापं कुर्वन् तिष्ठामि ।

(इ) भगवन्तं पूजयामि ।

(ई) भोजनं पचामि ।

**(ख) पौरस्त्यसंस्कृतिं कीदृशीं मन्यसे ?**

(अ) अन्धविश्वासयुक्तां मन्ये ।

(आ) अव्यावहारिकीं मन्ये ।

(इ) वैज्ञानिकीं मन्ये ।

(ई) अवैज्ञानिकीं मन्ये ।

**(ग) परम्परया प्रचलितानां संस्काराणां विषये कं प्रति जिज्ञाससि ?**

(अ) पितरौ प्रति जिज्ञासामि ।

(आ) गुरुं प्रति जिज्ञासामि ।

(इ) जिज्ञासा एव न जायते ।

(ई) जिज्ञासया को लाभः ?

**(घ) किं त्वं देवदर्शनार्थं मन्दिरं गच्छसि ?**

(अ) न गच्छामि ।

(आ) सर्वदैव गच्छामि ।

(इ) यदा कदा गच्छामि ।

(ई) प्रतिशनैश्चरवासरं गच्छामि ।

**(ङ) समुदाये आयोजितेषु पर्वमेलादिसु किं करोषि ?**

(अ) नैव गच्छामि ।

(आ) सोत्साहं गच्छामि ।

(इ) स्वयंसेवकत्वेन भागं गृह्णामि ।

(ई) सहभागितायै अन्याँश्च प्रेरयामि ।

एकादशः पाठः

# समाजसेवी तुलसीमेहरः



संसारेऽस्मिन् बहुविधाः प्राणिनो निवसन्ति, तेषु मानव एव विवेकशीलो वर्तते। विवेकिष्वपि मानवेषु सर्वे परोपकारिणो न भवन्ति। शते द्वित्रा एव जनाः स्वार्थं परित्यज्य परोपकाराय प्रयतन्ते। अस्माकं देशे नेपालेऽपि समये समये तादृशाः परोपकारिणो समाजसेविनोऽजायन्त। समाजसेवी तुलसीमेहरश्रेष्ठस्तादृशेषु महापुरुषेष्वन्यतमो वर्तते।

तुलसीमेहरो ललितपुरमण्डलस्य 'भेलाँछे'स्थाने १९५३ तमे वैक्रमाब्दे जनिं लेभे। तस्य पिता कैलासमेहरो राजकर्मकर आसीत्, माता च गृहिण्यासीत्। तयोः स एक एव पुत्र आसीत्। तस्य पितुरार्थिकी अवस्था सबला नासीत्। अत एव सोऽध्ययनाद् वञ्चितः सञ्जातः। किन्तु बाल्यादेव तस्मै हिंसा न रोचते स्म, अत एव स मांसाहाराद्, मद्यपानाच्च सर्वदा दूरे स्थितः। मांसाहारो मद्यपानञ्च तस्य समाजे साधारणमासीत्, किन्तु स सर्वदा स्वस्य कृते उभयमपि निषिद्धवान्। बाल्यादेव तस्मिन् साधुत्वस्य लक्षणान्यासन्।

समाजस्य दुराचारं दृष्ट्वा तस्य हृदयं द्रवति स्म। अतः कैशोरादेव समाजसुधाराय स प्रयत्नमकरोत्। तस्मिन् समये नेपाले राणाशासनमासीत्, जनाः शिक्षिता नासन्, स्वस्य विचारं च स्वतन्त्रतया प्रस्तोतुमसमर्था आसन्। तत्सर्वं दृष्ट्वा तुलसीमेहरः समाजे आत्मजागरणस्य महत्त्वं बोधयितुमग्रेसरोऽभूत्। सर्वांश्च जनान् दुराचारस्य विरोधं कर्तुमनुरुरोध। दुराचाराणां विरोधेन, सद्विचाराणां प्रचारेण च स समाजे लब्धख्यातिरभूत्। नारीणां सशक्तीकरणाय, समाजस्य सुधाराय च स निरन्तरं प्रायतत। विकासस्य कृते नारीशिक्षाया तासामात्मनिर्भरतायाश्चापरिहार्यतां संलक्ष्य स तदर्थमुपायान् प्रचारयामास। कोणे कोणे, जने जने च वर्धमानां तस्य लोकप्रियतां दृष्ट्वा राणाशासका भयभीता अभवन्। शासनगतानां शासकगतानां च दुराचाराणां विरोधाद् भीतः तत्कालीनः प्रधानमन्त्री चन्द्रशमशेर एकविंशतितमे वर्षे तं देशान्निर्वासयामास।

देशान्निर्वासितस्तुलसीमेहरो भारतमगच्छत्। तदानीं भारते आङ्ग्लानां शासनमासीत्। आङ्ग्लानां शासनाद् भारतं मोचयितुं महात्मा गान्धी प्रयत्नरत आसीत्। तस्य चान्दोलनं शान्तौ, अहिंसायां चाधारितमासीत्।

तस्य सरलां जीवनपद्धतिं, सत्यनिष्ठतां च विलोक्य तुलसीमेहरः प्रभावितोऽभवत् । कालक्रमेण स तस्यानुचरो बभूव । तुलसीमेहरस्य सरलया जीवनसरण्या कर्तव्यनिष्ठतया च गान्धी अपि प्रभावित आसीत् । तदनु गान्धी तुलसीमेहरं स्वगृहे एव न्यवासयत् । तुलसीमेहरश्चिरकालं यावत् तस्यानुचरः सन् सेवां व्यदधात् । गान्धीतुलसीमेहरयोराहारे, विहारे वेशभूषादिषु कार्यशैल्यां च साम्यमासीत् ।

तुलसीमेहरस्तदा नारीणां सशक्तीकरणे सक्रियो बभूव । तेन निम्नवर्गस्य महिलानामाजीविका सरलाऽभवत् । तस्मिन्नेव क्रमे स सूत्रयन्त्रसञ्चालनेन कार्पासवस्त्राणां निर्माणे निपुणोऽभवत् । गुर्जरदेशस्थे साबरमत्याश्रमे स्थितस्तुलसीमेहरो गान्धीमहाभागेन सह सत्याग्रहे सम्मिलितोऽभवत्, तेन कारणेन स कारागृहेऽपि निपातितः । कारागृहाद्बहिर्निर्गतस्तुलसीमेहरः पुनर्गान्धीमहोदयस्य परिचरो बभूव । गान्धीमहोदयेन सह वार्तालापं कर्तुमागता अतिथयोऽप्येतस्य साधुत्वं दृष्ट्वा प्रभाविता आसन् ।

तुलसीमेहरो गान्धीमहोदयेन सहैव जीवनं यापयितुं वाञ्छति स्म किन्तु १९८२ तमे वैक्रमाब्दे महात्मा गान्धी तं नेपाले प्रत्यावर्तनाय सूत्रयन्त्रप्रचाराय चानुरुद्धवान् । तस्यानुरोधं स्वीकुर्वन् तुलसीमेहरः कार्पासं सूत्रयन्त्रं चादाय नेपालं प्रत्यागतवान् । महात्मा गान्धी च तुलसीमेहरश्रेष्ठस्यावासादीनां व्यवस्थायै नेपालस्य प्रधानमन्त्रिणं सम्बोध्य पत्रं प्रेषितवान् ।

नेपालं प्रत्यावृत्तस्तुलसीमेहरो गृहं गन्तुं नेच्छति स्म, तस्यावासस्य व्यवस्था च नासीत् । नेपालमागत्य स भद्रकालीमन्दिरस्य पूर्वस्यां दिशि मार्गे एव भोजनं विनैव सूत्रयन्त्रं चालयन्नतिष्ठत् । मासादनन्तरं प्रधानमन्त्री चन्द्रशमशेरस्तस्याभीष्टं ज्ञातुं स्वकर्मकरान् निर्दिदेश । तुलसीमेहरश्च नेपाले सूत्रयन्त्रप्रचाराय, सूत्रयन्त्रसञ्चालनस्य प्रशिक्षणाय चानुमतिं प्रदातुं स्वस्यावासादीनां व्यवस्थां विधातुं चानुरोधमकरोत् । तस्यानुरोधं स्वीकृत्य चन्द्रशमशेरः शङ्खमूलस्थेषु त्रिषु पथिकाश्रयागारेषु तस्यावासस्य व्यवस्थां चकार ।

तुलसीमेहरश्रेष्ठः शङ्खमूले एव सूत्रयन्त्रसञ्चालनस्य प्रशिक्षणमारब्धवान् । शङ्खमूलस्य तदेव केन्द्रं नेपालस्य प्रथमं वस्त्रोत्पादनकेन्द्रमासीत् । निर्वासनक्रमे भारतमवस्थाय यत्तेन शिक्षितमासीत्, नेपालमागत्य स तस्य व्यवहारे प्रयोगमकरोत् । ग्रामीणाभ्यो निम्नवर्गीयमहिलाभ्यः कार्पासं वितीर्य सूत्राणि वस्त्राणि च निर्मातुं स प्रैरिरत् । १९८३ तमे वैक्रमाब्दे स 'श्री ३ चन्द्रकामधेनुचर्खाप्रचारकमहागुठी' नामिकां संस्थां स्थापयामास, यस्या माध्यमेन स सामाजिकसेवां व्यदधात् । इयं संस्था स्वदेशे निर्मितानां वस्त्राणामुपयोगाय जनानुत्प्रेरयति स्म, वैदेशिकानाञ्चोत्पादनानां निषेधं करोति स्म । तदनु श्रेष्ठो गान्धीमहोदयस्य स्मृतौ 'नेपालगान्धीस्मारकनिधि' नामिकामपरां संस्थामारेभे । एतयोर्द्वयोः सङ्गठनयोर्माध्यमेन सामाजिकजागरणस्य अभियानं स सञ्चालयामास ।

२०३० तमे वैक्रमाब्दे संस्थाद्वयस्य संयोजनेन नेपालचर्खाप्रचारकगान्धीस्मारकमहागुठीनाम्नी संस्था स्थापिता । ललितपुरमण्डलस्य मङ्गलबजारस्थाने तस्याः संस्थाया उत्पादनकक्षो वितरणकेन्द्रञ्चासीत् । वि.सं. २०४१ तमे वैक्रमाब्दे एतदेव वितरणकेन्द्रम् 'महागुठीक्राफ्टकन्सियन' इति नाम्ना विकसितमभवत् । सम्प्रति एतत्केन्द्रं सहस्राधिकान्युत्पादनानि कृत्वा राष्ट्रसेवां करोति । राष्ट्रस्यात्मनिर्भरतायै तुलसीमेहर आजीवनं समुद्यतोऽभवत् । तदर्थं काष्ठमण्डप-भक्तपुर-ललितपुर-काभ्रेपलाञ्चोक-कास्की-पाल्पा-पर्सा-धनुषा-मोरङक्षेत्रेषु स कार्यक्षेत्रं

विस्तारयामास, धनुषामण्डलस्य महेन्द्रनगरक्षेत्रे शतबिघापरिमिते क्षेत्रे कार्पासस्योत्पादनं च कारयामास ।

तुलसीमेहरश्रेष्ठो न केवलं सूत्रयन्त्रप्रचारं कारयामास, अपि तु जनचेतनाविस्तारस्य कार्याणि च स गुप्ततया सञ्चालयामास । तस्य कारणेन बहुवारं स कारागृहे न्यवसत् । चन्द्रशमशेरस्योत्तराधिकारी भीमशमशेरस्तुलसीमेहरस्य कार्यैरसन्तुष्टः सन् सूत्रयन्त्रप्रचारं प्रतिबन्धितं कृत्वा तं कारागृहे न्यपातयत् । कारागृहान्निःसृतोऽपि स जनचेतनायाः कार्यक्रमान् नात्यजत् । फलतः २००२ तमे, २००४ तमे च वैक्रमाब्दे राणाशासकानां दमनस्य विरोधाय सत्याग्रहकार्यक्रमे च स संलग्नोऽभवत् । एतेन तस्य कृते पुनः कारागारस्य मार्गः प्रदर्शितः ।

राणाशासनस्य समाप्त्यनन्तरं २००७ तमे वैक्रमाब्दे तुलसीमेहरः कारागृहान्मुक्तोऽभवत् । तदनु स स्वतन्त्रतया समाजसेवायै कार्याणि कर्तुमारब्धवान् । २००८ तमे वैक्रमाब्दे गान्धीस्मारकनिधीति संस्थायाः स्थापनामकरोत् । दीनानाम्, निर्धनानाम्, अनाथानाञ्च जनानां कृते वस्त्रभोजनावासादीनां व्यवस्था तस्याः संस्थाया लक्ष्यमासीत् । तुलसीमेहरस्य गान्धीमहोदयं प्रति समर्पणभावं दृष्ट्वा भारतसर्वकारः २०३३ तमे वैक्रमाब्दे नेहरूपुरस्कारद्वारा तमभ्यनन्दयत् । लक्षैकपरिमितानि रूप्यकाणि च पुरस्काररूपेण तेन लब्धानि । पुरस्काररूपेण लब्धं सर्वमपि धनं स महिलाप्रशिक्षणकेन्द्राय समर्पयामास । नेपालस्य विविधक्षेत्रस्य विधवानाम्, निर्धनानाञ्च नारीणां शिल्पविकासाय, तासां पुनःस्थापनायै च स समर्पित आसीत् । तस्य शिल्पविकासस्य कार्यक्रमैर्नार्योऽपि स्वावलम्बिन्योऽभवन् । तुलसीमेहरस्थापितं तत्केन्द्रं तुलसीमेहरश्रेष्ठमहिलाश्रमनाम्ना परिचीयते ।

अहोरात्रं समाजसेवायै दत्तचित्तस्तुलसीमेहरस्तपस्वी आसीत् । सामाजिकजागरणाय स्वस्य सर्वमपि जीवनं समर्प्य स २०३५ तमे वैक्रमाब्दे द्व्यशीतितम वयसि पञ्चत्वं गतवान् । एतस्य नाम्ना तुलसीमेहरयुनेस्कोसमूहः, तुलसीमेहरसघनट्रस्टाख्या संस्था, तुलसीमेहरमेमोरियलविद्यालयश्चेत्यादयः संस्थाः संस्थापिताः सन्ति । तुलसीमेहरसेवापुरस्कारनाम्ना तस्य स्मृतौ पुरस्कारव्यवस्था च विहिता वर्तते । नारीणां सबलीकरणाय, राष्ट्रस्यात्मनिर्भरतायै चैतेन विहितान् यत्नानद्यापि गुणग्राहिनो विद्वांसो भूरिशः प्रशंसन्ति ।

## शिक्षणालोकः

तुलसीमेहरश्रेष्ठ इवानेके समाजसेविनोऽस्माकं देशे सञ्जाताः । तेषां कार्यकलापाः कीदृशा आसन् ? समाजे तेषां प्रभावः कीदृशो वर्तते ? तेषामनुकरणं कथं कर्तुं शक्यते ? अस्माभिश्च समाजसेवायै के क्रियाकलापाः कर्तुं शक्यन्ते ? इति सम्यग्बोधयित्वा, तदनुसारिणः क्रियाकलापान् सञ्चालयितुं छात्राः समुद्बोधनीयाः ।

## अभ्यासः

१. **समाजसेविनो तुलसीमेहरस्य जीवनवृत्तं पठित्वा सङ्क्षेपेण कक्षायां श्रावयत ।**

२. **तुलसीमेहरश्रेष्ठस्य जीवनवृत्तमधीत्य को नैतिकः सन्देशो लभ्यते ? प्रकाशयत ।**

३. **तुलसीमेहरश्रेष्ठद्वारा विहितानि महत्त्वपूर्णानि कर्माणि कानि ? सूत्रीकृत्य लिखत ।**

४. **एकपदेनोत्तरयत**

(क) तुलसीमेहरः कस्मिन् स्थाने जनिं लेभे ?

(ख) तुलसीमेहरस्य पितुर्नाम किम् ?

(ग) तुलसीमेहरस्य माता किं करोति स्म ?

(घ) निर्वासनसमये तुलसीमेहरः कियद्वर्षवयस्क आसीत् ?

(ङ) १९७५ तमे वैक्रमाब्दे नेपालस्य प्रधानमन्त्री क आसीत् ?

(च) तुलसीमेहरस्य निर्वासनसमये भारते केषां शासनमासीत् ?

(छ) तुलसीमेहरो भारतं गत्वा कस्याश्रमेऽतिष्ठत् ?

(ज) 'साबरमती' इत्याश्रमो भारतस्य कस्मिन् प्रदेशे वर्तते ?

(झ) तुलसीमेहरः कस्मिन् वर्षे नेपालं प्रत्यावृत्तः ?

(ञ) तुलसीमेहरद्वारा स्थापिता प्रथमा संस्था का ?

५. **एकवाक्येनोत्तरयत**

(क) को विवेकशीलो वर्तते ?

(ख) तुलसीमेहरः किमर्थमध्ययनाद् वञ्चितः ?

(ग) साधुत्वस्य लक्षणानि श्रेष्ठे कदा दृष्टानि ?

(घ) जनानामशिक्षायाः, परतन्त्रतायाश्च मूलं कारणं किं ?

(ङ) तुलसीमेहरः कथं लब्धख्यातिरभवत् ?

(च) महात्मा गान्धी किमर्थं प्रयत्नरत आसीत् ?

(छ) महात्मा गान्धी तुलसीमेहरस्य कीदृशेन स्वभावेन प्रभावित आसीत् ?

(ज) तुलसीमेहरः किं वाञ्छति स्म ?

(झ) महात्मा गान्धी नेपालस्य प्रधानमन्त्रिणं किमर्थं पत्रं प्रेषयामास ?

(ञ) शङ्खमूले तुलसीमेहरः किं कर्तुमारब्धवान् ?

(ट) राणाशासकाः किं दृष्ट्वा प्रभाविताः सञ्जाताः ?

(ठ) तुलसीमेहरः केषु क्षेत्रेषु स्वकार्याणि विस्तारयामास ?

(ड) भीमशमशेरः किमर्थमसन्तुष्ट आसीत् ?

(ढ) भारतसर्वकारः किमर्थं तुलसीमेहरं पुरस्कृतवान् ?

(ण) गुणग्राहिणो विद्वांसः किं प्रशंसन्ति ?

## ६. सत्यासत्ये विविच्यासत्यं च सत्यं कृत्वा लिखत

(क) तुलसीमेहरो मांसाहारं मद्यपानं च करोति स्म ।

(ख) जनास्तस्मिन् समये शिक्षिताः, प्रबुद्धाश्चासन् ।

(ग) महात्मा गान्धी आङ्गलशासकानां विरोधं करोति स्म ।

(घ) तुलसीमेहर आजीवनं भारतदेशे एव स्थितवान् ।

(ङ) शङ्खमूलस्य वस्त्रनिर्माणकेन्द्रं व्यापारिककेन्द्रमासीत् ।

(च) भीमशमशेरस्तुलसीमेहरस्य व्यवहारेण सन्तुष्टो नासीत् ।

(छ) तुलसीमेहरस्त्यागी महापुरुष आसीत् ।

## ७. 'तुलसीमेहरस्य सरला जीवनपद्धतिः' इति विषयेऽनुच्छेदमेकं रचयत ।

## ८. तुलसीमेहरः समाजस्य सेवायै स्वस्य मातरं पितरं च त्यक्तवान् । तस्यैतत्कार्यमुचितमनुचितं वा ? स्वस्य विचारान् लिखत ।

## ९. परस्परं योजयत

| | |
|---|---|
| १९५३ तमे वैक्रमाब्दे | प्रथमसंस्थायाः स्थापना |
| १९८२ तमे वैक्रमाब्दे | तुलसीमेहरस्य देहावसानम् |
| १९८३ तमे वैक्रमाब्दे | संस्थाद्वयस्य योजनम् |
| २०३० तमे वैक्रमाब्दे | नेपाले प्रत्यावर्तनम् |
| २००८ तमे वैक्रमाब्दे | तुलसीमेहरस्य जन्म |
| २०३५ तमे वैक्रमाब्दे | गान्धीस्मारकनिधिस्थापना |

**१०. केचन जनास्तुलसीमेहरश्रेष्ठो नेपालस्य महात्मा गान्धी आसीदिति वदन्ति । एतस्य कारणं किं स्यात् ? स्वाभिप्रायं प्रदर्शयत ।**

**११. अधस्तनानां श्लोकानां भावमनुकृत्य परोपकारस्य विषये नातिविस्तृतं निबन्धमेकं लिखत**

रत्नाकरः किं कुरुते स्वरत्नैः
विन्ध्याचलः किं करिभिः करोति ?
श्रीखण्डखण्डैर्मलयाचलः किम्
परोपकाराय सतां विभूतयः ॥

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः ॥

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

**१२. अधस्तनं गद्यं पठित्वा निर्दिष्टकार्याणि कुरुत**

नेपालस्य समाजसेविषु बालब्रह्मचारिणः षडानन्दस्य नामधेयमग्रपङ्क्तौ गृह्यते । नेपालस्य पूर्वस्यां दिशि विद्याप्रचाराय संस्कृतेर्जागरणाय च तेन विहितो यत्नः प्रशंसनीयो वर्तते । एष सिद्ध आसीदिति इतिहासविदो विद्वांसः कथयन्ति ।१९३२ तमे वैक्रमाब्दे एतेन भोजपुरमण्डलस्य दिङ्लाक्षेत्रे गुरुकुलस्य शुभारम्भो विहितः, येन तत्रत्या अनेके छात्रा लाभान्विता अभवन् । तस्य गुरुकुलेऽध्ययनाय दूरतोऽपि छात्रा गच्छन्ति स्म । अत एव पूर्वनेपालस्य विद्याकेन्द्ररूपेण दिङ्लास्थितं गुरुकुलं विकसितमभवत् । गुरुकुले छात्राणामध्ययनावासभोजनादीनां निःशुल्कं व्यवस्थाऽऽसीत् । षडानन्दो जनसेवायै जलाशयस्य, धर्मशालायाः, चत्वरादीनां च निर्माणं कारयामास । तस्य तादृशं पवित्रं कर्म दृष्ट्वा स्थानीयास्तस्य सहयोगं चक्रुः । जना मुष्टिदानेन, भूमिदानेन, श्रमदानेन च बालब्रह्मचारिणः सहयोगमकुर्वन् । अन्धकारमयेऽपि राणाशासनकाले एतेन विहितं यत्नं दृष्ट्वा अनेके समाजसेविनस्तमन्वसरन् । अत एवास्माकं सर्वेषां प्रेरको बालब्रह्मचारी षडानन्दः सर्वदा स्मर्यते ।

**(क) एकपदेनोत्तरयत**

(अ) कस्य नामधेयमग्रपङ्क्तौ गृह्यते ?

(आ) बालब्रह्मचारी सिद्ध आसीदिति के वदन्ति ?

(इ) कतमे वैक्रमाब्दे एतेन गुरुकुलस्यारम्भो विहितः ?

(ई) के बालब्रह्मचारिणः सहयोगमकुर्वन् ?

(उ) गुरुकुलं कुत्र आसीत् ?

**(ख) पूर्णवाक्येनोत्तरयत**

(अ) बालब्रह्मचारिणः कीदृशो यत्नः प्रशंसनीयः ?

(आ) गुरुकुलं कीदृशमासीत् ?

(इ) बालब्रह्मचारी जनसेवायै कानि कार्याणि अकरोत् ?

(ई) जनाः कथं तस्य सहयोगम अकुर्वन् ?

(उ) बालब्रह्मचारी किमर्थं सर्वदा स्मर्यते ?

**१३. समाजसेवासम्बद्धान् विशिष्टविचारान् सङ्गृह्य सुन्दरैरक्षरैर्विलिख्य कक्षायां प्रदर्शयत ।**

## व्यवहारानुशीलनम्

**१. तव समाजे वर्तमानं कमपि परोपकारिणं जनमनुसन्धाय तस्य जीवनवृत्तात् त्वया के गुणा गृहीता इति कक्षायां श्रावयत ।**

**२. त्वया कर्तुं शक्यानामुपकारकर्मणां सूचीं निर्माय कक्षायां श्रावयत ।**

**४. समुचितविकल्पं चिह्नेन योजयत**

**(क) जनानामशिक्षां निराकर्तुं त्वं किं करोषि ?**

(अ) विद्यालयगमनायानुजान् प्रेरयामि ।

(आ) समाजे गत्वा जनजागरणस्य कार्यक्रमान् सञ्चालयामि ।

(इ) स्वस्य ज्ञानस्य प्रचारं प्रसारं च करोमि ।

(ई) उपर्युक्तं सर्वं करोमि ।

**(ख) तव अग्रजः स्वदेशं परित्यज्य विदेशं गन्तुमुद्यतोऽस्ति, त्वं किं कुरुषे ?**

(अ) हृष्टः सन् तं विदेशं प्रेषयामि ।

(आ) अहमपि तेनैव सह विदेशं गच्छामि ।

(इ) स्वदेशे स्थातुं तमनुरुणध्मि ।

(ई) किमपि न करोमि ।

**(ग) प्रतिवेशे कोलाहलं कुर्वाणान् जनान् दृष्ट्वा त्वं किं करोषि ?**

(अ) स्वयमपि तत्रैव गत्वा कोलाहलं करोमि ।

(आ) अशृण्वन्निव गृहे निवसामि ।

(इ) प्रहरिणमाहूय दर्शयामि ।

(ई) तेषां समीपं गत्वा तान् स्मारयामि ।

**(घ) तव मित्रस्य वस्त्रं जीर्णं शीर्णं च वर्तते, त्वं किं करोषि ?**

(अ) तस्योपहासं निन्दां च करोमि ।

(आ) स्वस्य अतिरिक्तं वस्त्रं तस्मै ददामि ।

(इ) तस्य मातरं पितरं च तर्जयामि ।

(ई) केवलं दयाभावं एव दर्शयामि ।

द्वादशः पाठः

# मन्त्रिणः कार्यकौशलम्



पुरा क्वचिदेकं समृद्धं राज्यमासीत्। तस्मिन् राज्येऽतीव गौरवशाली राजाऽऽसीत्। तस्यैव कारणेन चतुर्दिक्षु तस्य राज्यस्य च प्रसिद्धिरासीत्। शारीरिकशक्तिसम्पन्नो वीरः स प्रजापालनञ्च सम्यक् करोति स्म। तस्य बहवो दूरदर्शिनो मन्त्रिण आसन्। ते समये समये राज्यसम्बद्धानां समस्यानां विषये राजानं सूचयित्वा तासां समाधानोपायाँश्च प्रददति स्म। राज्ञो वीरतायाः कारणेन तस्य नाम श्रुत्वैव शत्रवो भयेन कम्पन्ते स्म। तादृशीं स्थितिं दृष्ट्वापि तत्रत्य एको मन्त्री सदैव खिन्नमना दृश्यते स्म परन्तु तत्कारणं न केऽपि जानन्ति स्म।

कदाचित् तस्मिन् राज्ये एको लुण्ठकसमूह आतङ्कमसृजत्। तेन सर्वाः प्रजा विचलिता जाताः। यदा तु मन्त्रिणस्तां वार्तां ज्ञातवन्तः, तैर्यद्यपि सुरक्षायै स्थाने स्थाने विश्वासपात्राणां सैनिकानां नियुक्तिः कृता, तथापि बाहुल्येनोपस्थिता लुण्ठकाः प्रजानां सर्वमपि धनमलुण्ठन्।

लुण्ठकान् निवारयितुमक्षमाः सैनिकाः मन्त्रिणश्चान्ते राजानं सूचितवन्तः। ततो राजा लुण्ठकान् निवारयितुं स्वस्य पार्षदसैनिकानाज्ञापयत्। राज्ञ आज्ञापालनाय ते सैनिकाः प्रायतन्त परन्तु तेऽपि तेषां दमनाय निष्फला अभवन्। लुण्ठका नहि कस्यचिद् वशङ्गताः।

एतद् विज्ञाय राज्यस्य प्रतिकोणं बहुसङ्ख्यकाः सैनिकास्तेषां निग्रहाय नियोजिताः परन्तु ते सम्यग् योजनां निर्माय निर्भयेन चेतसा चौर्य-लुण्ठनादिकार्यं कुर्वन्ति स्म। तेन राजाऽतीव क्रुद्धः सन् मन्त्रिणमादिशत्- 'लुण्ठकान् जीवितान् मृतान् वा येन केनापि प्रकारेण वशीकुर्वन्तु' इति। तदनन्तरं मन्त्री राज्ये स्थितान् सर्वानपि नागरिकानादिशद् यत् सर्वेऽपि स्वयं शस्त्रधारिणो भूत्वा स्वगृहं रक्षेयुरिति। तदर्थं नागरिकेभ्यो

युद्धकलायाः प्रशिक्षणस्य व्यवस्था च जाता। प्रशिक्षणं प्राप्य ग्रामजनेषु विचित्रः साहसभावो विकसितः। ते स्वक्षेत्रस्य रक्षणाय स्वयं तत्परा अभवन्। एतस्य सूचनां प्राप्य लुण्ठका बहुकालं यावन्नागतवन्तः। बहोः कालादनन्तरमेकदा ते रात्रौ समागताः। ग्रामीणैर्मिलित्वा ते गृहीताः। तदनन्तरं सर्वाँल्लुण्ठकान् रज्ज्वा बद्ध्वा ग्रामीणा राज्ञः पार्श्वे नीतवन्तः। ग्रामीणानां पुरुषार्थं वीक्ष्य राजाऽतीव प्रासीदत्।

रज्जुबद्धाँल्लुण्ठकान् द्रष्टुं राजप्रासादे विशालो जनसम्मर्दः सम्प्राप्तः। सर्वेषां लुण्ठकानां मुखानि आच्छादितानि आसन्। राजाज्ञया लुण्ठकानां नायकस्य मुखात् पट्टिका निष्कासिता। पट्टिकानिष्कासनसमकालमेव सप्रजं राजा विस्मयमगच्छत्। लुण्ठकनायकः स एव मन्त्री आसीत्, यः सर्वदा खिन्नमना दृश्यते स्म।

राजा लुण्ठकनायकं स्वमन्त्रिणमुवाच– "त्वं स्वजनद्रोही, राजद्रोही चासि। यदि त्वयि धनलिप्सा आसीच्चेदहं त्वया सूचयितव्यः स्यात्। न त्वं प्रजानां रक्षकः, अपि तु भक्षकोऽसि। ब्रूहि, तुभ्यं कीदृशं दण्डं ददानि ?' स किमपि नावोचत्। तत्रोपस्थिता नागरिका अवदन्– "एतस्मै मृत्युदण्ड एवोचितः।"

राजा तत्रोपस्थितान् जनान् तूष्णीमाकलयितुं समादिष्टवान्। पुनश्च राजा तं लुण्ठकनायकं मन्त्रिणमपृच्छत्– "तव किमपि वक्तव्यं वर्तते ?"

स मन्त्री अवदत्– "क्षम्यतां महाराज ! मया एतत्सर्वमस्माकं नागरिकाणां हितायैव कृतम्। यदि मया एतादृशं कार्यं न कृतं स्यात्, तर्हि तेष्वात्मरक्षणस्य सामर्थ्यं न भवेत्। ते तु तेषां रक्षणमपि राज्यस्यैव दायित्वं मत्वाऽलसभावेन स्थिता आसन्।"

मन्त्रिणो वार्तां श्रुत्वा प्रसन्ना नागरिका अवदन्– "साधु कथितं भवता। भवतैवास्मासु आत्मरक्षणाय सशक्ति उत्साह आहितः। वयमात्मरक्षणाय प्रशिक्षणञ्च गृहीतवन्तः।" तदनन्तरं राजाऽपि सालिङ्गनं तस्मै मन्त्रिणे साधुवादं प्रायच्छत्। सर्वे च नागरिकाः "धन्यो धन्यो मन्त्रिवर्यः" इति कथयन्तः स्वगृहाणि प्रति प्रस्थिताः।

## शिक्षणालोकः

स्वावलम्बनं मानवस्य उत्कृष्टो गुणोऽस्तीति बोधनाय कथायाः पाठनानन्तरमस्य सन्देशस्य च चर्चायै कक्षायां छात्राः प्रेरणीयाः। एवंविधा अन्ये च स्वावलम्बनमहत्त्वसूचकाः कथाप्रसङ्गा अस्य पाठस्य शिक्षणे प्रयोक्तव्याः।

## अभ्यासः

### पाठानुशीलनम्

**१. सङ्क्षेपेणोत्तरयत**

(क) कोऽतीव क्रुद्धो जातः ?

(ख) राज्ये केषां समूह आतङ्कमसृजत् ?

(ग) आतङ्केन का विचलिता जाताः ?

(घ) प्रशिक्षणं प्राप्य ग्रामजनेषु किं विकसितम् ?

(ङ) केषां दमनाय सैनिका निष्फला अभवन् ?

(च) राजा स्वस्य पार्षदसैनिकान् प्रति किमाज्ञापयत् ?

(छ) ग्रामीणैः केन बद्ध्वा लुण्ठका राज्ञः पार्श्वे नीताः ?

(ज) स्थाने स्थाने कीदृशानां सैनिकानां नियुक्तिः कृता ?

(झ) लुण्ठकाः कथं प्रजानां धनलुण्ठनकार्ये सफला जाताः ?

(ञ) नागरिकेभ्यः कस्य कलायाः प्रशिक्षणस्य व्यवस्था जाता ?

**२. पाठाधारेण संशोध्य लिखत**

(क) मन्त्री अवदत्- 'अहं चौरोऽस्मि ।'

(ख) मन्त्रिणोऽलसभावेन स्थिता आसन् ।

(ग) प्रजानां रक्षणं केवलं राज्यस्य दायित्वम् ।

(घ) सर्वे नागरिका लुण्ठकगृहाणि प्रति प्रस्थिताः ।

(ङ) राजाऽऽलिङ्गनपूर्वकं मन्त्रिणे धनं प्रायच्छत् ।

(च) लुण्ठकाः स्वात्मरक्षणाय प्रशिक्षणं गृहीतवन्तः ।

(छ) मन्त्रिणो वार्तां श्रुत्वा नागरिकाः क्रुद्धा अभवन् ।

(ज) राजा लुण्ठकान् तूष्णीमाकलयितुं समादिष्टवान् ।

**३. पाठस्य प्रथमस्यानुच्छेदस्य सस्वरवाचनं कुरुत ।**

## ४. पाठस्य कथायाः सन्देशं श्रावयत ।

## ५. पाठाधारेण मञ्जूषातो विशेष्यपदानि लिखत

(क) एकः ..................

(ख) समृद्धम् ..................

(ग) गौरवशाली ..................

(घ) बहवः ..................

(ङ) तादृशीम् ..................

| दूरदर्शिनः, राज्यम्, राजा, मन्त्री, स्थितिम् |
|---|

## ६. पाठाधारेण रिक्तस्थानं पूरयत

(क) लुण्ठका येन केनापि प्रकारेण ........... ।

(ख) राजाऽतीव क्रुद्धः सन् ........... आदिशत् ।

(ग) सर्वेऽपि स्वयं ........... भूत्वा स्वगृहं रक्षेयुः ।

(घ) प्रशिक्षणं प्राप्य ग्रामजनेषु ........... विकसितः ।

(ङ) बहोः कालादनन्तरम् .......... ते रात्रौ समागताः ।

(च) बहुसङ्ख्यकाः सैनिकास्तेषां ........... नियोजिताः ।

(छ) नागरिकेभ्यो युद्धकलायाः ........... व्यवस्था जाता ।

(ज) नागरिकाः स्वक्षेत्रस्य ........... स्वयं तत्परा अभवन् ।

## ७. पदानि प्रयुज्य नवीनानि नीतिवाक्यानि रचयत

विज्ञाय, प्रतिकोणम्, सैनिकाः, सम्यक्, निर्भयेन, कुर्वन्ति, क्रुद्धः, साहसभावः, स्वयम्, रक्षेयुः, युद्धकला, व्यवस्था, ग्रामजनेषु ।

## ८. पाठात् पर्यायं विचित्य लिखत

(क) अमात्याः = ................

(ख) मनसा = ................

(ग) असमर्थाः = ................

(घ) रुष्टः = ................

(ङ) भटानाम्  =  ................

(च) नृपः  =  ................

(छ) भयशून्येन  =  ................

## ९. प्रदत्तं गद्यं पठित्वा प्रश्नानुत्तरयत

दानवीररूपेण राधेयस्य कर्णस्य प्रसिद्धिरासीत् । श्रीकृष्णः सदा कर्णस्योदारतायाः प्रशंसां करोति स्म । पाण्डवाश्च दानकार्ये उदारा आसन् तथापि श्रीकृष्णः कदापि तान् तदर्थं न प्रशंसति स्म । एकदाऽर्जुनोऽस्य कारणं श्रीकृष्णमपृच्छत् । कृष्णोऽकथयत्- 'एकदा सूर्यपुत्रः कर्ण एवावश्यं प्रमाणीकरिष्यति यत् स दानवीरोऽस्ति' इति ।

कदाचिदेको ब्राह्मणोऽर्जुनस्य प्रासादमागतः । तस्य भार्या मृता, अतस्तस्या दाहसंस्कारस्य कृते चन्दनदारुकाणि आवश्यकानीति तेनोक्तम् । ब्राह्मणो दानरूपेण चन्दनदारुकाणि अर्जुनं याचितवान् । अर्जुनः स्वमन्त्रिणं समादिशत्- 'राजकोषाच्चन्दनदारुकाणां व्यवस्था भवतु । तस्मिन् दिने राजकोषे, समग्रेऽपि राज्ये चन्दनदारुकाणि समाप्तान्यासन् । अतोऽर्जुनो ब्राह्मणं प्राह– 'क्षमस्व, मया भवतः कृते चन्दनदारुकाणां व्यवस्था कर्तुं न शक्यते ।'

श्रीकृष्णः तत्सर्वं वीक्ष्य ब्राह्मणं प्राह– 'एकस्मिन् स्थाने चन्दनदारुकाणि अवश्यं मिलन्ति, मया सह आगच्छतु ।' श्रीकृष्णोऽर्जुनमपि पार्श्वे अनयत् । श्रीकृष्णार्जुनौ ब्राह्मणवेषिणौ भूत्वा तेन ब्राह्मणेन सह कर्णस्य प्रासादं प्राप्नुताम् । तत्र ब्राह्मणः कर्णं चन्दनदारुकाणि याचितवान् । कर्णः स्वमन्त्रिणं चन्दनस्य व्यवस्थायै आदिशत् । किञ्चित्कालानन्तरं कर्णस्य मन्त्री उक्तवान् यत्, सम्पूर्णेऽपि राज्ये कुत्रापि चन्दनदारुकाणि न प्राप्तानि ।

तत् श्रुत्वा कर्णः स्वस्यैव प्रासादस्य चन्दनस्तम्भान् उत्पाट्य ब्राह्मणाय दातुं स्वमन्त्रिणमाज्ञापयत् । मन्त्री अपि तथैवाकरोत् । चन्दनदारुकाण्यादाय ब्राह्मणः स्वभार्याया दाहसंस्कारमकरोत् ।

श्रीकृष्णोऽर्जुनमवदत्– 'पश्य, तवापि प्रासादस्य स्तम्भाश्चन्दनेन निर्मिताः सन्ति परन्तु त्वया ब्राह्मणो निराशः कृतः । तस्यामेव स्थितौ कर्णेन स्वस्योदारता प्रकटिता । सम्प्रति वद, दानवीरः कर्णोऽस्ति उत त्वं वर्तसे ?' श्रीकृष्णस्य तादृशं वचनं श्रुत्वाऽर्जुनो लज्जया नतमस्तकोऽभवत् ।

**(अ) एकपदेनोत्तरयत**

(क) कोऽर्जुनस्य प्रासादमागतः ?

(ख) दाहसंस्कारस्य कृते किमावश्यकम् ?

(ग) कः कर्णस्योदारतायाः प्रशंसामकरोत् ?

(घ) पाण्डवाश्च कस्मिन् कार्ये उदारा आसन् ?

(आ) **एकवाक्येनोत्तरयत**

(क) अर्जुनः स्वमन्त्रिणं किं समादिशत् ?

(ख) दानवीररूपेण कस्य प्रसिद्धिरासीत् ?

(इ) **अधस्तनस्य वाक्यस्य विवेचनं कुरुत**

अर्जुनो लज्जया नतमस्तकोऽभवत् ।

**१०. अधस्तनं नीतिपद्यं पठित्वा प्रश्नान् उत्तरयत**

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।

श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ? ॥

(क) किं श्रोत्रस्य भूषणम् ?

(ख) सत्यं कस्य भूषणं वर्तते ?

(ग) हस्तस्य भूषणं किं वर्तते ?

## व्यवहारानुशीलनम्

**१. राज्यात् त्वं किं किं सौविध्यं प्राप्तुमिच्छसि ? राज्यं प्रति च तव कर्तव्यानि कानि सन्ति ? उभयोः पृथक् पृथक् सूचीं निर्मात ।**

**२. पाठस्य कथान्तर्गतेषु पात्रेषु कस्य व्यवहारपक्षं त्वमात्मनि निधातुं वाञ्छसि ? तर्कं प्रस्तुत ।**

**३. व्यवहारे त्वं स्वावलम्बनं कथं पालयसि ? कार्यसारिणीं निर्माय भित्तौ संश्लेषयत ।**

**४. समुचितमुत्तरं ✓ चिह्नेन दर्शयत**

(क) **राज्ये समस्याऽऽपतति चेत् त्वया किं करणीयम् ?**

(अ) समाधानोपायश्चिन्तनीयः ।

(आ) समस्याया विषये चिन्ता करणीया ।

(इ) राज्यं त्यक्त्वाऽन्यत्रैव निवसनीयम् ।

(ई) तत्समाधानन्तु राज्यस्यैव दायित्वमस्तीति मननीयम् ।

**(ख) अनुचितकार्यं कुर्वाणः कश्चित् त्वया गृहीतश्चेत् त्वं किं करोषि ?**

(अ) क्षमां प्रदाय त्यक्तव्यः ।

(आ) सद्यस्तस्मै दण्डो दातव्यः ।

(इ) सर्वे मिलित्वा स ताडयितव्यः ।

(ई) तत्कार्ये प्रवृत्तिविषये एकवारं स प्रष्टव्यः ।

**(ग) त्वन्मते राज्यसञ्चालकेन कीदृशेन भाव्यम् ?**

(अ) बलवता ।

(आ) धनवता ।

(इ) बुद्धिमता ।

(ई) बलबुद्धियुक्तेन ।

**(घ) त्वमशक्तान् कथं विलोकयसि ?**

(अ) पशुवत् ।

(आ) पुत्रवत् ।

(इ) मित्रवत् ।

(ई) अनाथवत्

## परियोजना

१. मनुष्याणां मानसपरिवर्तनेन व्यवहारपरिवर्तनं भवतीति विषये कानिचन उदाहरणानि अन्विष्य विवरणं प्रस्तुत ।

२. सामूहिकशक्त्या कार्यसम्पादनविषये स्वस्य समाजस्य विद्यालयस्य वा केचन द्वे कार्ये वर्णयत ।

त्रयोदशः पाठः

# महतामेकरूपता

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥१॥

पात्रे त्यागी गुणे रागी भागी परिजनैः सह ।
शास्त्रे बोद्धा रणे योद्धा प्रभुः पञ्चगुणो भवेत् ॥२॥

उदये सविता रक्तो रक्तश्चास्तमये तथा ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥३॥

दुष्टस्य दण्डः स्वजनस्य पूजा न्यायेन कोशस्य हि वर्धनं च ।
अपक्षपातो निजराष्ट्ररक्षा पञ्चैव धर्माः कथिता नृपाणाम् ॥४॥

आत्मनश्च परेषां च यः समीक्ष्य बलाबलम् ।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः ॥५॥

लोके सुखे सुखम्मन्यो लोकानां च हिते हितम् ।
नात्मप्रियं प्रियं नेतुर्लोकानां तु प्रियं प्रियम् ॥६॥

**१**
**पदच्छेदः**

यद्, यद्, आचरति, श्रेष्ठः, तत् तद्, एव, इतरः, जनः, सः, यत्प्रमाणम्, कुरुते, लोकः, तद्, अनुवर्तते ।

**अन्वयः**

श्रेष्ठः यद् यद् आचरति इतरः जनः तत् तद् एव (आचरति) । स यत्प्रमाणं कुरुते लोकः तद् अनुवर्तते ।

**अर्थः**

श्रेष्ठो नायको यादृशं व्यवहारमाचरणं च कुरुते तस्यानुगामिनो जनास्तादृशमेव कर्म कुर्वते । नेतृत्वपङ्क्तौ स्थितो महान् जन उदाहरणीयं लोकहितकारि कर्म कृत्वा यादृशमादर्शं स्थापयति तस्यैवादर्शस्य परिपालनं सामान्या जना अपि कुर्वन्ति । अतो नेता सद्गुणसम्पन्नो भवेत् ।

**२**
**पदच्छेदः**

पात्रे, त्यागी, गुणे, रागी, भागी, परिजनैः सह, शास्त्रे, बोद्धा, रणे, योद्धा, प्रभुः, पञ्चगुणः भवेत् ॥

**अन्वयः**

पात्रे त्यागी, गुणे रागी, परिजनैः सह भागी, शास्त्रे बोद्धा, रणे योद्धा (च) प्रभुः पञ्चगुणः भवेत् ।

**अर्थः**

सत्पात्रे यथावश्यकं त्यागः, गुणेषु अनुरागः (गुणग्राहिता), प्राप्ताया उपलब्धेरनुयायिवर्गे समानं वितरणम्, स्वसम्बद्धे विषये गम्भीरमध्ययनम्, रणभूमितुल्ये कार्यक्षेत्रे कार्यसाधनाय तल्लीनता इत्येवं पञ्चप्रकारकेण गुणेन सम्पन्नो जनः सामर्थ्यवान् नायकः कथ्यते । एते पञ्च गुणा नायके सदाऽऽवश्यका भवन्ति ।



**३**
**पदच्छेदः**

उदये, सविता, रक्तः, रक्तः, च, अस्तमये, तथा, सम्पत्तौ च, विपत्तौ च, महताम्, एकरूपता ।

**अन्वयः**

सविता उदये रक्तः (भवति), अस्तमये च रक्तः (भवति) । महतां सम्पत्तौ विपत्तौ च एकरूपता (भवति) ।

**अर्थः**

उदयकाले सूर्यो रक्तो दृश्यते एवमेवास्तकालेऽपि रक्त एव भवति । महान् नेता सूर्यसदृशो भवति । नेताऽनुकूलसमये प्रतिकूलसमये च सूर्य इव समभावेन वर्तते । स सदा धीर एव भवति, सफलतायां प्राप्तायां अहम्मन्यः पतनकाले च विचलितो वा न भवति ।

**४**
**पदच्छेदः**

दुष्टस्य, दण्डः, स्वजनस्य, पूजा, न्यायेन, कोशस्य, हि, वर्धनम्, च, अपक्षपातः, निजराष्ट्ररक्षा, पञ्च एव, धर्माः, कथिताः, नृपाणाम् ।

**अन्वयः**

दुष्टस्य दण्डः, स्वजनस्य पूजा, न्यायेन कोशस्य वर्धनम्, अपक्षपातः, निजराष्ट्ररक्षा च (हि) नृपाणां पञ्च एव धर्माः कथिताः (सन्ति) ।

**अर्थः**

राज्ञः (नेतृत्ववर्गस्य) शासकस्य वा पञ्च महान्तो गुणा (धर्माः) निर्दिष्टाः सन्ति । दुष्टानां कृते सुदृढा दण्डव्यवस्था, सहयोगिनां जनानां सम्मानम्, न्यायोचितं कर्म कृत्वा देशस्य अर्थतन्त्रसुदृढीकरणम्, जनेषु पक्षपातराहित्यम् (नागरिकेभ्यः समानरूपेणावसरप्रदानम्), स्वदेशस्य सुरक्षा चेति राज्ञां (नेतृत्ववर्गस्य) विशिष्टा गुणा वर्तन्ते ।

**५**
**पदच्छेदः**

आत्मनः, च, परेषां, च, यः, समीक्ष्य, बलाबलम्, अन्तरम्, न एव, जानाति, सः, तिरस्क्रियते, अरिभिः ।

**अन्वयः**

आत्मनः परेषां च बलाबलं समीक्ष्य यः अन्तरं नैव जानाति सः अरिभिः तिरस्क्रियते ।

**अर्थः**

यो नायकः (शासकः) स्वस्य शत्रोश्च सामर्थ्यं पश्यति किन्तु उभयोः सामर्थ्यगतमन्तरं न जानाति, स सदा दुर्बल एव भवति । स सदा शत्रुभिः पराजितो भवति ।

**६**
**पदच्छेदः**

लोके, सुखे, सुखम्मन्यः, लोकानाम्, च, हिते, हितम्, न, आत्मप्रियम्, प्रियम्, नेतुः, लोकानाम्, च प्रियम्, प्रियम्

## अन्वयः

(नेता) लोके सुखे सुखम्मन्यः (भवति), लोकानां च हिते हितं (पश्यति), (तस्य) आत्मप्रियं प्रियं न (भवति, अपि) च लोकानां प्रियं प्रियं (भवति) ।

## अर्थः

लोकाः सुखिनः सन्ति चेन्नेताऽऽत्मानं सुखिनं मनुते । स नागरिकाणां हिते स्वस्यापि हितं पश्यति । नेतुरात्मप्रियं किमपि न भवति, जनानां प्रियं वस्तु एव तस्यापि प्रियं भवति । नेता नागरिकाणां सुखदुःखयोः सर्वथा समानुभववान् भवेत् ।

### शिक्षणालोकः

अस्य पाठस्य शिक्षणक्रमे विद्यार्थिन आदर्शनेतृत्वविषये प्रशिक्षणीयाः । तेषु नेतृत्वोचिताः सद्गुणाः प्रवर्धयितव्याः । नेतृत्वविषयेऽन्यान्यपि समुचितानि पद्यानि शिक्षणीयानि । कथाप्रसङ्गादीँश्च श्रावयित्वा स्वस्मिन् नेतृत्वगुणविकासाय ते उत्प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चार्याशयं प्रकटयत**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

२. **नेपालीभाषायामर्थं लिखत**

लोके सुखे सुखम्मन्यो लोकानां च हिते हितम् ।
नात्मप्रियं प्रियं नेतुर्लोकानां तु प्रियं प्रियम् ॥

३. **संक्षेपेणोत्तरयत**

(क) जनाः कमनुसरन्ति ?
(ख) सामर्थ्यवतो नायकस्य कति गुणा भवन्ति ?
(ग) महतां कदा एकरूपता भवति ?
(घ) शासकैः कोशस्य वर्धनं कथं करणीयम् ?
(ङ) कीदृशो नायकः शत्रुभिस्तिरस्क्रियते ?
(च) नायकस्य हितं कदा भवति ?
(छ) कस्य कस्य बलाबलं समीक्षणीयम् ?
(ज) नेतृत्ववर्गस्य पञ्च धर्माः के ?

४. **'महतामेकरूपता' इत्यस्य तात्पर्यं मूलपाठस्थपद्यान्याधृत्य व्याख्यात ।**

५. **परस्परं मेलयत**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| दुष्टस्य | वर्धनम् |
| स्वजनस्य | रक्षा |
| कोशस्य | दण्डः |
| राष्ट्रस्य | पूजा |

## ६. रिक्तस्थानं पूरयत

(क) श्रेष्ठः यद् ............ जनाः तदनुवर्तन्ते । (पश्यति, आचरति, शृणोति)

(ख) ............ अनुरागो नायकस्य गुणोवर्तते । (दाने, भाषणे, गुणे)

(ग) ............ उदये रक्तो भवति । (सविता, चन्द्रः, तारका)

(घ) नेता ............ प्रियं स्वस्यापि प्रियं मनुते । (आत्मीयानाम्, कर्मचारिणाम्, लोकानाम्)

## ७. सत्यासत्यं विवेचयत

(क) नायके पञ्च गुणा आवश्यका भवन्ति ।

(ख) महान् जनः सम्पत्तौ विपत्तौ च समो न भवति ।

(ग) अपक्षपातो नेतृत्वस्य सद्गुणो नास्ति ।

(घ) लोकप्रियः शासको लोकानां हितं स्वहितं मनुते ।

## ८. नीतिवाक्येषु प्रदत्तानां पदानां प्रयोगं कुरुत

श्रेष्ठः, एकरूपता, प्रियम्, सविता, हिते, आचरति, तिरस्क्रियते ।

## ९. अर्थं लिखत

इतरः, बोद्धा, भागी, सुखम्मन्यः, अपक्षपातः, अरिभिः ।

## १०. अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानामुत्तराणि दत्त

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥

(क) हर्म्याणामन्तः केन भवति ?

(ख) यशसो विनाशकं किम् ?

(ग) 'सौहृदम्' इत्यस्य विपरीतार्थबोधकं पदं विलिख्य तस्य नीतिवाक्ये प्रयोगं कुरुत ।

## ११. प्रदत्तां कथां पठित्वा प्रश्नानुत्तरयत

एको व्यापारी प्रतिदिनं जायमानेन पारिवारिकेन विवादेन दुःखी जातः । एकदा स गृहं त्यक्त्वा सन्न्यासग्रहणाय वनमगच्छत् । स वने कस्यचन वृक्षस्य अधस्ताद् ध्यानं कुर्वाणं सन्न्यासिनमपश्यत् । स सन्न्यासिनः पुरस्ताद् गत्वाऽवसत् । क्षणानन्तरं सन्न्यासी नेत्रे उदघाटयत् । व्यापारी सन्न्यासिनः

पादयोः प्रणिपत्याकथयत्, "गुरो ! अहं भवतः शिष्यो भवितुं वाञ्छामि । मां शिष्यत्वेन स्वीकरोतु भवान् । धनानि पारिवारिकं मोहादिकं च परित्यज्य भगवतो भक्तिं कर्तुमहं भवतः शरणे समागतोऽस्मि ।" सन्न्यासी अकथयत्, "वत्स ! मातृपितृपत्नीपुत्रादीन् प्रति त्वयि प्रेमास्ति न वा ?" सोऽकथयत्, "पारिवारिकजनेषु केष्वपि मम प्रेम नास्ति ।" तत्कथनं श्रुत्वा सन्न्यासी अवदत्, "वत्स ! मां क्षमस्व । अहं तव अशान्तं मनः सान्त्वयितुं न शक्नोमि । यदि तव मनसि पारिवारिकेषु जनेषु स्वल्पोऽपि स्नेहोऽभविष्यत् तर्हि अहं तव तं स्नेहं वर्धयित्वा भगवद्भक्तौ स्थिरं कारयितुं समर्थ आसम् । किन्तु तव मनः पाषाण इव वर्तते । न हि पाषाणरूपाद् हृदयाज्जलरूपा भगवद्भक्तिः समुद्भवति ।" सन्न्यासिनो वचनं श्रुत्वा व्यापारी पारिवारिकप्रेम्णो महत्त्वं जानन् गृहं प्रत्यावर्तत ।

**(अ) एकपदेनोत्तरयत**

(क) कस्य परिवारे प्रतिदिनं विवाद आसीत् ?

(ख) व्यापारी वृक्षस्याधस्तात् कमपश्यत् ?

(ग) व्यापारिणः पारिवारिकजनेषु किं नासीत् ?

(घ) व्यापारिणो मनः किन्तुल्य आसीत् ?

**(आ) एकवाक्येनोत्तरयत**

(क) व्यापारी किमर्थं वनमगच्छत् ?

(ख) व्यापारी कुत्रावसत् ?

(ग) कीदृशे हृदये भक्तिर्न सम्भवति ?

(घ) सन्न्यासिनो वचनं श्रुत्वा व्यापारी किं ज्ञातवान् ?

**१२. किं नेतृत्ववर्गस्यानुसरणं सामान्या जनाः कुर्वन्ति ? कक्षायां परामर्शं कुरुत ।**

**१३. महान्तो जनाः सर्वदा समभावेन वर्तन्ते इति कथनं तर्केण स्पष्टयत ।**

**१४. समुचितमुत्तरं ✓ चिह्नेन दर्शयत**

**(क) महतां कदैकरूपता भवति ?**

(अ) माने धने च

(आ) सम्पत्तौ विपत्तौ च

(इ) सुखे उत्साहे च

(ई) ज्ञाने विज्ञाने च

**(ख) नायकस्य प्रथमं कर्तव्यं किम् ?**

(अ) निजराष्ट्ररक्षा

(आ) निजपरिवाररक्षा

(इ) निजगृहरक्षा

(ई) निजधनरक्षा

**(ग) नेता कदा सुखम्मन्यो भवति ?**

(अ) आत्मनः सुखे

(आ) बन्धुजनस्य सुखे

(इ) परिचरस्य सुखे

(ई) लोकस्य सुखे

**(घ) स्वस्य परस्य च बलाबलमसमीक्षमाणो नायकः कीदृशो भवति ?**

(अ) मित्रैः सम्मानितः

(आ) मित्रैस्तिरस्कृतः

(इ) शत्रुभिस्तिरस्कृतः

(ई) शत्रुभिः सम्मानितः

## व्यवहारानुशीलनम्

**१. 'त्वं जनप्रियो नेता भवितुं वाञ्छसि चेत् तव कर्तव्यानि कानि ?' एकमनुच्छेदं रचय ।**

**२. त्वं कस्य व्यवहारमनुसरसि ? तस्य व्यवहारस्यानुसरणीयान् पक्षान् प्रदर्शय ।**

**३. त्वमनुजान् तव कान् गुणाननुसर्तुमनुरुणत्सि ? सूचीं निर्मात ।**

**४. समुचिते विकल्पे चिह्नं दत्त**

**(क) यात्रायां क्वचित् तव मार्गोऽवरुद्धः । तत्र त्वं किं करोषि ?**

(अ) सर्वकारं निन्दामि ।

(आ) देशस्य भौगोलिकीं स्थितिं गर्हयामि ।

(इ) किमपि अकृत्वा तूष्णीं तिष्ठामि ।

(ई) अवरोधस्य कारणं ज्ञात्वा तन्निराकरणोपायान् विधातुं प्रयते ।

**ख) त्वं सम्पत्तौ किं करोषि ? विपत्तौ च किम् ?**

(अ) सम्पत्तौ प्रसीदामि, विपत्तौ च विषीदामि ।

(आ) सम्पत्तौ अभिमानं करोमि, विपत्तौ शोकं विदधामि ।

(इ) सम्पत्तौ विपत्तौ चाविकृतः सन् तिष्ठामि ।

(ई) सम्पत्तौ सखीनाहूय भोजयामि, विपत्तौ सख्युर्गृहं गत्वा भुञ्जे ।

**ग) त्वां सखायः कीदृशं मन्वते ?**

(अ) स्वार्थिनम्

(आ) दुष्टम्

(इ) सहयोगिनम्

(ई) लुब्धम्

**घ) त्वयि को गुणो विराजते ?**

(अ) सत्पुत्रता

(आ) सन्मित्रता

(इ) सुजनता

(ई) उपर्युक्तास्त्रय एव गुणाः

चतुर्दशः पाठः

# ऐतिह्यगर्भं रहस्यम्



अयं मल्लकालस्य सन्दर्भो वर्तते । कदाचिद् भक्तपुरे जितामित्रमल्लो राजाऽसीत् । स कूटनीतिज्ञ आसीत् । स भक्तपुरे चतुर्विंशतिवर्षाणि यावच्छासनमकरोत् । तदनन्तरं जितामित्रपुत्रो भूपतीन्द्रो राजा बभूव । पितरि जितामित्रमल्लस्य दिवङ्गमने भूपतीन्द्रो बालक आसीत् । अतो मन्त्रिणो भाजुकुशस्य साहाय्येन जितामित्रस्य कनिष्ठा राज्ञी शासनं सञ्चालयामास ।

भाजुकुशः स्वबाहुबलेन मनोयोगपूर्वकं राज्यसञ्चालने सहायको बभूव । अतः स राज्ञ्याः प्रियभाजनः सञ्जातः । कालान्तरे राज्ञी मन्त्री भाजुकुशश्चोभौ राजकुमारं देशाद् बहिष्कर्तुं योजनामकुरुताम् । गुप्तयोजनां कृत्वा तौ राजकुमारं वधिकानां पार्श्वे प्रैषयताम् । वधिका राजकुमारं हन्तुं काभ्रेविहारवने नयन्त आसन् । मार्गे बालकस्य तस्य तेजस्वितां बालभावञ्च वीक्ष्य वधिकानां मनःसु दयाभावः समुत्पन्नः । तदनन्तरं ते व्यचारयन्– 'एतस्य हननेन वयं पापभाजो भविष्यामः । अतो नैनं हन्मो वयम्' इति । ते राजकुमारं वने सन्त्यज्य प्रत्यावर्तन्त । 'राजकुमारो व्यापादितः' इति प्रमाणीकर्तुमेकं वन्यपशुं मारयित्वा तस्य यकृन्निःसार्य ते राज्ञ्यै न्यवेदयन् । तेन राज्ञी मन्त्री भाजुकुशश्च प्रासीदताम् ।

राज्ञी भाजुकुशश्च राज्यं सञ्चालयन्तौ एव आस्ताम् । दारुकाणि आनेतुं वनं प्रविष्टौ कौचन तामाङदम्पती राजकुमारमपश्यताम् । सन्ततिरहितौ तौ राजकुमारं गृहे समानीय पुत्ररूपेण पालयामासतुः । तस्मै भाषाशिक्षणमकुरुताम्, काष्ठकलाया बौद्धधर्मस्य ज्ञानञ्च प्रायच्छताम् । कालक्रमेण राजकुमारो युवावस्थां प्राप । तामाङविद्यायां नैपुण्यमाधातुं तौ दम्पती राजकुमारं ल्हासानामकंस्थानं च निन्यतुः । तत्र राजकुमारः काष्ठकलाविषये च स्वज्ञानं प्रावर्धयत् । तत्रत्येभ्यो लामागुरुभ्यो भोटतन्त्रं बौद्धविद्याञ्च प्राप ।

'राजकुमारो दिवङ्गतः' इति मत्वा मन्त्री भाजुकुशः स्वात्मानं राजानमुदघोषयत् । नृपो भाजुकुशो राज्ञी च मिलित्वा ताभ्यां प्राक्तनैर्मल्लशासकैरिव यशसे देवमन्दिराणि, तत्सञ्चालनाय गोष्ठीश्च स्थापयामासतुः ।

शनैः शनैर्भाजुकुशः स्वानुकूल्येन राज्यशासने प्रावर्तत । प्रजास्तस्य कुशासनेन पीडिता जाताः । तेन तत्रत्या मन्त्रिणः, भ्रातृबान्धवाः, कर्मचारिणः, प्रजाश्च तद्विरोधिनः सञ्जाताः । तस्मिन्नेवावसरे वधिकै राजकुमारस्य भूपतीन्द्रमल्लस्य जीवितावस्था सूचिता । सर्वे मिलित्वा राजकुमारमन्वैषयन् । तमानीय युद्धकलां प्रशिक्ष्य भाजुकुशेन सह ते युद्धमकुर्वन् । युद्धे भाजुकुशो हतः । स स्वस्य दुष्कर्मणः फलमवाप ।

राजकुमारो भूपतीन्द्रो राजसिंहासनमधिष्ठितवान् । काष्ठकलाविज्ञः स स्वकीये राज्ये काष्ठकलायाः कृतीर्निर्मातुमैच्छत् । अत एव स पञ्चपञ्चाशद्गवाक्षं प्रासादं पञ्चतलात्मकं न्यातपोलदेवालयञ्च निर्ममे । देवालयस्य निर्माणावसरे नृपः स्वयं निर्माणसामग्रीमूढ्वा शिल्पकारान् प्रोत्साहयामास । भवननिर्माणे तामाङजातीयानां कर्मकराणां विशेषा सहभागिताऽऽसीत् । देवालये निर्मिते नृपस्तत्सोपाने स्थित्वा अन्तर्मूर्तिस्थापनविषये अमात्यगणैः शिल्पकारैश्च सह संलपन्नासीत् । तदानीमेव एकः श्येन आगत्य पूर्वकोणच्छदौ स्थित्वा चुकूज । नृपश्च तं पक्षिणं वीक्ष्य तत्समस्वरेण ध्वनिं चकार । नृपस्य तथाविधां क्रियां दृष्ट्वा सर्वे आश्चर्यान्विताः सञ्जाताः परन्तु कोऽपि तद्विषये नृपं प्रष्टुं न शशाक ।

राजप्रासादं प्राप्य एकेनामात्येन तस्या घटनाया विषये राज्ञी सूचिता । तच्छ्रवणेन राज्ञी तद्विषये समुत्सुका जाता परन्तु नृपस्तस्यै तद्रहस्यं प्रकाशयितुं नैच्छत् । रहस्यश्रावणाय नृपस्यानिच्छां ज्ञात्वा राज्ञी खिन्ना सती आत्मघातार्थं तत्परा जाता । तद् दृष्ट्वा नृपः सर्वं रहस्यवृत्तान्तं तस्यै न्यवेदयत् । वृत्तान्तानुसारेण नृपः पूर्वजन्मनि ल्हासाक्षेत्रस्य गुम्बालामात्र्ये एक आसीत् । देवालयादीनां निर्माणानन्तरं निवर्त्य आगमिष्यामीति स श्येनं कथितवानासीत् ।

स्वस्य गमनानन्तरं पुत्रं रणजित-मल्लं राज्यशासनाय साहाय्यं कर्तुं नृपो राज्ञीं समादिदेश । न्यातपोल-देवालयस्य निर्माणे संलग्नानां भोट-काष्ठकर्मिणां तामाङ-शिल्पकाराणाञ्च कृते नृपः स्वस्यैव राज्ये दारसङ्ग्रहस्यावासस्य च व्यवस्थां चकार । देवालयस्य निर्माणायागतयोर्द्वयोर्मल्लयोः स्मृतौ स देवालयस्य अग्रभागे तयोर्मूर्तिस्थापनञ्चाकारयत् । ते मूर्ती अद्यापि तत्र विराजेते ।

भूपतीन्द्रो मल्लकालस्य प्रसिद्धो राजाऽऽसीत् । एतेन निर्मितः पञ्चपञ्चाशद्गवाक्षः प्रासादः, न्यातपोलनामकः पञ्चतलात्मको देवालयश्च साम्प्रतं यावद् भक्तपुरनगर्याः शोभां वर्धयन्तौ वर्तेते । अयं कविश्चासीत् । एतेन हरगौरीविवाहः, उषाहरणम्, जैमिनिभारतमित्यादीनि नाट्यकाव्यानि, नैकानि गीत-पद्यानि च रचितानि सन्ति ।

## शिक्षणालोकः

इयं तामाङजातिसम्बद्धा ऐतिहासिकी लोककथा वर्तते । लोककथानामन्वेषणे अध्ययने च छात्राः प्रेरणीयाः । लोककथा अपि कानिचन ऐतिहासिकानि तथ्यानि, सन्देशांश्च प्रदायास्मान् शुभकर्मसु प्रेरयन्तीति च ते अनयैव कथया बोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

**१. सङ्क्षेपेणोत्तरयत**

(क) वधिकाः किं व्यचारयन् ?
(ख) भूपतीन्द्रस्य पितुर्नाम किम् ?
(ग) को राज्ञ्याः प्रियभाजनः सञ्जातः ?
(घ) कथायाः सन्दर्भः कदातनो वर्तते ?
(ङ) वधिकाः राजकुमारं कुत्र नयन्त आसन् ?
(च) जितामित्रः कियत्कालं यावच्छासनमकरोत् ?
(छ) केन वधिकानां मनःसु दयाभावः समुत्पन्नः ?
(ज) राज्ञी भाजुकुशश्च राजकुमारं कुत्र प्रैषयताम् ?
(झ) भाजुकुशो राज्यसञ्चालने कस्याः सहायको बभूव ?
(ञ) 'राजकुमारो व्यापादितः' इति प्रमाणीकर्तुं वधिकाः किमकुर्वन् ?

**२. पाठस्यान्तिमानुच्छेदस्य अनुलेखनं कुरुत ।**

**३. पाठाधारेण संशोध्य लिखत**

(क) नृपोऽमात्यान् प्रोत्साहयामास ।
(ख) राजकुमारो भूपतीन्द्रो वने व्यापादितः ।
(ग) न्यातपोलदेवालयः सप्ततलात्मकोऽस्ति ।
(घ) भूपतीन्द्रः काष्ठकलाया नदीं निर्मातुमैच्छत् ।
(ङ) श्येन आगत्य उत्तरकोणच्छदौ अतिष्ठत् ।

**४. न्यातपोलदेवालयस्य विषये स्वयमन्विष्य वर्णयत ।**

**५. अधस्तनं श्लोकं पठित्वा शिक्षकस्य साहाय्येन प्रश्नानुत्तरयत**

कस्यास्ति नाशे मनसो हि मोक्षः
क्व सर्वथा नास्ति भयं विमुक्तौ ।
शल्यं परं किं निजमूर्खतैव
के के ह्युपास्या गुरुदेववृद्धाः ॥

(क) के पूज्याः सन्ति ?　　(ख) किं परमं शल्यं वर्तते ?
(ग) कदा सर्वथा भयं नास्ति ?　　(घ) कस्य विनाशे मोक्षोऽस्ति ?

६. **पाठाधारेण निम्नलिखितस्य कथनस्याशयं लिखत**

स स्वस्य दुष्कर्मणः फलमवाप ।

७. **भूपतीन्द्रमल्लस्य जीवनवृत्तान्तं दशभिर्वाक्यैर्वर्णयत ।**

८. **प्रदत्तं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

कुबेरो धनदेवो वर्तते । एकस्मिन् समये कुबेरस्य मनसि स्वस्य धनवत्तामाधृत्य अहङ्कारः समुत्पन्नः । एकदा स्वस्य वैभवप्रदर्शनार्थं धनदेवः कुबेरो भोजनमहोत्सवस्यायोजनं कृतवान् । तस्मिन् महोत्सवे स सर्वान् देवानामन्त्रयत् । महोत्सवस्यामन्त्रणं गृहीत्वा स कैलाशपर्वते शिवस्य समीपं गतवान् । स तत्र गत्वा विशेषातिथिरूपेणागन्तुं देवाधिदेवं शिवं समनुरुद्धवान् ।

भगवान् शिवः कुबेरस्य दम्भं सद्यो ज्ञातवान् । शिवो दम्भं विगलयितुं स्वस्य स्थाने स्वपुत्रं गणेशं प्रेषितवान् । महोत्सवस्य दिवसः समागतः । सर्वे देवाः कुबेरस्य गृहं गताः । गणेशोऽपि यथासमयं तत्र प्राप्तवान् । भोजनस्यारम्भो जातः । गणेशो झटिति सर्वं भोजनं समापितवान् । तदा कुबेरस्य भोजनालयस्य परिचराः पुनः पुनर्भोजनं समानीय गणेशाय दत्तवन्तः । पाकशाला रिक्ता जाता तथापि गणेशो नहि तृप्तः ।

गणेशोऽन्यच्च भोजनमादातुं वारं वारं समादिशत् । पाकशालाया भोजनशून्यत्वेन भोजनं दातुं कुबेरो नाक्षमत । 'गणेशः क्रुद्धो न भवेत्' इति विचार्य स सद्यो गणेशस्य चरणयोः पतितः । कुबेरः क्षमामयाचत । स्वस्य धनवत्तामनुभूय समुद्भूतस्याहङ्कारस्य विषये च तेन निवेदितम् । तदर्थं पश्चात्तापञ्चाकरोत् । श्रीगणेशः स्मितं विहस्य तस्मै क्षमामयच्छत् ।

(क) को धनदेवो वर्तते ?
(ख) शिवः सद्यः किं ज्ञातवान् ?
(ग) कुबेरः कस्य समीपं गतवान् ?
(घ) कुबेरस्य मनसि किं समुत्पन्नम् ?
(ङ) महोत्सवे कुबेरः कानामन्त्रयत् ?
(च) शिवो गणेशं किमर्थं प्रेषितवान् ?
(छ) धनदेवः कुबेरः कस्यायोजनं कृतवान् ?
(ज) गणेशः किं कृत्वा कुबेराय क्षमामयच्छत् ?

९. **सत्कर्मणः फलविषये काञ्चन कथामन्विष्य कक्षायां श्रावयत ।**

१०. **काष्ठकलायाः महत्त्वविषये एकमनुच्छेदं लिखत ।**

## व्यवहारानुशीलनम्

१. **त्वमन्येषां कल्याणाय कानि कार्याणि कर्तुं शक्नोषि ? सूचीं निर्मात ।**

२. **मल्लकालस्य समृद्धिरिव समृद्धिरधुनापि सम्भवति किम् ? सम्भवति चेत् तदर्थमस्माभिः किं कर्तुं पार्यते ? स्वाशयं प्रकटयत ।**

### ३. समुचितमुत्तरं ✓ चिह्नेन दर्शयत

**(क) देवालयानां परिसरस्य स्वच्छतायै त्वं किं करोषि ?**

(अ) स्वच्छीकरणार्थं सदा तत्रैव निवसामि ।

(आ) देवालयेऽधिकानि रूप्यकाणि अर्पयामि ।

(इ) यत्र तत्रावकराणां प्रक्षेपकान् भर्त्सयामि ।

(ई) अवकरान् निश्चिते स्थाने क्षिपामि ।

**(ख) भगवतः प्रसन्नतायै त्वं किं करोषि ?**

(अ) तदर्थं भगवन्तमेव पृच्छामि ।

(आ) तस्मै अधिकं धनं निवेदयामि ।

(इ) भगवते मिष्टान्नानि अर्पयामि ।

(ई) निरन्तरं भगवच्चिन्तनं करोमि ।

**(ग) वने भ्रमणकाले कश्चन एकाकी बालको मेलिष्यति चेत् किं करिष्यसि ?**

(अ) तमदृष्ट्वैवाग्रे गमिष्यामि ।

(आ) तमानीय प्रहरिणे समर्पयिष्यामि ।

(इ) तं पृष्ट्वा तत्रैव त्यक्ष्यामि ।

(ई) समस्याया विषये ज्ञात्वा प्रतिवेदनं लेखिष्यामि ।

**(घ) मार्गे भिक्षुणा सह मेलनं भवति चेत् किं करोषि ?**

(अ) तमनुगम्य तेनैव सह गच्छामि ।

(आ) तं तस्य गन्तव्यं पृच्छामि ।

(इ) तं सादरं प्रणम्य स्वमार्गे चलामि ।

(ई) तद्विपरीतायां दिशि पश्यन् गच्छामि ।

## परियोजना

१. देशस्य समृद्ध्यै किं करणीयमिति विषये स्वकीयानां परिवारसदस्यानां मतानि सङ्कलय्य विवरणं निर्मात ।

२. नेपालस्य कलाकृतिविषये स्थलभ्रमणेन अध्ययनेन वा ज्ञात्वा तद्वैशिष्ट्यानि वर्णयत ।

पञ्चदशः पाठः

# प्रकृतिपूजनपराऽस्मत्परम्परा

(बुटवलनगरात् समागतो हर्कजितः स्वमित्रेण मानवीरेण सह मेलितुं तद्गृहे गच्छति । तत्र मानवीरस्य माता भुमा एकाकिनी वर्तते ।)

हर्कजितः मातः ! प्रणमामि । मानवीरो गृहे नास्ति किम् ? गृहे भवन्तीमेकाकिनीं पश्यामि । अन्ये कुत्र गताः ?

भुमा चिरंजीव वत्स ! सर्वे क्षेत्रं गताः । मानवीरस्तु वनं गतो वर्तते । गृहे विंशत्यधिका अजाः पालिताः सन्ति । तेषां कृते वृक्षघासानानेतुं स प्रत्यहं वनं गच्छति ।

हर्कजितः- अहो ! साधु कृतम् । आत्मनिर्भरतायै पशुपालनमपि समुचित उपायः ।

(द्विचक्रिकायां वृक्षस्य हरितान् घासान् संस्थाप्य मानवीरः सम्प्राप्नोति । स शिरस्त्रेण मुखमण्डलस्थानि घर्मविन्दून्यपाकरोति । तत एव स गृहागतं मित्रं पश्यति ।)

मानवीरः मित्रवर ! अद्य मम गृहे ? धन्योऽस्मि । का वार्ता ? कीदृशोऽसि ? (समीपं गत्वा निवसन्) नगरात् कदा ग्राममागतः ?

हर्कजितः अहं ह्य एव ग्राममागमम् । अद्य त्वया सह मेलनाय आगतोऽस्मि । सर्वं कुशलमस्ति । (द्विचक्रियायां घासान् विलोकयन्) त्वं वृक्षकांश्छित्वा घासानानयसि किम् ?

मानवीरः एवम् । वृक्षशाखां छित्वा घासानेकत्रीकर्तुं काठिन्यमनुभवामि । अतो वृक्षकानामूलं छित्वा घासानानयामि ।

हर्कजितः सखे ! नैतदुचितम् । वृक्षका मूलेन छिद्यन्ते चेदस्माकं पर्यावरणस्य काऽवस्था भवेत् ? प्रकृतौ असन्तुलनं समागच्छति । वनविनाशेन प्रकृतिर्विकृता जायमाना वर्तते । जलवायुपरिवर्तनेन समग्रमपि जगत् सन्त्रस्तमस्ति । अस्यां स्थितौ त्वया वनसंरक्षणाय कार्यं कर्तव्यमासीत् किन्तु वृक्षकान् नाशयन्नसि । नैतत् त्वयि शोभते ।

मानवीरः एतत् तव कथनं श्रवणे एव मधुरम् । हर्कजित ! वयं पशुपालकाः स्मः । अस्माभिर्घासाय दारुकाय च वृक्षाश्छिद्यन्ते । अत्रानुचितं किमस्ति ?

(मित्रयोर्वार्तां शृण्वन्ती झुमा गृहाभ्यान्तरं प्रविशति ।)

हर्कजितः शृणु सखे ! वयं भूमिपुत्राः स्मः; प्रकृतिं देवतारूपेण पूजयामः । स्वयं प्रकृतिपूजको भूत्वा त्वं प्रकृतिं विनाशयितुं न शक्नोषि । अस्माभिः प्रकृतौ वर्तमानानां नदी-वन-भूमि-मृत्पाषाणादीनां समुचित उपयोगः कर्तव्यः, न तु विनाशः ।

मानवीरः वनं गत्वा पशूनां कृते घासा मयाऽऽनीताः । तेन वनं कथं विनश्यति ? त्वं वृथा मयि कुप्यसि ?

हर्कजितः घासानामानयनमनुचितं नास्ति किन्तु वृक्षकान् छित्त्वाऽऽनयनं सर्वथा अनुचितं प्रकृतिविरुद्धं चास्ति । अत इतः परं तादृशं कार्यं न कुरु ।

मानवीरः अस्तु, वृक्षकान् न छिनद्मि किन्तु पशूनां घासस्य व्यवस्थाऽहं कथं कुर्याम् ?

हर्कजितः त्वं रिक्तभूमौ वृक्षारोपणं कुरु । घासानां कृते वृक्षशाखायाः समुचितं छेदनं भूमिस्थघासानां च कर्तनं कर्तुं शक्यते ।

(झुमा चायफलादिकमादाय उभाभ्यां प्रददाति । स्वयं च समीपे तिष्ठति ।)

झुमा पुत्र हर्कजित ! त्वं तु नगरे एव व्यापारं विधाय तिष्ठसि । इदानीं कस्मै प्रयोजनाय ग्रामं समागतः ।

हर्कजितः मातः ! उधौलीपर्व समागतम् । प्रकृतिपूजका वयं स्वसांस्कृतिकं पर्व सम्पादयितुं स्वगृहं न आगच्छेम तर्हि पर्वणो महत्ता कथं सुरक्षिता भवेत् ? अतो मातापित्रादिभिः परिवारैः सह उधौलीपर्वसम्पादनाय समागतः ।

झुमा साधु कृतम् वत्स !

हर्कजितः मानवीर ! वयं भूमिपुत्राः प्रकृतिपूजकाः स्म इति त्वं जानास्येव । उधौलीपर्व प्रकृतिपूजनसम्बद्धमस्ति । मार्गशीर्षमासे क्षेत्राद् धान्यादीन्यन्नानि गृहे आनीयन्ते । हर्षस्य तदवसरे नवान्नानि इष्टदेवाय समर्प्य भोजनाय अनुमतिर्याच्यते ।

झुमा पशवः, पक्षिणः, मनुष्याश्चास्मिन् समये पर्वतशिखरभागादधः प्रान्तीयभागे निवासं कुर्वन्ति । अत ऋतुचक्रसम्बद्धमिदं पर्व उधौली उच्यते । पुत्र मानवीर ! अस्माकं समाजेऽन्यान्यपि सांस्कृतिकपर्वाणि प्रकृतिपूजनसम्बद्धानि सन्ति ।

मानवीरः तर्हि उभौली अपि तादृशमेव प्रकृतिपूजनपरकं पर्व स्यात् । यतो हि तदानीं प्रकृतौ विपत्तिं नायात्; अतिवृष्ट्यादयः प्रकोपा न भवेयुरित्येवं प्रयोजनाय भूमिदेवतायाः (भूदेवस्य) पूजा विधीयते ।

हर्कजितः सर्वं जानासि त्वं किन्तु किमर्थं वृक्षकांश्छिनत्सि ?

मानवीरः स्वार्थसाधनायाज्ञानवशात् तथा कृतम् । सत्यम्, अहमितः परं वृक्षान् वृक्षकांश्च न छिनद्मि

इति त्वां विश्वस्तं कारयामि । (किञ्चिद् विचार्य) अस्माकं संस्कृतौ प्रकृतिपूजनस्यान्या अपि परम्पराः सन्ति ? सन्ति चेत् मां कथय ।

हर्कजितः अवश्यम् । अस्माकं समाजः कृषिमाश्रितः वर्तते, जनाश्च कृषिनिष्ठाः सन्ति । कृषौ प्रकृत्या महत् स्थानं भवति । प्रकृतिर्जीवनस्याधारो वर्तते । अतो वयं प्रकृतिं पूजयामः । समये समयेऽस्माभिः क्रियमाणं तुलसीपूजनम्, वरपिप्पलयोः पूजनम्, भूमिपूजनम्, जलपूजनम्, वायुपूजनम्, आकाशपूजनम्, सूर्यचन्द्रयोः पूजनम्, वनदेवतापूजनमित्यादीनि पूजनानि अस्माकं प्रकृतिप्रेम प्रदर्शयन्ति ।

झुमा एवम् पुत्र ! वयं प्रकृतौ जीवनस्य सम्पूर्णतां प्राप्नुमः । अतः प्रकृतौ देवदृष्टिं कुर्मः ।

हर्कजितः स्वार्थवशाद् यदि वयं प्रकृतौ क्षतिं प्रापयामः तर्हि मानवानां प्राणिनां वनस्पतीनां च जीवनं नष्टं भ्रष्टं च भवितुं शक्नोति । अतो जीवनरक्षायै प्रकृतिरक्षा करणीया ।

झुमा अस्माकं तु जन्मन आरभ्य मृत्युपर्यन्तं क्रियमाणानि विविधानि संस्कारकर्माणि प्रकृत्या सह सम्बद्धानि सन्ति ।

मानवीरः मातः ! भवत्या साधु कथितम् ।

झुमा अस्माकं पूर्वजाः प्रकृतिरक्षाया माध्यमेन जीवनस्य रक्षायै प्रकृतिपूजनस्य विशिष्टां परम्परां आरब्धवन्तः । 'द्यौः शान्तिः अन्तरिक्षं शान्तिः पृथिवी शान्तिः' इत्येवं वाक्यैस्ते प्रकृतिं प्रार्थयन्ति स्म । प्रकृतेः पूजनाय एव न, संरक्षणायापि तैस्तथा कृतमिति अहं विचारयामि ।

हर्कजितः साधु विचारः । अस्माभिरपि पूर्वजैः स्थापिता प्रकृतिपूजनपरा तद्रक्षणपरा च परम्परा प्रवर्धनीया ।

मानवीरः अद्य त्वया सह मेलनं मम कृते सर्वथा सार्थकं शिक्षाप्रदं च जातम् ।

हर्कजितः मानवीर ! त्वया मात्रा सह च मेलनस्य ममेच्छा पूर्णा जाता । रमणीय आलापश्च जातः । इदानीं गृहे प्रातर्भोजनाय माता मां प्रतीक्षमाणा भवेत् । पुनरागमिष्यामि । इदानीमहं गच्छामि । पश्चात् पुनर्मिलाव ।

झुमा अहमपि युवयोर्वार्तायां निमग्नाऽभवम् । भोजननिर्माणायाहमपि गच्छामि । पुत्र हर्कजित ! स्वमातरं मे प्रणामं श्रावय ।

हर्कजितः अवश्यम् ।

मानवीरः एवं सखे ! पुनर्मिलाव ।

(सर्वे गच्छन्ति)

## अभ्यासः

### पाठानुशीलनम्

**१. गतियतिवाक्यचिह्नानि विचार्य सस्वरं शुद्धमुच्चारयत**

वयं भूमिपुत्राः प्रकृतिपूजकाः स्म इति त्वं जानास्येव । उधौलीपर्व प्रकृतिपूजनसम्बद्धमस्ति । मार्गशीर्षमासे क्षेत्राद् धान्यादीन्यन्नानि गृहे आनीयन्ते । हर्षस्य तदवसरे नवान्नानि इष्टदेवाय समर्प्य भोजनाय अनुमतिर्याच्यते ।

**२. आशयं प्रकटयत**

जलवायुपरिवर्तनेन समग्रमपि जगत् सन्त्रस्तमस्ति । अस्यां स्थितौ त्वया वनसंरक्षणाय कार्यं कर्तव्यमासीत् किन्तु वृक्षकान् नाशयन्नसि । नैतत् त्वयि शोभते ।

**३. वाक्यगतमर्थं व्याख्यात**

जीवनरक्षायै प्रकृतिरक्षा करणीया ।

**४. सङ्क्षेपेणोत्तरयत**

(क) कः कस्य गृहं गतवान् ?

(ख) मानवीरेण कियन्त्योऽजाः पालिताः सन्ति ?

(ग) मानवीरः किं कर्तुं काठिन्यमनुभवति ?

(घ) केन हेतुना प्रकृतिर्विकृता जायमानाऽस्ति ?

(ङ) प्राकृतिकाणां कीदृशवस्तूनां सदुपयोगः कर्तव्यः ?

(च) पशूनां कृते घासानां व्यवस्था कथं करणीया ?

(छ) उधौली कीदृशं पर्वास्ति ?

(ज) भूमिदेवतायाः पूजा किम्प्रयोजनाय विधीयते ?

(झ) कानि पूजनान्यस्माकं प्रकृतिप्रेम प्रदर्शयन्ति ?

(ञ) जीवनरक्षायै अस्माकं पूर्वजाः किं कृतवन्तः ?

**५. मूलपाठस्थं संवादं साभिनयं पठित्वा तत्सन्देशं विमृशत ।**

**६. 'वयं प्रकृतौ जीवनस्य सम्पूर्णतां प्राप्नुमः' इति वाक्यस्य तात्पर्यं विशदयताम् ।**

## ७. उचितम् ✓ अनुचितं X च कथनं निर्दिशत

(क) घासदारुकादीनां प्रयोजनाय वृक्षच्छेदनं कर्तव्यम् ।

(ख) प्रकृतिर्जीवनस्याधारो वर्तते ।

(ग) हर्कजितो बुटवलनगरे कृषिकर्म करोति ।

(घ) अत्रत्या ग्रामीणा जनाः कृषिनिष्ठाः सन्ति ।

(ङ) वयं प्रकृतौ जीवनदृष्टिं कुर्मः ।

(च) प्रकृतिपूजाऽस्माकं विशिष्टा परम्परा अस्ति ।

## ८. पाठमाधृत्य उधौली-उभौलीपर्वणोः प्रकृतिसम्बद्धतां प्रदर्शयत ।

## ९. पाठाधारेण रिक्तस्थानं पूरयत

(क) मानवीरस्य पारिवारिका जनाः श्रमाय ............ गच्छन्ति । (नगरम्, क्षेत्रम्, वनम्)

(ख) क्षतायां प्रकृतौ ............ सङ्कटापन्नं भवति । (पशुजीवनम्, मत्स्यजीवनम्, प्राणिजीवनम्)

(ग) ............ प्रकृत्याः महत् स्थानं वर्तते । (व्यापारे, कृषौ, पर्यटने)

(घ) अस्माकं ............ प्रकृतिप्रिया आसन् । (पूर्वजाः, अनुजाः, मातृजाः)

(ङ) वयं ............. स्मः । (राष्ट्रपुत्राः, धर्मपुत्राः, भूमिपुत्राः)

## १०. नीतिवाक्येषु प्रयोगं कुरुत

मधुरम्, सखे, वृथा, पर्वणि, आनीयन्ते, पक्षिणः, तर्हि, विकृतिः ।

## ११. अर्थं लिखत

द्विचक्रिका, वृक्षकः, धन्यः, आमूलम्, महत्ता, छेदनम्, शिरस्त्रम्, वत्स

## १२. 'पर्यावरणस्वच्छता' इति विषये पात्रद्वयं पात्रत्रयं वा परिकल्प्य लघुसंवादः लिख्यताम् ।

## १३. अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानामुत्तराणि दत्त

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।

फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥

(क) वृक्षाः परार्थाय किं किं कुर्वन्ति ?

(ख) वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

(ग) वृक्षाः कैः सदृशाः भवन्ति ?

(घ) 'सत्पुरुषाः' इत्यस्य वाक्येप्रयोगं कुरुत ।

## १४. प्रदत्तकथां पठित्वा प्रश्नानुत्तरयत

कस्यचन कृषकस्य घटिका कर्मसम्पादनक्रमे तुच्छधान्यानां पुञ्जे अपतत् । तुच्छधान्यानां पुञ्जमपसार्य स महता श्रमेण घटिकाया अन्वेषणं कृतवान् किन्तु अभिलुप्ता घटिका नैव प्राप्ता । स श्रान्तो जातः । किञ्चिद्दूरमवस्थाय कन्दुकेन क्रीडन् कश्चनो बालः कृषकस्य तां दशां विलोक्य तत्रागतः । कृषकोऽभिलुप्ताया घटिकाया विषये कथितवान् । बालो घटिकान्वेषणाय गतः । स क्षणानन्तरमेव घटिकां गृहीत्वाऽऽगतः । कृषकः प्रसन्नो भूत्वा पृष्टवान्, "बहुकालमन्विष्यापि मयाऽप्राप्ता घटिका त्वया कथं क्षणेन प्राप्ता ?" बालकोऽवदत्, "अहं किमपि न कृतवान् । कर्णौ भूमौ संस्थाप्य मौनमाकलय्यातिष्ठम् । एवं सति अहं घटिकायाः टिकटिकध्वनिमशृणवम् । ततो घटिकाऽऽनीता ।" प्रसङ्गेनानेन कतिपयानि कार्याणि मौनीभूयैव सिद्ध्यन्तीति बोद्धुं शक्यते । वयं वाग्व्यहारं कुर्मः । अतो जाग्रति वयं मौनीभूय स्थातुं न शक्नुमः परन्तु मौनभावस्य महिमा सर्वैः स्वीक्रियते । वचसाऽसम्प्रेष्यः सन्देशो मौनरूपेण दातुं शक्यते । मौनसङ्केतो वाणीप्रदत्तसन्देशात् शक्तिशाली भवति । शब्दजाले भ्रान्तो जनो मौनरूपं मार्गं गृहीत्वा सङ्कटमुक्तो भवति । मित्रेषु जायमानं वाग्द्वन्द्वं पारिवारिको विवादो निःशब्दतयैव परिशाम्यति । अतो निःशब्दताऽनेकासां समस्यानां समाधानमस्ति । वयमपि मौनभावस्यावलम्बनं यथावश्यकं कुर्याम ।

**(अ) एकपदेनोत्तरयत**

(क) कस्य घटिका अभिलुप्ता ?

(ख) बालकः कुत्र गतः ?

(ग) कदा वयं मौनीभूय स्थातुं न शक्नुमः ?

(घ) वयं किं कुर्मः ?

**(आ) एकवाक्येनोत्तरयत**

(क) कस्य घटिका कुत्र अपतत् ?

(ख) कृषकः कथं श्रान्तः ?

(ग) बालकः किमशृणोत् ?

(घ) कीदृशः सन्देशो मौनरूपेण दातुं शक्यते ?

१५. संवादरूपं मूलपाठमाधृत्य समुचितमुत्तरं ✓ चिह्नेन दर्शयत

(क) **हर्कजितः किम्पर्व सम्पादयितुं गृहे समागतः ?**

(अ) उधौली (आ) उभौली

(इ) ल्होसार (ई) बुद्धपूर्णिमा

(ख) **झुमा काऽस्ति ?**

(अ) हर्कजितस्य माता (आ) मानवीरस्य माता

(इ) हर्कजितमानवीरयोर्माता (ई) मानवीरस्य ज्येष्ठमाता

(ग) **मानवीर आत्मनिर्भरतायै किं करोति ?**

(अ) मधुकरपालनम् (आ) गोपालनम्

(इ) महिषीपालनम् (ई) अजापालनम्

(घ) **अस्माकं समाजः कीदृशोऽस्ति ?**

(अ) व्यापाराश्रितः (आ) पर्यटनाश्रितः

(इ) वैदेशिककर्माश्रितः (ई) कृषिकर्माश्रितः

(ङ) **जन्मन आरभ्य मृत्युपर्यन्तं क्रियमाणा अस्मत्संस्काराः किंसम्बद्धाः सन्ति ?**

(अ) धर्मसम्बद्धाः (आ) मन्त्रसम्बद्धाः

(इ) प्रकृतिसम्बद्धाः (ई) परम्परासम्बद्धाः

१६. 'निर्मला ग्रामीणप्रकृतिः' इति विषयमाधृत्य सुन्दरं चित्रं निर्माय स्वकक्षाकोष्ठस्य सूचनापट्टे प्रदर्शयत ।

## व्यवहारानुशीलनम्

१. प्रकृतेः स्वच्छीकरणाय त्वया किं कर्तुं शक्यते ? सूत्ररूपेण दर्शयत ।

२. अस्माभिः कृतैः कीदृशैः कर्मभिः प्रकृतौ क्षतिर्जायमाना वर्तते । तां क्षतिमवरोद्धुं त्वया किं विधातुं शक्यते ?

३. त्वं प्रकृतिपूजां करोषि न वा ? सोदाहरणं सतर्कं च लिखत ।

४. त्वं प्रदत्तेषु प्राकृतिकवस्तुषु केषां पूजनं करोषि ? किमर्थम् ?

| प्राकृतिकवस्तूनि | पूजयामि/न पूजयामि | कारणम् |
|---|---|---|
| अश्वत्थः | | |
| वटः | | |
| तुलसी | | |
| कुशः | | |
| अपामार्गः | | |
| शालग्रामशिला | | |
| गौः | | |
| शुनकः | | |
| काकः | | |
| आमलकवृक्षः | | |
| भूमिः | | |
| नदी | | |
| सूर्यः | | |
| चन्द्रः | | |
| ग्रहाः | | |
| सर्पः | | |
| वायुः | | |
| आकाशः | | |
| नक्षत्राणि | | |

षोडशः पाठः

# मुद्गलस्य त्यागः

पुरा कुरुक्षेत्रे मुद्गलो नाम ऋषिर्निवसति स्म । स धर्मप्रियो जितेन्द्रियश्चासीत् । असत्यभाषणाद्, परनिन्दायाश्च स दूरतस्तिष्ठति स्म । अतिथिसेवापरायणः स महर्षिः शिलोञ्छवृत्त्या जीवनं निर्वाहयति स्म । पञ्चदशसु दिनेषु सङ्गृहीतेन शिलेन द्रोणपरिमितमन्नं स सञ्चितं करोति स्म । तेनैवान्नेन स इष्टिकृतं नाम यागं करोति स्म । अमावास्यायां पौर्णमास्यां च स दर्शपौर्णमासयज्ञं कुरुते स्म । यज्ञशेषं हविरतिथीन् भोजयति स्म, अतिथींश्च भोजयित्वा यावदन्नं शिष्यते तावता स स्वस्य बन्धूनां जीवनं निर्वाहयति स्म । तस्यैका भार्याऽवर्तत एकः पुत्रश्चासीत् । ते सर्वेऽपि एकस्मिन् पक्षे एकवारमेवान्नं भक्षयन्ति स्म । शुद्धचित्तस्य तस्य महर्षेर्व्रतेन तुष्टा देवास्तस्य पुरतः स्वयमेवागत्य यज्ञभागं गृह्णन्ति स्म । मुनिवृत्त्याऽतिथीनां सेवयाऽन्नदानेन च तस्य जीवनं धन्यमासीत् । अत एव ऋषेर्मुद्गलस्य चेतसि रागद्वेषादयो दुर्विकारा नासन् । यज्ञशीलस्य, अतिथिसेवापरायणस्य च तस्य द्रोणपरिमितं तदन्नं कदापि समाप्तं न भवति स्म । शतशः सहस्रशो वाऽतिथीनां भोजनेनापि तदन्नपात्रं सर्वदा पूर्णमेव भवति स्म ।

महर्षेर्मुद्गलस्यैतादृशस्य व्रतस्य सर्वत्र ख्यातिरासीत् । कदाचिद् मुनेर्मुद्गलस्य कीर्तिकथां महर्षिर्दुर्वासाः श्रुतवान् । स च तं परीक्षितुं जडवद्वेषेण, मुण्डितशिरास्तत्र समागच्छत् । ऋषेराश्रमं प्राप्य सोऽवदत् - "महात्मन् ! भवान् अवश्यमेव जानाति यद् बुभुक्षार्तोऽहं भोजनस्याकाङ्क्षया समागतोऽस्मि ।" तच्छ्रुत्वा महर्षिर्मुद्गलः प्रसन्नः सन् तं स्वागतं व्याजहार । पूजोपचारैस्तस्य पूजनं विधाय श्रद्धया भोजनं निर्माय तस्मै न्यवेदयत् । श्रद्धया निवेदितं तत् सर्वमप्यन्नमतिथिरखादत् । शेषमपि अन्नं महर्षिर्मुद्गलस्तस्मै दत्तवान् । अन्त्ये भूमौ निपतितं पात्रेऽवशिष्टं चान्नं सर्वं शरीरे लेपयित्वा जडवेषो दुर्वासास्ततो निर्गतवान् । अपरस्मिन्नपि पर्वणि दुर्वासास्तथैवागत्य सर्वमन्नं भक्षयामास । तदानीमपि महर्षिर्मुद्गलः सपरिवारो बुभुक्षित एवाभूत् । स पुनर्यागार्थं अतिथिसेवायै चावश्यकं शिलं सङ्गृहीतवान् । बुभुक्षया तस्य मनो विकृतं शिथिलं च नाभूत् । तस्य जडवेशे मुनौ क्रोधोऽनादरो वा नासीत् । एवं दुर्वासाः षट्सु पर्वस्वागत्य सर्वमपि तेन निर्मितं भोजनं भक्षयामास । अतिथेस्तादृशेन व्यवहारेण सपरिवारस्य मुद्गलस्य हृदयं कदापि विकृतं नाभूत् । अतिथेस्तृप्तिस्तस्य परिवारस्य च हृदयं निर्मलं शान्तं च कारयति स्म ।

मुद्गलस्य तादृशं तपो दृष्ट्वा दुर्वासा अत्यन्तं प्रसन्नो बभूव । स उवाच, "महर्षे ! न त्वादृशः कश्चन दाताऽस्मिन् लोके वर्तते । बुभुक्षया धार्मिकाणां तपोनिष्ठानामपि चेतो विक्षिप्तं भवति, धैर्यं च प्रणश्यति । भोजनेनैव प्राणा रक्षिता भवन्ति । अस्माकं रसना सर्वदा रसमिच्छति । किन्तु त्वं जिह्वालौल्यं बुभुक्षां च

विनिर्जित्य शुद्धेन चेतसाऽन्नदानं करोषि । त्वं जितेन्द्रियस्तपोनिष्ठश्चासि । अहं त्वयि प्रसन्नोऽस्मि । अधुना सर्वेऽपि देवास्तव तपसा तुष्टाः सन्ति । बहुभिर्यागैस्तपोभिश्च लभ्यं परमं पदं त्वमधुनैव लब्धवानसि ।"

दुर्वाससि एवं वदति तत्र कश्चन देवदूतो विमानमादाय मुद्‌गलस्य समक्षं प्रापत् । दिव्यहंसयुतं सुगन्धैर्वासितं च तद् विमानं दिव्यदर्शनं कामगञ्चासीत् । देवदूतो महर्षिं मुद्‌गलं दृष्ट्वा सविनयमवोचत्, "मुने ! भवता तपसाऽतिथिसेवया दानेन च पुण्यलोकं जितमस्ति । देवैर्निर्दिष्टा वयं भवन्तं सम्प्रति देवलोकं नयामः । कृपया विमानमिदमारोहतु ।" देवदूतस्यैतादृशं वाक्यं श्रुत्वा महर्षिर्मुद्‌गलश्चकितो बभूव । क्षणमेकं विचार्य मुद्‌गल उत्तरितवान्, "सप्तपदीनं खलु साधूनां मैत्रम् । अतो भवान् मे मित्रं सम्प्रति । मित्र ! स्वर्गलोके किं सुखं किं चासुखमिति सत्यं मां कथय ।"

मुद्‌गलस्य जिज्ञासां श्रुत्वा देवदूतोऽवदत्, "महर्षे ! सर्वे खलु प्राणिनः स्वर्गं वाञ्छन्ति तथापि न पारयन्ते । अधुना स्वर्गं नेतुमिदं विमानं तवाग्रे उपस्थितं वर्तते । भवानवश्यमेव जानाति स्वर्गे किं भवतीति तथापि तवानुरोधतः कथयन्नस्मि । स्वर्लोकः मर्त्यलोकादुपरिष्टाद् वर्तमानो लोको विद्यते, यत्र धर्मपरायणा एव जना गच्छन्ति । स्वर्लोकवासिनो विमानेन इतस्ततो गन्तुं शक्नुवन्ति, अमृतादीनाञ्चोपभोगं कुर्वन्ति । तपसा, दानेन, यज्ञेन, इन्द्रियनिग्रहेण च पुण्यमर्जयित्वा जनाः स्वर्लोकं गन्तुं योग्या भवन्ति । वीरगतिं प्राप्ता पराक्रमिणश्च तत्र गच्छन्ति । तत्र देवाः, साध्याः, विश्वेदेवाः, महर्षयः, गन्धर्वाः, अप्सरसश्च वसन्ति । तेषामनेकेषु लोकेषु बहुविधा भोगा लभ्यन्ते । स्वर्गे लोके त्रयस्त्रिंशद्योजनोच्छ्रितः सुमेरुगिरिर्विराजते । सुवर्णपर्वतस्य तस्य शिखरे नन्दनादीन्युपवनानि सन्ति, यत्र धर्मात्मानो विहरन्ति । तत्र निवसतो जनान् बुभुक्षा पिपासा च न बाधते, चित्तं कदापि न खिद्यति, शीतोष्णप्रकोपो न जायते, केभ्यश्चन भयमपि न भवति ।"

देवदूतस्य सर्वमपि वचनं मुद्‌गलो ध्यानेन शृण्वन्नासीत् । देवदूतश्च स्वर्गलोकस्य व्याख्यानं विदधान एवासीत्- 'स्वर्गे लोके सर्वत्र सुगन्धः प्रसरति, सुखस्पर्शो वायुर्वहति, श्रुतिमधुरा ध्वनयः श्रूयन्ते, शोकमोहौ न भवतः, वार्धक्यं जरा च न बाधेते, पुण्यकर्मणा लब्धं देवशरीरं मलमूत्रादिरहितं दिव्यं भवति, वस्त्रं कदापि मलिनं न भवति, दिव्यकुसुमानां माला कदापि न म्लायते, विहारायैतादृशं विमानं सर्वेषां भवति । सर्वेऽपि तत्र ससुखं वसन्ति । देवलोकानामप्युपरि बहवो दिव्यलोकाः सन्ति । सर्वोपरि ब्रह्मलोको विद्यते । स्वर्गलोकनिवासिनामपि पूज्या देवास्तत्र निवसन्ति । तेषां शरीरं ज्योतिर्मयं भवति । भोगेच्छापि तेषां समाप्ता भवति । महाप्रलयेऽपि ते न प्रणश्यन्ति । भोगेच्छया जनस्तस्मिँल्लोके गन्तुं नैव शक्नोति । एतां परां सिद्धिं जनो दुःसाध्येनैव तपसा लब्धुं शक्नोति । भवांश्च तामेव परां सिद्धिं स्वेन तपसा जितवान् विद्यते । अतो विमानमारुह्य पुण्यलोकं प्रयाहि ।"

स्वर्गलोकस्य गुणान् श्रुत्वापि मुद्‌गलस्य गमनेच्छा नाभूत् । स देवदूतमकथयत्, "सृष्टौ सर्वमपि वस्तुजातं दोषवद् वर्तते । स्वर्गोऽपि दोषवान् स्यात् । अतोऽहं स्वर्गलोकस्य दोषान् ज्ञातुं वाञ्छामि ।"

मुद्‌गलस्यानुरोधं स्वीकुर्वन् देवदूतः स्वर्गस्य दोषान् वक्तुमारेभे, "स्वर्गे लोमहर्षकानि अनेकानि दुःखानि वर्तन्ते । यदन्येषु लोकेषु सञ्चितं पुण्यं तत्स्वर्गे क्षयमेति । पुण्यार्जनाय किमपि नूतनं कर्म स्वर्गे नैव विधीयते । क्षीणे

च पुण्ये स्वर्गान्मर्त्यलोके नरके वा निपातो भवति। सुखमुपभुज्य अधोलोकेषु निपततां जनानां या वेदना भवति, सा वर्णयितुमशक्या। निपततां जनानां प्रथमं माला म्लायते, ततश्चेतस्यधःपतनस्य भयं बाधते, तदनु रजोगुणप्रभावेन स्मृतिर्लुप्ता भवति। ब्रह्मलोकपर्यन्तेषु सर्वेष्वपि लोकेष्वेतादृशं भयमवश्यम्भावि वर्तते।

स्वर्गलोकस्य गुणदोषौ विज्ञाय मुद्गल उक्तवान्, "तादृशस्य लोकस्य वर्णनं कुरु, यत्र कोऽपि दोषो न विद्यते।" मुद्गलस्य वचनं स्वीकृत्य देवदूतो विष्णुलोकं वर्णितवान्, "ब्रह्मलोकादुपरि विष्णोर्धाम वर्तते। तज्ज्योतिर्मयं धाम निर्दोषं भवति। कामक्रोधादिभिर्दोषयुता जनास्तत्र कदापि प्राप्तुं न शक्नुवन्ति। ध्यानेन, अभ्यासेन च मनो वशीकृत्य योगिन एव तद्धाम प्राप्तुं शक्नुवन्ति, यत्र गत्वा जना न पुनः प्रत्यावर्तन्ते। महर्षे ! सर्वमपि मया निवेदितम्। अधुना विमानमारोहतु, कालक्षेपं न करोतु।"

देवदूतस्य मुखात्सर्वं श्रुत्वा मुद्गलोऽवोचत्, "देवदूत ! भवता स्वर्गस्य दुःखविषये सर्वं कथितम्। क्षीणपुण्यानां जीवानां नरकेषु मर्त्यलोके वा पतनेन या वेदना साऽस्माभिर्नानुमातुं शक्या। यस्य परिणतौ दुःखं स्यात् तादृशं लोकमहं न गन्तुमिच्छामि। यत्र शोको न भवति, तादृशस्य लोकस्याहमनुसन्धानं करोमि।" इत्थमुक्त्वा मुद्गलो देवदूतं नमश्चकार, देवदूतञ्च निवर्तितुं निर्दिदेश। ततश्च शिलोञ्छवृत्त्या शमेन दमेन तपसाऽतिथिसेवया च दिवसान् निनाय।

## शिक्षणालोकः

पाठस्य कथा व्यासविरचितान्महाभारतात् समुद्धृता वर्तते। अस्यां कथायां कर्मनिष्ठाया अतिथिसेवायास्त्यागस्य च महिमा सम्यग् वर्णिता विद्यते। अस्माकं समाजे अतिथिसेवायाः कीदृशी परम्परा वर्तते, कर्मनिष्ठता च कीदृश्यस्ति इति पाठादस्माद् छात्रा बोधनीयाः। जीवने तादृशव्यवहाराणां महत्त्वं विनिश्चित्य तदनुकूलव्यवहाराय छात्रा उत्प्रेरणीयाः।

# अभ्यासः

## पाठानुशीलनम्

१. **पाठस्य कथामेकैकशः पठत, अन्त्ये च एकैकशः कथासारं कक्षायां श्रावयत ।**

२. **पाठं पठित्वाऽधोनिर्दिष्टप्रसङ्गः कस्मिन्ननुच्छेदे वर्तते इति निश्चित्य वदत**

- दुर्वासस आगमनम्
- देवदूतस्यागमनम्
- स्वर्गस्य वर्णनम्
- मुद्गलस्य विमानपरित्यागः

३. **तृतीयमनुच्छेदं शिक्षकात् श्रुत्वा तस्याशयं स्वमातृभाषायां सर्वेषां पुरतो वदत ।**

४. **एकपदेनोत्तरयत**

(क) मुद्गलः कया वृत्त्या जीवनं निर्वाहयति स्म ?

(ख) अमावास्यायां पौर्णमास्यां च विधीयमानस्य यज्ञस्य नामधेयं लिखत ।

(ग) मुद्गलस्य परीक्षायै क आगतवान् ?

(घ) धार्मिकाणां चित्तं केन हेतुना विक्षिप्तं भवति ?

(ङ) मुद्गलस्य समक्षं देवदूतः किमादाय प्रापत् ?

(च) कीदृशं साधूनां मैत्रम् ?

(छ) केऽमृतादीनामुपभोगं कुर्वन्ति ?

(ज) सर्वोपरि वर्तमानस्य लोकस्य नामधेयं लिखत ।

(झ) स्वर्लोके किं क्षयमेति ?

(ञ) स्मृतिलोपस्य कारणं किम् ?

(ट) योगिनः किं वशीकृत्य विष्णोर्धाम प्राप्नुवन्ति ?

५. **सङ्क्षेपेणोत्तरयत**

(क) महर्षेर्मुद्गलस्य स्वभावं वर्णयत ।

(ख) दुर्वासाः कथं मुद्गलस्य परीक्षणमकरोत् ?

(ग) कथानुसारेण स्वर्गस्य गुणानां वर्णनं कुरुत ।

(घ) स्वर्गलोकस्य दोषाः के ? तेषां वर्णनं कथानुसारेण कुरुत ।

(ङ) मुद्गलः किमर्थं स्वर्गलोकं त्यक्तवान् ?

## ६. अधःप्रदत्तानि कथनानि पाठानुसारेण संशोध्य लिखत

(क) मुद्गल एकाकी एव निवसति स्म ।

(ख) महर्षिः कश्यपो मुद्गलस्य परीक्षायै तत्र आगमत् ।

(ग) पुण्ये क्षीणे सत्यपि जनाः स्वर्लोके एव निवसन्ति ।

(घ) देवदूतः स्वर्गलोकस्य गुणानेव वर्णयामास ।

(ङ) महर्षिर्मुद्गलः प्रसन्नः सन् स्वर्गं जगाम ।

(च) शेषदिवसान् महर्षिः क्रोधेन निनाय ।

## ७. 'अतिथिसेवा' इति विषये सरलभाषयाऽनुच्छेदमेकं लिखत ।

## ८. पाठानुसारेण परस्परं मेलयत

| **समूहः क** | **समूहः ख** |
|---|---|
| अतिथिसेवापरायणः | धर्मपरायणाः |
| जडवद्वेषधारी | मलमूत्रादिरहितम् |
| स्वर्गलोकवासिनः | मुद्गलः |
| देवशरीरम् | सप्तपदीनम् |
| साधूनां मैत्रम् | दुर्वासाः |

## ९. मुद्गलस्य चरितमनुकरणीयं वा न ? विमृश्य तस्य सारं लिखत ।

## १०. अतिथिसेवाविषयकं दानमहिमविषयकं वा प्रसङ्गं कञ्चनानुसन्धाय तस्य वर्णनं कुरुत ।

## ११. अधस्तनं श्लोकं पठित्वा तस्य व्याख्यां कुरुत

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ?
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥

## १२. अधस्तनं वेदानुशासनं पठित्वा तदनुवर्तिप्रश्नान् उत्तरयत

सत्यं वद । धर्मं चर । स्वाध्यायान् मा प्रमद ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् ।

(क) कीदृशं वाक्यं वद इति वेदो निर्दिशति ?

(ख) स्वाध्यायस्य विषये वेदानुशासनं किम् ?

(ग) के देवरूपा भवन्ति ?

(घ) कुतो न प्रमदितव्यम् ?

## १३. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

सत्यमूलं जगत्सर्वं जगदाधारकं परम् ।
सन्यान्नास्ति परं ज्योतिः, सत्यं धर्मस्य जीवितम् ॥

किं नाम सत्यम् ? - सते कल्याणाय हितं सत्यम् । यत् सर्वलोकस्य हितसम्पादने प्रभवति, सर्वस्य च जगतः सुखमावहति, समाजस्य संरक्षणं च विदधाति, तदेव सत्यम् । दार्शनिकदृष्ट्या यद् वस्तु शाश्वतरूपेण स्थायि अविनश्वरं च तत् सत्यम् । यत्र देशकालादिभेदेऽपि न वैपरीत्यं परिवर्तनक्षमत्वं वा तत् सत्यम् । तथाविधविवेचनया जगति ब्रह्मैव सत्यमिति दर्शनविद्भिः संस्थाप्यते । अत्र दार्शनिकं सत्यं न विवक्षितम्, इति लौकिकं सत्यमेव विव्रियते । यद् वस्तु, येन रूपेण विद्यते तस्यैव तेनैव रूपेण प्रकाशनं विवरणमभिधानं च सत्यमित्यनेनाभिप्रेतम् ।

जगति द्विविधा मानवा निवसन्ति - सत्याश्रयिणोऽसत्याश्रयिणश्च । केचनानृतमेव जीवनोपयोगीति आकलय्य अनृतेनैव जीविकोपार्जनं विदधति । अनृतेनैव लोकव्यवहारसिद्धिरिति ते मन्वते । किन्तु असत्याश्रयेण तात्कालिकी अल्पकालिकी वा समुन्नतिः सुलभा, परं सा दुःखदायिनी दुःखान्ता च । लोके पारमार्थिकी समुन्नतिः सत्येनैव सम्भवति । अत एवोच्यते - 'सत्यमेव जयते नानृतम्, सत्ये सर्वं प्रतिष्ठितम्' इत्यादि ।

**(क) एकपदेनोत्तरयत**

(अ) जगदाधारः कः ?

(आ) दार्शनिकदृष्ट्या एकमेव सत्यं किम् ?

(इ) जगति कतिविधा मानवा निवसन्ति ?

(ई) असत्येन कीदृशी समुन्नतिः सुलभा ?

**(ख) पूर्णवाक्येनोत्तरयत**

(अ) किं नाम सत्यम् ?

(आ) दार्शनिकदृष्ट्या सत्यं कीदृशं भवति ?

(इ) अनृतमेव जीवनोपयोगीति मन्वानो जनाः किं विदधति ?

(ई) असत्येन लब्धा समुन्नतिः कीदृशी ?

(उ) पारमार्थिकसमुन्नतेः कारणं किम् ?

**(ग) उपर्युक्तगद्यतः सत्यस्य विषये स्तिस्रः सूक्तीर्विलिख्य तासां सरलार्थमेकवाक्येन लिखत ।**

## व्यवहारानुशीलनम्

**१. अतिथीनां सेवायै तव गृहे किं किं क्रियते ? कक्षायां श्रावय ।**

**२. त्वं कीदृशं सुखं प्राप्तुमिच्छसि ? एकमनुच्छेदं लिखित्वा श्रावय ।**

**३. त्वं दोषवान् वर्तसे उत गुणवान् उताहो उभयवान् ? स्वस्मिन् वर्तमानानां गुणानां दोषाणां च पृथक् पृथक् सूचीं निर्मात ।**

**४. समुचितविकल्पं ✓ चिह्नेन योजयत**

**(क) अतिथिसेवायै त्वं किं विदधासि ?**

(अ) स्वागतं व्याहरामि, कुशलं च पृच्छामि ।

(आ) जलं पाययामि ।

(इ) फलभोजनादिकमाहारार्थं प्रददामि ।

(ई) उपर्युक्तं सर्वं करोमि ।

**(ख) त्वं स्वस्य जीवने कीदृशं कर्म करोषि ?**

(अ) येनान्येषां पीडा स्यात् ।

(आ) येन सर्वेषां सौविध्यं स्यात् ।

(इ) येन धनलाभोऽधिको भवेत् ।

(ई) येनाहङ्कारवृद्धिः स्यात् ।

**(ग) मान्यानामाज्ञां श्रुत्वा त्वं किं करोषि ?**

(अ) अशृण्वन्निव निवसामि ।

(आ) विवादं करोमि ।

(इ) तामनुपालयामि ।

(ई) विरुद्धं कर्म करोमि ।

**(घ) सप्ताहान्तस्यावकाशसमये त्वं किं करोषि ?**

(अ) क्रीडया दिवसं नयामि ।

(आ) स्नानादिकं मातुः सहयोगं च करोमि ।

(इ) आदिवसं शये ।

(ई) नवीनं पुस्तकं पठामि ।

सप्तदशः पाठः

# वाचं वदत भद्रया

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥१॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥२॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥३॥
येन देवा न वियन्ति नो च विद्विषते मिथः ।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ॥४॥
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान्वः सम्मनसस्कृणोमि ॥५॥
समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥६॥
सध्रीचीनान्वः सम्मनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः सायं प्रातः सौमनसो वो अस्तु ॥७॥

**१**
**पदच्छेद:**

सहृदयम्, साम्मनस्यम्, अविद्वेषम्, वः, कृणोमि, अन्यः, अन्यम्, अभि, हर्यत, अघ्न्या, जातम्, वत्सम्, इव ।

**अन्वयः**

वः अविद्वेषम् सहृदयम् साम्मनस्यं कृणोमि अघ्न्या जातं वत्सम् इव (वः) अन्यः अन्यम् अभि हर्यत ।

**अर्थः**

युष्माकं सर्वेषां पारस्परिकं द्वेषं दूरीकृत्याहं सहृदयतायाः, सौमनस्यस्य सञ्चारं करोमि । यथा गौर्वत्से स्निह्यति, तथैव यूयं सर्वे परस्परं स्नेहभावेन व्यवहरन्तु ।

**२**
**पदच्छेदः**

अनुव्रतः, पितुः, पुत्रः, मात्रा, भवतु, संमनाः, जाया, पत्ये, मधुमतीम्, वाचम्, वदतु, शन्तिवाम् ।

**अन्वयः**

पुत्रः पितुः अनुव्रतः भवतु, मात्रा संमनाः (भवतु), जाया पत्ये मधुमतीं शन्तिवां (च) वाचं वदतु ।

**अर्थः**

पुत्रः पितुर्व्रतमाचरतु । स मातुराज्ञापालको भवेत् । भार्या भर्तारं प्रति मधुरं शान्तिमयञ्च वचनं वदेत् ।

**३**
**पदच्छेदः**

मा, भ्राता, भ्रातरम्, द्विक्षत्, मा, स्वसारम्, उत, स्वसा, सम्यञ्चः, सव्रताः, भूत्वा, वाचम्, वदत, भद्रया ।

**अन्वयः**

भ्राता भ्रातरं मा द्विक्षत्, उत स्वसा स्वसारं मा, सम्यञ्चः सव्रता भूत्वा, भद्रया वाचं वदत ।

**अर्थः**

भ्रातरः परस्परं द्वेषं मा कुर्वन्तु । भगिन्यो भगिनीः प्रति मा ईर्ष्यन्तु । भवन्तः सर्वे एकमताः समानव्रतिनश्च भूत्वा मृदुभाषां वदन्तु ।

**४**
**पदच्छेदः**

येन, देवाः, न, वियन्ति, नो, च, विद्विषते, मिथः, तत्, कृण्मः, ब्रह्म, वः, गृहे, संज्ञानम्, पुरुषेभ्यः ।

**अन्वयः**

येन देवाः न वियन्ति, मिथः च नो विद्विषते, तत् संज्ञानं ब्रह्म, वः गृहे पुरुषेभ्यः कृण्मः ।

**अर्थः**

येन प्रेमभावेन देवाः परस्परं न वियुञ्जन्ति, न च परस्परं द्विषन्ति, तदेव ज्ञानं तव परिवारे स्थापयामि । सर्वेषु जनेषु पारस्परिकं प्रेम भवेत् ॥४॥

**५**
**पदच्छेदः**

ज्यायस्वन्तः, चित्तिनः, (वसन्तु), मा, वियौष्ट, संराधयन्तः, सधुराः, चरन्तः, अन्यः, अन्यस्मै, वल्गु, वदन्तः, एत, वः, सध्रीचीनान्, सम्मनसः, कृणोमि ।

**अन्वयः**

ज्यायस्वन्तः चित्तिनः संराधयन्तः सधुराः चरन्तः मा वियौष्ट अन्यः अन्यस्मै वल्गु वदन्तः एत वः सध्रीचीनान् संमनसः कृणोमि ।

**अर्थः**

उत्कृष्टतां प्राप्नुवन्तः सर्वे सौहार्दभावेन मिलित्वा वसन्तु । यूयं कदापि वियुक्ता न भवन्तु । पारस्परिकीं प्रसन्नतां सम्पाद्य गुरुभारमपि मिलित्वा कर्षयन्तोऽग्रे गच्छन्तु । परस्परं मृदुवचनैर्व्यवहरन्तः प्रियजनैः सह मिलित्वा चलन्तु । अतो युष्मान् उत्तमचेतसा युक्तान् करोमि ॥५॥

**६**
**पदच्छेदः**

समानी, प्रपा, सह, वः, अन्नभागः, समाने, योक्त्रे, सह, वः, युनज्मि, सम्यञ्चः, अग्निम्, सपर्यत, अराः, नाभिम्, इव, अभितः ।

**अन्वयः**

वः प्रपा अन्नभागः सह समानी, वः समाने योक्त्रे सह युनज्मि, अभितः नाभिं अराः इव, (वः) सम्यञ्चः अग्निं सपर्यत ।

**अर्थः**

युष्माकमन्नजलसामग्री समा भवेत् । अहं सर्वानेकेनैव प्रेमबन्धेन एकीकरोमि । यथा रथनाभिं परित अरा युक्ता भवन्ति, तथैव मिलित्वा अग्नेः परिचर्यां कुरुत ॥६॥

**७**
**पदच्छेदः**

सध्रीचीनान्, वः, सम्मनसः, कृणोमि, एकश्नुष्टीन्, संवननेन, सर्वान्, देवाः, इव, अमृतम्, रक्षमाणाः, सायं प्रातः, सौमनसः, वः, अस्तु ।

**अन्वयः**

संवननेन वः सर्वान्, सध्रीचीनान् सम्मनसः एकश्नुष्टीन् कृणोमि, अमृतं रक्षमाणाः देवाः इव सायं प्रातः वः सौमनसः अस्तु ।

**अर्थः**

अहं समगतीन् युष्मान् सममानसान् करोमि, येन भवन्तः पारस्परिकेण प्रेम्णा समानभावेन च एकमग्रणीमनुसरेयुः । यथा देवाः समभावेन अमृतं रक्षन्ति, तथैव सायं प्रातर्युष्माकं सर्वेषामुत्तमसङ्गो भवतु ॥७॥

## शिक्षणालोकः

ऋग्वेदस्य दशममण्डलस्य एकनवत्यधिकैकशततमं सूक्तमिव अथर्ववेदस्य तृतीयकाण्डस्य त्रिंशत्तमं सूक्तमिदञ्च संज्ञानसूक्तमस्ति । सूक्तमिदं सामाजिकैकतायाः, पारस्परिकस्य सौहार्दस्य, सद्भावस्य च भावेन परिपूर्णमस्ति । अस्य सूक्तपाठस्याध्यापनेन छात्राः पारस्परिकैकतापूर्वकं सद्भावपूर्णस्य व्यवहारस्य महत्त्वविषये ज्ञापनीयाः । सद्भावेन मिलित्वा कार्यसम्पादनाय च ते प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

#### १. शुद्धमुच्चारयत

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥

#### २. शुद्धं लिखित्वाऽऽशयं प्रकटयत

अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥

#### ३. नेपालीभाषायामर्थं लिखत

सध्रीचीनान्वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः सायं प्रातः सौमनसो वो अस्तु ॥

#### ४. सङ्क्षेपेण उत्तरयत

(क) गौः कस्मिन् स्निह्यति ?

(ख) सर्वेषु जनेषु किं भवेत् ?

(ग) पुत्रः कस्य व्रतमाचरतु ?

(घ) के समभावेन अमृतं रक्षन्ति ?

(ङ) को मातुराज्ञापालकः ?

(च) जनाः परस्परं केन व्यवहरन्तु ?

(छ) केन देवाः परस्परं न वियुञ्जन्ति ?

(ज) भार्या भर्तारं प्रति कीदृशं वचनं वदेत् ?

#### ५. 'वाचं वदत भद्रया' इत्यस्य भावं विशदयत ।

## ६. पाठाधारेण विशेष्यविशेषणयोः परस्परं मेलनं कुरुत

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| मधुरम् | प्रेम |
| येन | प्रेमबन्धेन |
| सर्वेषु | जनेषु |
| पारस्परिकम् | वचनम् |
| एकेन | प्रेमभावेन |

## ७. पाठाधारेण रिक्तस्थानं पूरयत

(क) मिलित्वा ........................... । (योद्धव्यम्, चलितव्यम्)

(ख) द्वेषः ................................ । (अवलम्बनीयः, दूरीकरणीयः)

(ग) स्नेहभावेन .......................... । (ताडनीयः, व्यवहरणीयः)

(घ) सौहार्दभावेन ....................... । (स्थातव्यम्, स्पर्धितव्यम्)

## ८. पाठाधारेण सत्यासत्यं विवेचयत

(क) पुत्रः पितुराज्ञापालको मा भवेत् ।

(ख) सर्वे परस्परं क्रोधभावेन व्यवहरन्तु ।

(ग) भ्रातरः परस्परं किञ्चिदेव द्वेषं कुर्वन्तु ।

(घ) भगिन्यो भगिनीः प्रति एकवारमेव ईर्ष्यन्तु ।

(ङ) जनेषु सौहार्दतायाः सञ्चारो विलम्बेन भवतु ।

## ९. सामाजिकसद्भावस्य एकतायाश्च उदाहरणमन्तःसञ्जालकादन्विष्य कक्षायां श्रावयत ।

## १०. सद्भावस्य महत्त्वबोधकं रूपकमेकं विरच्य कक्षायां तस्याभिनयं कुरुत ।

## ११. नीतिवाक्येषु प्रयोगं कुरुत

सहृदयम्, अन्यम्, पुत्रः, जाया, भ्राता, स्वसा, देवाः, मिथः, अग्निम्, अराः, अभितः, सर्वान्, इव, रक्षमाणाः, प्रातः, अस्तु ।

## १२. अर्थं लिखत

कृणोमि, मधुमती, स्वसा, सव्रताः, चरन्तः, वदन्तः, संमनसः, अग्निम्, सौमनसः ।

## १३. अधस्तनश्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि दत्त

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥

(क) परं श्रेयः किम् ? (ख) का परमा तृप्तिः ?

(ग) उत्तमा शान्तिः का ? (घ) का सुखावहा वर्तते ?

## १४. प्रदत्तकथां पठित्वा प्रश्नानुत्तरयत

कस्मिंश्चिन नगरे एको महाजनो निवसति स्म । तस्य पार्श्वे प्रभूतं वैभवमासीत्, किन्तु मनसि शान्तिर्नासीत् । महाजनस्यैतादृशीं दशां विचार्य कश्चन हितैषी तमवदत्, "नेदीयसि अपरस्मिन् ग्रामे कश्चन साधुर्निवसति । स सर्वेभ्यः सिद्धिं प्रददाति, येन सर्वेषां मनोरथः सफलो भवति ।"

तच्छ्रुत्वा महाजनस्तदानीमेव साधोः समीपमगमत् । सोऽवदत्, "महर्षे ! मम पार्श्वे प्रभूतं धनमस्ति, किन्तु मनसि तुष्टिर्मे नास्ति ।" साधुरवोचत्, "वत्स ! यदहं विदधामि तत् सम्यङ् निरीक्षस्व । त्वमचिरादेव सुखस्योपायं प्राप्स्यसि ।"

अपरेद्युः साधुस्तं सूर्यातपे निधाय स्वयं कुटीरे न्यवसत् । घर्मेण महाजनो व्यथितो बभूव, किन्तु तूष्णीमेवावतिष्ठत् । द्वितीयदिवसे साधुस्तस्मै आहाराय किमपि नाददात् । स्वयं तु तस्य निकटे एव स्थित्वा नानाविधानि पक्वान्नानि बुभुजे । महाजनस्तदापि मौनमेवाकलयत् ।

कुपितो महाजनस्तृतीयदिवसे गृहं प्रत्यावर्तितुमुद्यतोऽभूत् । साधुरवदत्, "किमर्थं गन्तुकामोऽसि ?", स उदतरत्, "अहन्त्वत्र सुखमन्वेष्टुमागत आसम्, किन्तु निराशा मे लब्धा । किमर्थमत्र व्यर्थं निवसानि ?"

साधुरवदत्, "अहन्तु शान्तेरुपायं पूर्वमेवोक्तवानासम्, प्रथमदिवसे सूर्यातपे त्वां संस्थाप्य कुटीरे स्थित्वा अहमवदम्, मम छाया तव कृते शीतलं न ददाति । त्वं नावगतवान् । ततोऽहं बुभुक्षितस्य तव समीपे पक्वान्नान्यखादम् । अहमुक्तवान् यन्मम तपस्तव सिद्धये न प्रभवति । अत एव शान्तेर्लाभाय स्वेनैव यतनीयं भवति । अहं तव मनसि शान्तिं निष्पादयितुं न शक्नोमि । तदर्थं त्वयैव यतनीयम् । येन कर्मणा शान्तिर्मिलति तादृशमेव कर्म करणीयम् ।"

साधोर्वचनं श्रुत्वा महाजनः शान्तेरुपायं ज्ञातवान् । तदनु शुभसङ्कल्पः सन् गृहं प्रत्यागतः ।

**(अ) एकपदेनोत्तरयत**

(क) नगरे को निवसति स्म ?

(ख) महाजनस्य समीपे किमासीत् ?

(ग) साधुस्तं कुत्र संस्थाप्य कुटीरे न्यवसत् ?

(घ) शान्तेर्लाभाय केन यतनीयं भवति ?

**(आ) एकवाक्येनोत्तरयत**

(क) महाजनस्य पार्श्वे किमासीत्, किञ्च नासीत् ?

(ख) साधोः समीपगमने किं भवति ?

(ग) द्वितीयदिवसे साधुः किं कृतवान् ?

(घ) महाजनः किं विधाय गृहं प्रत्यागतवान् ?

**(इ) पाठाधारेणोचितमनुचितं वा सङ्केतयत**

(क) महाजनो शरीरेण रुग्ण आसीत् ।

(ख) हितैषी राज्ञः पार्श्वे गमनाय तमुक्तवान् ।

(ग) महाजनः प्रथमदिवसे सिद्धिं प्राप्तवान् ।

(घ) मनसः शान्तये स्वेनैव यतनीयम् ।

(ङ) शान्तेरुपायं ज्ञात्वा महाजनो दुःसङ्कल्पं कृत्वा गृहमागतवान् ।

## व्यवहारानुशीलनम्

१. **सामाजिकसद्भावस्य वृद्धये त्वया सम्पादनीयानि कार्याणि सूचीकृत्य भित्तिकायां संलग्नं कुरु ।**

२. **त्वं मधुरं भाषसे उत कर्कशम् ? आत्मसमीक्षां विधेहि ।**

३. **कर्कशभाषणस्य कारणेन किं क्वचित् त्वया तव सख्या वा दुःखं प्राप्तमस्ति ? अस्ति चेत् तस्य निराकरणं कथं विहितम् ? प्रस्तुत ।**

४. **समुचितमुत्तरं ✓ चिह्नेन दर्शयत**

**(क) परस्परं कलहं कुर्वतो जनान् दृष्ट्वा त्वं किं करोषि ?**

(अ) किमपि न करोमि ।

(आ) अहमपि गत्वा कलहे संलग्नो भवामि ।

(इ) तान् सद्भावस्य महत्त्वं स्मारयामि ।

(ई) अन्यानपि आहूय तेषां कलहं पश्यामि ।

**(ख) यदि मित्रं त्वयि कुप्यति चेत् त्वं किं करोषि ?**

(अ) अहमपि कुप्यामि ।

(आ) तं तर्जयामि, तेन सह व्यवहारं न करोमि ।

(इ) क्षमां याचे, तेन सह पुनर्मिलामि ।

(ई) मातरं गत्वा श्रावयामि ।

**(ग) असहायं कञ्चन बालकं मार्गे दृष्ट्वा त्वं किं करोषि ?**

(अ) तस्य पित्रोः सम्पर्कसूत्रं पृच्छामि, सम्पर्कं च कारयामि ।

(आ) स्वस्य गृहं नयामि ।

(इ) तं तर्जयित्वा दूरतः प्रेषयामि ।

(ई) तं तत्रैव त्यक्त्वा स्वस्य गृहं गच्छामि ।

**(घ) यदि कश्चन दुर्वचनं वदति चेत्त्वं किं करोषि ?**

(अ) अहमपि तं दुर्वचनेन प्रहरामि ।

(आ) तेन सह प्रेम्णा व्यवहरामि, दुर्वचनं नैव वक्तुं प्रेरयामि ।

(इ) चिन्तितः सन् तिष्ठामि ।

(ई) गुरोः समीपं गत्वा निवेदयामि ।

## परियोजना

१. समाजे पारस्परिकस्य सद्भावस्य परिणामविषये सर्वेक्षणपूर्वकं सूचीं निर्मात ।

२. मातापितृभ्यां सह सन्ततेः सम्बन्धः कीदृशोऽपेक्षित इति विषये क्रियाकलापसूचीं स्वपरिवाराधारेण रचयत ।

अष्टादशः पाठः

# हर्षपुरम्

मोरङजनपदस्य दक्षिणपूर्वदिशि हर्षपुरनामको ग्राम आसीत् । अशीतिर्गृहाणि तस्मिन् ग्रामे आसन् । तेषु कानिचन गृहाणि सघनानि कानिचन इतस्ततो विकीर्णानि अदृश्यन्त । ग्रामीणाः कृषिकर्म विधाय जीविकां कुर्वन्ति स्म । उदारहृदयो दयालुर्दीनवत्सलो वयोवृद्धो मेघनाथो हर्षपुरस्य ग्रामनायक आसीत् । तस्य वचनमेव ग्रामस्य नियमः, विवेकजो निर्णय एव न्यायविधिरासीत् । तस्य निष्पक्षतां सहयोगिनं व्यवहारं ग्रामे ग्रामीणेषु च प्रदर्शितामात्मीयतां च विलोक्य ग्रामीणास्तं ग्रामपितृरूपेण सम्मानयन्ति स्म । मेघनाथस्य संरक्षणे तस्मिन् ग्रामे पारस्परिकः कलहः, अशान्तिः, चौर्यमित्यादीनि दुष्कर्माणि नैव कदाचिदपि दृष्टानि, नैव श्रुतानि च ।



वयोवृद्धो मेघनाथः कालक्रमेणाशक्तो रोगार्तश्चाभवत् । स शनैः शनैर्गृहाद् बहिरागन्तुमपि असमर्थोऽभवत् । तस्य सन्ततयो नासन् । अतो ग्रामनायकरूपेण तस्योत्तराधिकारी कोऽपि नाभवत् । एकदा स सर्वान् ग्रामीणान् स्वगृहाङ्गणे आहूयोक्तवान्, "भो ग्रामीणाः ! कालरोगौ मह्यं मृत्योः सङ्केतम् अदत्ताम् । मयि मृत्योश्चिन्ता नास्ति परन्तु अस्य ग्रामस्य महती चिन्ता वर्तते । यदि मम मृत्योः पश्चादपि भवन्तो ग्रामस्य सुरक्षां ग्रामीणानां च सुखं वाञ्छन्ति चेत् सदा पारस्परिकमैक्यं सम्पादनीयम् । मिथः सहयोगेन सद्भावेन च आगमिष्यमाणा विपत्तीर्दूरीकृत्य ग्रामे सुव्यवस्था सम्पादयितुं शक्यते । अतस्तस्मिन् विषये सर्वदा भवद्भिः सचेष्टैः क्रियाशीलैश्च भाव्यम् ।" ग्रामीणा मेघनाथस्य वचनं स्वीकृत्य स्वं स्वं गृहं प्रत्यागच्छन् । सप्ताहान्तरे मेघनाथस्य देहान्तोऽभवत् ।

मेघनाथस्य वार्षिककर्मणः समाप्तिं यावद्ग्रामे शोकस्य वातावरणमासीत् । ग्रामे ग्रामनायकस्याभावेन शनैः शनैर्ग्रामीणानां प्राक्तनं सामाजिकमैक्यं क्षयं गतम् । धान्यरोपणप्रसङ्गे कुल्याजलस्य विषये ग्रामीणानां मध्ये एकदा विवादो जातः । सोममणिस्तस्यारम्भमकरोत् । हर्षदेवस्य क्षेत्रसेचनाय निर्दिष्टं क्रममुल्लङ्घ्य स कुल्याजलप्रवाहं स्वक्षेत्रेऽनयत् । तद्विषये हर्षदेवपक्षीयाः सोममणिपक्षीयाश्चेति ग्रामीणा वर्गद्वये विभक्ताः । सोममणिः कुद्दालस्य दण्डेन हर्षदेवस्य मस्तके प्राहरत् । भग्नमस्तको हर्षदेवो मूर्छितो भूत्वा कुल्यायामपतत् । निकटस्थो हेमशङ्करो हर्षदेवमुत्थाप्य गृहं प्रापयत् ।

सोममणिहर्षदेवयोः कलहः शान्तो नैव जातः । तस्मिन्नेव विषये ग्रामीणा विभक्ता अभवन् । समाधानाय केनापि अग्रेसरता नैव गृहीता । सोममणेः प्रभावभयेन सत्पक्षपातिनो ग्रामीणा अपि निःशब्दतामगृह्णन् । शिरोव्यथया अन्यायेन च पीडितो हर्षदेवः क्षेत्रं गत्वा कार्यं कर्तुमपि अशक्तोऽभवत् । तत्पत्नी मीना महता दुःखेन पत्युः परिवारस्य च सेवां क्षेत्रगतं च कार्यं कृतवती ।

सोममणिहर्षदेवयोः विवादस्तयोर्विवादे एव सीमितो नासीत् । तत एव मेघनाथेन कृता सामाजिकी व्यवस्था अपि प्रायेण भग्नाऽभवत् । विशेषतोऽहम्मन्या ग्रामीणा निर्बलानपहेल्य स्वार्थसिद्धौ प्रेरिता जाताः । ग्रामीणेषु एकता, सद्भावः, पारस्परिकः सहयोगश्चेत्येतादृशा गुणाः शून्यतां प्राप्ताः । सोममणिरात्मानं ग्रामनायकं मनुते स्म । निर्बला निर्धनाश्च कृषकाः पुरतः सोममणेर्विरोधं कर्तुं न प्रभवन्ति स्म किन्तु मनसि सोममणौ सम्मानभावो नासीत् ।

मार्गशीर्षमासे कृषकाणां क्षेत्रेषु धान्यानि परिपक्वान्यासन् । कृषकाः क्षेत्रेषु गत्वा धान्यच्छेदनमकुर्वन् । ग्रामीणेषु पारस्परिकमैक्यराहित्यं ज्ञात्वा रात्रौ एव ग्रामान्तरात् समागता लुण्ठकाः कृषकाणां क्षेत्राच्छेदितानि धान्यानि अलुण्ठयन् । विशेषतो हर्षदेवसमर्थकानां कृषकाणां धान्यानि लुण्ठितान्यासन् । इमां घटनां श्रुत्वा लुण्ठितानां च दुरवस्थां विलोक्य सोममणिः प्रसन्नोऽदृश्यत । तस्य तद्व्यवहारेण ग्रामीणा नितरां दुःखिता अभवन् । ग्रामीणाः समस्यायाः समाधानस्य उपायं कर्तुं जनपदाधीशं निवेदयितुं विराटनगरं गन्तुकामा अभवन् किन्तु तत्रापि सोममणिस्तत्पक्षीयाश्च जना अवरोधमकुर्वन् । समस्यां पुरस्कृत्य जनपदाधीशः सूच्यते चेल्लुण्ठकाः पुनः पुनर्ग्राममागत्य ग्रामं लुण्ठन्ति इति सोममणिपक्षस्य तर्क आसीत् ।

जनानां प्रतिकारराहित्यं विलोक्य लुण्ठकास्तद्ग्राममागत्य गृहाण्यपि अलुण्ठन्। जना लुण्ठकैर्भयभीता जाताः। युवानो ग्रामरक्षायै रात्रौ शयनमपि अत्यजन्। तेन मासद्वयं यावल्लुण्ठनं नैवाभवत्।

माघमासस्य शैत्यकाले सोममणिर्भागिनेयस्य विवाहाय ग्रामान्तरं गत आसीत्। दशाधिका लुण्ठकाः समागत्य सोममणेः पत्नीं बालकं पुत्रं च बन्धीकृत्य गृहस्थं धनधान्यादिकं बलादपाहरन्। सोममणेदुर्व्यवहारं स्मृत्वा लुण्ठकानां भयेन वा स्यात्, तत्पत्न्याः 'त्राहि त्राहि' इति शब्दं श्रुत्वाऽपि ग्रामीणाः सहायतायै नैवागच्छन्। अपरेद्युः समागतः सोममणिः किंकर्तव्यविमूढोऽभवत्। तस्य दीनतां विलोक्य एको वृद्धः कृषकः सोममणेः पुरत एव न्यगदत्, "परेभ्यो दुःखं ददानः परदुःखे रममाणोऽपि कदाचिद् स्वयं दुःखार्तो भवति। मेघनाथस्य मृत्योरनन्तरमस्मिन् ग्रामे तव कारणेन सामाजिको न्यायो मृत इव सञ्जातः किन्तु भगवतो न्यायः कदापि न म्रियते।"

हर्षदेवः सोममणेरवस्थां स्वपत्नीमुखात् श्रुतवान्। स इदानीमपि शिरोव्यथया पूर्णतः स्वस्थो नासीत् तथापि पत्न्या सह तद्गृहं गतवान्। तत्र बालपुत्रेण सह सोममणी रुदन्नासीत्। तत्र तत्प्रतिवेशिनी कथयन्ती आसीत्, "इह ग्रामे जना मेघनाथस्य प्रभावात् सर्वे सहृदया आसन्। दिवङ्गते तस्मिन् त्वं दुष्टताया हालाहलं समाजे सन्ततवान्। एकीभूतः समाजः कुल्याजलप्रसङ्गेन त्वया विभक्तीकृतः।" हर्षदेवं प्रदर्शयन्ती सा पुनउक्तवती, "पश्य इमं निरपराधं हर्षदेवमग्रजम्। त्वया कृतेन कुद्दालदण्डप्रहारेण इदानीमपि अस्वस्थो वर्तते किन्तु तवास्यां दुःस्थितौ वेदनां प्रदर्शयितुं पत्न्या हस्तं गृहीत्वा समागतो वर्तते। समाज एतादृशैः सद्भिर्मानवैः सुव्यवस्थितो भवति। दुष्टतां त्यज सोममणे! दुष्टतां त्यज। दुष्कर्म तावन्मधु आभासते, यावत् तद्घटः पूर्णो न भवति। यदा पापस्य घटः पूर्णो जायते, तदा तत्परिणामोऽसह्यो भवति। तवेदानीं सैवावस्था वर्तते।"

सोममणिर्निःशब्द आसीत्। जनाः सर्वे सोममणिं धिक्कुर्वन्त आसन्। ह्यो ये तत्समर्थका आसन्, अद्य ते तत्र नासन् किन्तु हर्षदेवः सोममणेः पक्षमाश्रित्य तं सान्त्वयन्नुक्तवान्, "सोममणे! तव पिता मम पितुरात्मीयः सखाऽऽसीत्। त्वमपि मम बाल्यकालादेव सखा वर्तसे। वयं सर्वे ग्रामीणा एकस्मिन्नेव ग्रामे निवसामः। अस्मासु यदा स्वार्थान्धता नासीत्, तदा अयं ग्रामः सुरक्षितः शान्तः सुव्यस्थितश्चासीत्। इदानीं ग्रामस्य पूर्वतनी शोभा तवैव कारणेन नाशङ्गता। ग्रामस्यैकता, ग्रामीणानां मध्ये दृश्यमानं प्रेम, सामाजिकः सद्भावश्चेत्यादयो गुणा इदानीं कुत्र सन्ति? यदि मेघनाथस्य समये दृष्टं सामाजिकमैक्यमिदानीमभविष्यत् तर्हि ग्रामीणानां क्षेत्राद् धान्यानां लुण्ठनं नाभविष्यत्, तव सम्पदां सुरक्षा च समभविष्यत्। अतस्त्वं मेघनाथ इव निःस्वार्थः सन् सामाजिकसद्भावविकासाय प्रयासं कुरु। अहं तव समर्थनं करोमि।"

दिनत्रयं यावत् सोममणिः स्वगृहाद् बहिर्नादृश्यत। चतुर्थे दिवसे मन्दिरप्राङ्गणे ग्रामीणानाहूय क्षमां याचमानोऽकथयत्, "जनो धनवैभवेन जनमनसि जीवितुं न शक्नोति। सामाजिकी प्रतिष्ठा सत्कर्मणा प्राप्यते। तादृशः सत्कर्मी उपकारी जन एव मेघनाथवत् सर्वदा जीवति। धनस्य बलस्य चाभिमानेन मया सामाजिकमैक्यं नष्टीकृतम्। परिणामतः समाजे लुण्ठकानां सन्त्रासः समभवत्। मया विभक्तीकृतां सामाजिकीमेकतां पुनः सुदृढीकर्तुमितोऽहं प्रयतिष्ये। पूर्वकृतानां दुष्कर्मणां कृते भवद्भिः सह क्षमां याचे।

हर्षदेवस्य तत्परिवारस्य चाहमपराधी अस्मि । अतो हर्षदेवंप्रति क्षमां याचमानस्तस्योपचारस्य प्रतिबद्धतां प्रस्तौमि ।”

सोममणिस्तस्माद् दिनाद् ग्रामस्य ग्रामीणानां कृषकाणां च हितायात्मानं समर्पितवान् । ग्रामः पुनः पूर्ववत् एकतामापन्नोऽभवत् । विराटनगरस्य चिकित्सालये हर्षदेवस्योपचारोऽभवत् । इदानीं सोममणिहर्षदेवौ परमसखायौ वर्तेते । हर्षपुरग्राम इदानीमुभयोर्नायकत्वे सुखी शान्तश्च वर्तते । निकटस्था अन्ये ग्रामीणा हर्षपुरस्य समृद्धेः कारणं तत्रत्यां सुदृढां सामाजिकीमेकतां मन्वते ।

## शिक्षणालोकः

अस्याः कथायाः शिक्षणक्रमे विद्यार्थिनः सामाजिकैकताया महत्त्वविषये बोधनीयाः, तत्परिपालनाय प्रेरणीयाः । सामाजिकीमेकतां विना समाजे सुव्यवस्था, शान्तिः समृद्धिश्च न भवतीति कथान्तरैरपि विद्यार्थिनो बोधनीयाः । एवं ते सामाजिकसद्भावप्रवर्धनायोत्प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पूर्वपठितां कथां सस्वरं श्रावयत ।**

२. **पाठस्य सारांशं कथयत ।**

३. **एकपदेनोत्तरयत**

(क) हर्षपुरग्रामस्य नायकः कः ?

(ख) ग्रामीणा मेघनाथं केन रूपेण सम्मानयन्ति स्म ?

(ग) ग्रामे विवादस्य आरम्भं कोऽकरोत् ?

(घ) सोममणिः केन हर्षदेवं प्राहरत् ?

(ङ) हर्षदेवस्य पत्नी का ?

(च) एकीभूतः समाजः केन विभक्तीकृतः ?

(छ) हर्षदेवः केन सह सोममणेर्गृहं गतवान् ?

(ज) हर्षदेवस्य उपचारः कुत्राभवत् ?

४. **पूर्णवाक्येनोत्तरं लिखत**

(क) हर्षपुरग्रामस्य नियमः क आसीत् ?

(ख) मेघनाथस्य चिन्ता कस्मिन् विषये आसीत् ?

(ग) कस्मिन् विषये ग्रामवासिनां विवादो जातः ?

(घ) ग्रामीणाः कस्मिन् विषये विभक्ता अभवन् ?

(ङ) हर्षपुरस्य समृद्धेः कारणं किम् ?

५. **पाठाधारेण सत्यासत्यविवेको विधेयः**

(क) हर्षपुरस्था जनाः कृषिकर्म कुर्वन्ति स्म ।

(ख) मेघनाथेन संरक्षिते ग्रामे अशान्तिर्व्याप्ताऽऽसीत् ?

(ग) सोममणिर्मेघनाथस्योत्तराधिकारी आसीत् ।

(घ) सोममणिरात्मानं ग्रामनायकं मनुते स्म ।

(ङ) ग्रामीणाः सोममणिपत्न्याः सहायतायै अगच्छन् ।

(च) सोममणेः क्षमायाचनानन्तरं ग्रामः पुनरेकताबद्धोऽभवत् ।

## ६. अधः प्रदत्तानि पदानि प्रयुज्य प्रतिपदमेकं नीतिवाक्यं रचयत

बहिः, श्रुत्वा, शनैः, आगत्य, सह, आसन्, हिताय, एकदा, कुरु, अभिमानेन ।

## ७. पाठस्थ-कथायामधस्तनानि कथनानि केन कं प्रति केनोद्देश्येन प्रयुक्तानीति निर्दिशत ?

(क) मयि मृत्योश्चिन्ता नास्ति ।

(ख) भगवतो न्यायः कदापि न म्रियते ।

(ग) दुष्टतां त्यज सोममणे, दुष्टतां त्यज ।

(घ) त्वमपि मम बाल्यकालादेव सखा वर्तसे ।

(ङ) सामाजिकी प्रतिष्ठा सत्कर्मणा प्राप्यते ।

## ८. मिथो विशेष्यविशेषणयोर्मेलनं कुरुत

| | |
|---|---|
| महती | सखा |
| पारस्परिकी | मेघनाथः |
| सामाजिकी | निर्णयः |
| असीमितः | न्यायः |
| निर्धनाः | चिन्ता |
| परिपक्वानि | एकता |
| मृतः | विषादः |
| आत्मीयः | व्यवस्था |
| विवेकजः | कृषकाः |
| | विवादः |
| | धान्यानि |

## ९. उक्तिविस्तरो विधेयः

(क) भगवतो न्यायः कदापि न म्रियते ।

(ख) परेभ्यो दुःखं ददानः परदुःखे रममाणोऽपि कदाचिद् स्वयं दुःखार्तो भवति ।

(ग) सामाजिकी प्रतिष्ठा सत्कर्मणा प्राप्यते ।

## १०. पाठस्थकथामाधृत्य अधस्तनानां घटनानां क्रमं निर्धारयत

(क) शान्तः हर्षपुराख्यो ग्रामः ।
(ख) वर्गद्वये ग्रामीणानां विभाजनम् ।
(ग) हर्षदेवस्य सोममणेश्च मित्रता ।
(घ) सोममणिं प्रति हर्षदेवस्य सान्त्वना ।
(ङ) कुल्याया जलविषये विवादः ।
(च) सोममणेर्गृहलुण्ठनम् ।
(छ) मेघनाथस्य मृत्युः ।
(ज) लुण्ठकैः कृषकाणां धान्यापहारः ।
(झ) सोममणिना क्षमायाचनम् ।

## ११. अधो लिखितमनुच्छेदं पठित्वा प्रश्नान् उत्तरयत

आदिकालादेव स्वतन्त्रतया विराजितोऽस्माकं देशो नेपालो विश्वमानचित्रे लघुरस्ति, परं वैविध्येन विशालः । अत्र प्रकृतिरपि विविधतां धारयति । अस्योत्तरस्यां दिशि सदैव हिमैराच्छादिता हिमालयाः संसारस्य शिरोरूपेण विराजन्ते । तेषामधः पर्वतप्रदेशे ओषधियुक्तानि हरितानि विशालानि वनानि, सुदीर्घाः पर्वतमालाश्च सन्ति । गण्डकीकौशिक्यादिभिर्नदीभिः सिञ्चितेऽस्मिन् देशे तराईप्रदेशाख्या शस्यशालिनी वसुधाऽन्नोत्पादनेनास्मानुपकुर्वन्ति । अनेकतायामेकतैवास्माकं देशस्य गौरवास्पदं सूत्रमस्ति । अत्रानेके धर्मावलम्बिनः, विविधा जातयश्च विद्यन्ते । नवीनतमाया गणनाया आधारेणात्र १२४ भाषाणां भाषिणः, दशाधिकधर्मसम्प्रदायसम्बद्धाः, १४२ जातीयाश्च जनता निवसन्ति । ते स्वस्वभाषया व्यवहरन्ति, निजपरम्परया पर्वोत्सवादीनि च मन्यन्ते । अनेनात्र नैकविधाः परम्पराः, वेशभूषाः, संस्काराः, संस्कृतयश्च प्रचलिता दृश्यन्ते । केषाञ्चन देशानां संस्कृतय उत्पद्यन्ते, कालक्रमे विलीयन्ते च । परमस्माकं संस्कृतिः अद्वितीया गौरवशालिनी चास्ति । अस्मत्पूर्वजा 'वसुधैव कुटुम्बकम्! इत्युदीरयन्तो विश्वबन्धुत्वस्य सहकार्यस्य च कृतेऽस्मान् निर्दिशन्त आसन् । समेषां धर्मसम्प्रदायानां लक्ष्यं समानम् । परोपकारः, सदाचारः, मैत्रीभावः, सहकार्यमित्यादयो गुणाश्च समाना एवेत्यस्माकमभिमतमस्ति । अतोऽस्माकं संस्कृतिरद्यापि मूलरूपेण प्रचलन्ती विद्यते । अत्र नैकभाषाभाषिणो विविधमतावलम्बिनश्च सर्वे राष्ट्रध्वजमेकं नमन्ति, एकमेव राष्ट्रगानं च गायन्ति । एते राष्ट्रियान् सामाजिकाँश्चोत्सवान् परस्परं मिलित्वा सहैवायोजयन्ति । एतावताऽनेकतायामपि एकताया मधुरा धारा प्रवाहिताऽस्ति । वैशिष्ट्यमेतदस्माकं सर्वदैव नैरन्तर्येण भवेदिति ।

(क) नेपालः कया दृष्ट्या विशालो वर्तते ?

(ख) नेपालस्य पर्वतप्रदेशे के सन्ति ?

(ग) नेपालस्य गौरवास्पदं सूत्रं किम् ?

(घ) अस्मत्पूर्वजाः किं निर्दिष्टवन्तः ?

(च) 'परस्परम्' इत्यस्य प्रयोगेण नीतिवाक्यमेकं रचयत ।

(छ) अनुच्छेदस्योपयुक्तं शीर्षकं दत्त ।

## व्यवहारानुशीलनम्

१. पाठस्थकथायाः सोममणेश्चरित्रं किं त्वमात्मनि निधातुं वाञ्छसि ? स्वाभिमतं प्रस्तुहि ।

२. हर्षदेवस्य स्थाने त्वं वर्तसे चेत् किं करोषि ? आत्मसमीक्षा विधेया ।

३. पाठस्थकथायां कियन्ति चरित्राणि सन्ति ? तेषु कस्तुभ्यं रोचते ? स्वाभिमतं सकारणं प्रकटयत ।

४. समाजे एकतास्थापनायै कानि तत्त्वान्यवधार्याणि, कानि च परिहर्तव्यानि ? अधो निर्दिष्टेषु ✓ चिह्नेनाङ्कयत

| तत्त्वम् | अवधार्यम् | परिहर्तव्यम् |
|---|---|---|
| सहकार्यम् | | |
| आत्मीयता | | |
| अपमानम् | | |
| विभेदः | | |
| मित्रता | | |
| द्वेषः | | |
| अभिमानम् | | |
| सहयोगः | | |
| सद्भावः | | |
| स्वार्थः | | |
| परपीडनम् | | |
| संयोजनम् | | |
| परोपकारः | | |
| विभाजनम् | | |
| दुर्विचारः | | |
| चौर्यम् | | |
| प्रेम | | |
| शान्तिः | | |
| समव्यवहारः | | |
| अशान्तिः | | |
| कलहः | | |
| सम्मानम् | | |